# महावीर उक्तवान्

प्रवचनकारा:

राष्ट्रसन्त आचार्या: श्रीमद्विजयजयन्तसेनसूरय:

प्रकाशक:

**श्री राज राजेन्द्र प्रकाशन ट्रस्ट**

शेखनो पाड़ो, रिलीफ रोड,

अहमदाबाद (गुजरात)

पुस्तक
महावीर उत्कथान्

प्रवचनकार
राष्ट्रसन्त आचार्य विजय जयन्तसेन सूरि

अवतरण
दीपावली : सन् 2000

प्राप्तिस्थान

श्री राज राजेन्द्र तीर्थ दर्शन म्यूजियम
श्री मोहनखेड़ा तीर्थ, राजगढ़
जिला - धार (म.प्र.)

शाश्वत धर्म कार्यालय
संघवी भवन, 305 स्टेशन रोड़
शंकर मंदिर के सामने
थाने-400 601 (महा.)

श्री राज राजेन्द्र
प्रकाशन ट्रस्ट
अहमदाबाद

प्रकाशक:
श्री राज राजेन्द्र प्रकाशन ट्रस्ट
अहमदाबाद

मुद्रक:
शुभं ग्राफिक्स 137/2 जूना रिसाला, इन्दौर

मूल्य - 75/- रुपये

# समर्पणम्

समर्पितोऽयं ग्रन्थो महावीरवाणीशुश्रूषुभ्यो
गीर्वाणवाणीसुधारसरसिकेभ्यः
संसारसागरतितीर्षुभ्यो
कषायक्लान्तेभ्यो
विषयविरक्तेभ्यः
मुक्तिकामेभ्यो
मानवेभ्यः।

—जयन्तसेनसूरिः

# स्वगतम्

अद्यतः पञ्चशतोत्तरद्विसहस्रमितवर्षेभ्यः प्राक् भगवान् महावीरः निर्वाणं गतः। यद् भगवता महावीरेण कथितमासीत् तस्य नवनवा व्याख्या श्रीमद्विजययतीन्द्रसूरेः विद्वच्छिष्येण श्रीजयन्तविजयेन 'मधुकरेण' कृता। व्याख्यात्र विविधानां सूत्राणां प्राकृत ग्रन्थानां च जैनाचार्यवर्य्याणां गहनं अध्ययनं विधाय उदाहरणैः संसाध्य विषयाः प्रमाणीकृताः। ज्ञान-विज्ञानयोः विकासशीलयुगे विज्ञानस्य चमत्कृतिभिः प्रभाविते मानवजीवने एवंविधा रचना आध्यात्मिकप्रेरणादायिन्यो मानवकल्याणसम्पादनाय समर्थाः भवितुमर्हन्ति।

प्रणेता खल्वस्ति जिज्ञासुरथ चाध्ययनशीलः, तस्मात् समाजो लाभान्वितो भवेन्निरन्तरं इति कामयेऽहम्।

मतं च मे स्पष्टं यद् इमां हि उत्कृष्टां रचनां जनाः पठेयुः, हेयं त्यजेयुः, ज्ञेयं जानीयुः, उपादेयं च गृह्णीयुः।

विदुषा व्याख्यात्र नैके ग्रन्थाः वैदुष्यपूर्णा विरचिताः, अल्पेनैव च कालेन श्रीमद्विजयविद्याचन्द्रसूरेः सान्निध्यं सफलीकृतम्। अस्य खल्वनागतमतीवोज्ज्वलम् विद्यते।

सं. 2021
कार्तिकशुक्ला
एकादशी

सद्गुणानुरागी
ल.भ.गान्धी
निवृत्तिंगतः, जैन पण्डितः प्राच्य विभागः
बडौदा राज्य राष्ट्रपति पदक पुरस्कृतः
(भारत सर्वकारतः)

# शुभाशी:

"महावीर उक्तवान्" एतत्पुस्तकाभिधानं यदा कर्णकुहरे पतितं, स्फुरितं तदा यद् भगवता महावीरेण न केवलं मानवेभ्योऽपितु सर्वेभ्योऽपि प्राणिभ्यः श्रेयोरूपं भवबाधाहरं चौषधरूपं निगदितं सर्वम्। एतच्च सर्वमात्मशान्त्यै आत्मविकासाय बाह्याभ्यन्तरशुद्धये च प्रतिपादितम्।

स जातोऽहिंसकः तद्वदेव विग्रहोऽहिंसायाश्च कटपूतनोपसर्ग-संगमोपसर्ग-चण्डकौशिकदशनेषु एवंविधेषु चान्येषूपसर्गेषु मर्षमूर्तिर्भूत्वा स्वकं स्थापितवान्, फलतश्च स ह्यहिंसावतार इव प्रकटितः। जीवने अहिंसाया आवश्यकतां उपयोगं, महत्त्वं, तत्कृतनिर्भयत्वं च स प्रत्यक्षं अनुभूय प्रतिपादितवान्। अहिंसामूलकमेव व्रतम् इति च स्थापितवान् सत्यवचनं, सत्याचरणम्, सत्य चिन्तनं च मूलं आत्मोत्थानाय।

अदत्तस्य ग्रहणं जीवनयात्रायां आत्मकल्याणमार्गे च अन्तरायरूपं विपदावर्जकं दुःखजनकं च। एतस्माद् विपरीतं अदत्तादानविरतिः लोके परलोके च शान्तिदायिका।

अब्रह्मस्थितिः जीवनप्रकाशस्य विनाशिका परिग्रहसंग्रहस्य च वृत्तिः प्राणिनं समस्यासु स्थापयति। एवमेव रात्रिभोजनं जीवनावनत्यै अन्यतमं, रुजानां आवर्जकं, जिह्वालौल्यवर्धकं च भवति। अतो विपरीतं ब्रह्मचर्यं अपरिग्रहं च आत्मानमात्मनि स्थापनायालम्।

इत्थं हि भगवतो महावीरस्य षट्सूत्रके विज्ञानपत्रे सर्वेषामपि कृते निश्चिन्तनिर्भीकविश्रान्तियुतं जीवनं जीवितुं बलं समाहितं आस्ते।

भगवतो महावीरस्योपदेशानधिकृत्य मानवजगतः सम्मुखं एतत्प्रकाशनं सामयिकं वर्तते। मुनिराजः श्रीमद्विजयजयन्तसेनसूरिः 'मधुकरः' एतत्स्तुत्यप्रयासायाभिनन्दनीयः। कामयेऽहं स अन्यानपि साहित्यप्रणयनप्रयासान् विधास्यति। गुरुवर्य्याणां कृपातः तत्र साफल्यं भवेत्।

श्रीमोहनखेड़ा तीर्थः — विजयविद्याचन्द्रसूरिः

सं. 2032 गुरुसप्तमी

# ज्ञेयस्य स्वरूपम्

भगवता महावीरेण किमुक्तम् इदं हि जिज्ञासावचनम्। स्थूल दृष्ट्या हि कोऽपि मानवः महावीरस्य सिद्धान्तान् प्रतिपादयितुं सक्षमः, परन्तु जीवनविषयिकासु सूक्ष्मिकासु भगवान् महावीरः कियद्व्यापकदृष्ट्या संवलित आसीत् —इदं तावद् एतत्पुस्तकं पठित्वैव ज्ञातुं शक्यते।

भगवता महावीरेण जीवनस्य किमपि क्षेत्रं दार्शनिकप्रभावयुताभिः विवेचनाभिः अस्पृष्टं न त्यक्तम्। नास्ति स विषयो यस्य समीक्षा स्वेषु विचारेषु न कृता स्यात्। भगवता खलु प्रकृतेरणोः परमाणोश्च सम्बन्धं मानवजीवनपक्षतः विविच्य जीवनं तपोमयं साधनामयं कर्तुं सम्बोधितम्। सूक्ष्मविषयाणां वर्गीकरणं विधाय जीवनस्य निस्सारतायाः दिग्दर्शनं कारयित्वा प्राणिमात्राय मोक्षमार्गस्य पथिकं भवितुं सदुपदेशः कृतः।

सामान्यज्ञानशालिनोऽपि लोका यदि इदं पुस्तकं सगाम्भीर्यं पठेयुः तत् स्वजीवने स्वीये दृष्टिकोणे आध्यात्मिकपरिवर्तनं विधातुं समर्था भवेयुः। अशान्तिनैराश्यसंघर्षैः सह योद्धं अजय्यां च शक्तिं प्राप्नुयुः।

पुस्तकमिदं मृदुभाषया ऋजुशब्दैः दार्शनिकविचाराणां विश्लेषणं विदधाति। एतद्धि मधुकलश इव विद्यते यस्य खलु बिन्दुमात्रमपि अमृततुल्यं वर्तते, यं आस्वाद्य प्राणिनः स्वीयं जीवनं सुखमयं कर्तुं शक्नुवन्ति।

लेखकेन उत्तराध्ययनसूत्रकृतांगदशवैकालिकादिसूत्रभगवतीसूत्रादिग्रन्थानां गभीरं अध्ययनं कृत्वा अस्मिन् पुस्तके शंकानां निवारणं वैज्ञानिकरीत्या कृतम् यद् अनुभवनिकषे समीचीनं तिष्ठति।

अहं कामये धारये च यद् स्वीयजीवनेऽहं एवंविधान् एव ग्रन्थान् पठेयम् अनुशीलयेयं च।

सं. 2021 कार्तिकी पूर्णिमा **पं. हीरालाल शास्त्री**

(संस्कृत पण्डित, गुढाबालोतरा)

राजस्थान

# आत्मनिवेदनम्

परमश्रमणो भगवान महावीरदेवो वर्तमानचतुर्विंशतिकस्य चरमः तीर्थङ्करः। साधु-साध्वी-श्रावक-श्राविकारूपस्य चतुर्विधसंघस्य संस्थापक आत्मा, अतुल्यबली निस्सीमज्ञानी सर्वद्रष्टा च 'तीर्थङ्कर' —इति नाम लभते। तेनैतत्सर्वोच्चपदं प्राप्त्याः पश्चात् विश्वस्य कमपि जीवं प्रति न खलु मोहोऽवशिष्यते न च ममत्त्वम्। स तु केवलं वीतरागत्वेन समत्त्वेन च युक्तो वरीवर्ति।

विपन्नानाञ्चानेकानामात्मनां कृते शरणं निरालम्बानां कृते चालम्बनं बोभूयते। अज्ञा एतस्य शरणं प्रपद्य सुज्ञत्वस्य प्रज्ञत्वस्य च मार्गं प्राप्नुवन्ति।

नानाविधा अनुभूतीः आत्मसात्कृतवान् स परमात्मा महावीरदेवः खलु प्राग्जातैः तीर्थङ्करैः प्रतिपादितानां मौलिकानां जैनदर्शन-सिद्धान्तानां प्रतिपादनं प्रमाणनं च विहितम्। तीर्थङ्कराणां हि केवल-ज्ञाने केवलदर्शने च किमपि न्यूनाधिक्यं न भवति। परिणामतः सर्वेषामेव तीर्थङ्कराणां वाक्यानि त्रिकालाबाधितानि चाविच्छिन्नानि च तिष्ठन्ति।

विचारेषु हि अनेकान्तता आचारे चाहिंसा तस्य प्रवचनस्य मुख्य विषयः। स्वस्य दार्शनिको पक्ष एव सत्योऽन्यस्य च असत्य इति प्रचार-प्रसारे निखिलशक्ते विनियोगेन पारम्परिकेण मतवैविध्येन द्वेषप्रद्वेषविद्वेषाणामेव वृद्धिः भवति। अन्योन्यं औचित्यभावस्थाने अनौचित्यभावः अनुचितप्रभावोऽनुचितव्यवहारश्च वृद्धिं एति। तत्र च जैनदर्शन-सिद्धान्तः स्वीये समाधानाधारे सर्वानपि आकारयति। सर्वेषामपि विचारान् अवधार्य प्रत्येकं सापेक्षवादानेकान्तवादसिद्धान्तबलेन सुसिद्धो मार्गदर्शको भूत्वा समाधानस्य सत्प्रदाता भवति।

निखिलेऽपि विश्वप्राङ्गणे चराचरपदार्थानां त्रैकालिकं स्वरूपं निरूपयितुं जैनदर्शनसिद्धान्तस्य मौलिकता स्वकीया वर्तते। *जीवादितत्त्वनवकस्यं प्रतिपादनं तस्य उत्पाद-व्यय-ध्रौव्यात्मिकायाः*

स्थित्याश्च प्रतिष्ठापनं तस्य आत्मविज्ञानस्थितेः शुद्धं स्पष्टं च प्रदर्शनि स्वीयमसाधारणमवदानं विद्यते।

अनेकान्तविषये खलु निरूपितं—

जेण विणा लोगस्य ववहारो सव्वहा न निवडई।

तं भुवणेक्कगरूणो, णमो एगन्तवायस्स ।

विश्वस्य कापि प्रवृत्तिः अनेकान्ताद् ऋते न कदापि सम्भवति इत्युक्त्वा नतिर्विहिता।

एतस्मादेव यदापि कस्यापि पदार्थस्य स्वरूपविषये विवादः प्रादुर्भवति तदा एष एवानेकान्तः आगत्य नानापक्षान् विवृत्य अभिन्नतां प्रति गमयति।

जीवादितत्त्वानां गवेषणा, तां च यान्त्रिकोपकरणैर्विना इयत् सूक्ष्मां, सूक्ष्मतरां, सूक्ष्मतमां विचारणां प्रस्तवनं जैनदर्शनस्य मौलिकतास्ति।

निर्मलनिर्लेपामूर्तात्मतत्त्वं कर्मवर्गणायाः पौद्गलिकी शक्तिः कदा कुतः केषु केषु च भावेषु बद्धवती ? एतस्य विशदा विचारणा यथा जिनागमेषूपलब्धा दृश्यते न तादृशी अन्यत्र सम्भाव्यते। तस्य च विचारणायाः आगमग्रन्थानां अनुयोगेषु विभक्तिकरणं वस्तुस्थितिनिरूपणं, सहजस्वरूपस्य च प्रस्तुतिकरणमसाधारणम्।

प्रकृते नयवादस्य च निष्पक्षगङ्गोत्र्यां प्रत्येकं धारणायाः सुष्ठु अवगमनविधानस्य परमश्रेयः परमतारकस्य जैनशासनस्य आस्ते —इदं सन्देहरहितम्।

कर्मवादस्य भव्यं स्वरूपं, आत्मनः कर्मणाञ्च सम्बन्धं, सम्बन्ध हेतुं, कर्मरहितस्थित्याः प्रारूपम्, उपक्रमं अन्ततश्च वास्तविकं स्वरूपं बोधयितुं श्रेयो जैनसिद्धान्तप्ररूपकाणां एव गच्छति इति निःशङ्कम्।

आचार : इति क्रियान्वयनम्

आ : मर्यादायां

चरणम् : गतिः, गतिशीलता

मर्यादायां स्थितिः, गतिः प्रत्येकं प्रवृत्तिश्च आचारः। क्षमामूर्तेः विश्वोद्धारकस्य परमकारुणिकस्य श्रमणस्य भगवतः श्रीमतः महावीर-स्वामिने परमदिव्यातारिणीवाक् इदानीमपि एवं विधमनुपमं सन्देशं धृत्त्वां अस्मिन् विश्वप्राङ्गणे विद्यमाना दृश्यते।

आचरणेन वै नरः नारायणत्वं भगवत्त्वं च प्राप्नोति। जन्मना, ज्ञात्या, कुलेन, वर्णेन वा नास्ति कोऽपि महान् वाऽधमो वा। आचरणेनैव स जनः श्रेष्ठो वा निकृष्टो वा गण्यते। क्रान्तिमत्याऽनया महावीरस्य घोषणया जनजीवनम् अवबोधितम्, परिवर्तनस्य च मार्गोऽपि विशोधितः।

जीवनं सर्वेषामेवाधिकारः, न कोपि मर्तुं वाञ्छति। एतस्मात् नास्ति कोप्यधिकारसम्पन्नः कमप्यन्यं व्यापादयितुं ताडयितुं, त्रासयितुं च वा। एषा खलु परमपावना प्रवचनधारा अगणितानां मनुज-देव-तिरश्चां प्राणिनिवहानां अपवित्रां मानसिकीं वृत्तिं परिवृत्त्य पूतीकृत्य स्वाभाविक-स्थित्यां स्थापितवती।

संग्रहवृत्तिरेव पापम् अपरिग्रहवृत्तिश्च धर्मः। यतो हि आवश्यकतायाः अधिकः संचयो मनोवाक्कायकर्मणां विकृतिमातनोति। प्रत्यक्षातो लाभदायिनी पवित्रतमा वाणी ह्यनेकान् प्राणिन आत्मनः सत्पथे आनीय धृतवती। तत्परमोद्धारकदेवाधिदेवमहावीरस्य काषायतापनिवारिणी मंगलमयी वाणी विश्वेनापि विश्वेन पूजिता। विविधाषु भाषासु अनूदिता अनेकेषु ग्रन्थेषु प्रकाशिता। "भगवान् महावीरे शुं कह्युं ?" इति शीर्षकं दधत् पुस्तकं वीरनिर्वाणसंवत्सरे २५/४ तमे वर्षे प्रकाशितं जातम्। तस्य हिन्दीसंस्करणं २५/५ तमे वर्षे प्रकाशितम्। अधुना च वीरनिर्वाण सं. २५२६ तमे वर्षे संस्कृतसंस्करणं प्रकाशे नीयते संस्कृतानुरागिणां सज्जनानां कृते।

प्रकाशनावसरे चास्मिन् सर्वप्रथमं अहं तेषां चरणयोः नतमस्तकोऽस्मि यैः मनोत्साहः सदाधारोऽखण्डितश्च संरक्षितः, ते च पूज्यपादाः प्रशान्तमूर्तयः श्रीमद्विजयविद्याचन्द्रसूरयोऽस्माकमाचार्याः।

अस्यां वेलायां परमार्थाचार्यः, काव्यतीर्थः पण्डितः शान्तप्रकाशः सत्यदासः नागदावासी नैव विस्मारयितुं शक्यते येन प्रस्तुतग्रन्थस्यानुवाद-

कार्ये पूर्णं योगदानं कृतम्। डॉ. मिथिलाप्रसादः त्रिपाठी ग्रन्थस्यास्य परिचायकप्रास्ताविकं अतीवाकर्जकं कृतवान् पाठकैः मया च स न कदापि विस्मारयिष्यते। भाषिकं सम्मार्जनं सम्पादनं च डॉ. गजेन्द्रकुमारेण जैनोपाह्वेन विहितं येनेदं पुस्तकं अस्मिन् रूपे उपस्थापयितुं शक्यते।

कार्यस्याकृतिग्रहणे चित्रकारमहोदयस्य श्रीशिरीषजोशिनः, वर्णसंयोजकस्य श्री अरुणरेगेः, मुद्रकस्य, चित्रमुद्रकस्य च योगदानं अभिनन्दनीयं आस्ते। एतत्पुस्तकेन पाठका लाभान्विता स्युरिति शुभाभिलाषा।

—जयन्तसेनः सूरिः

# प्रास्ताविकम्

''सत्यान्नास्ति परो धर्मः'' इति वचनं निश्चप्रचमेव लोके सदाचाराध्वजुषां मतिमताम्। स्वाचरणेन न भवेत्कस्यापि मनोविषादः, उत वाऽहिंसा जीवमात्रस्योल्लासाय वरमिति। साधूनां परित्राणाय दुष्कृतामुत्पथगामिनां वा शमनाय, जीवधर्मस्य स्थापनाय प्रसारणाय प्रचारणाय चास्मिन् भारते वर्षे कृतविहाराणां धृतविग्रहाणां प्रथितिर्भगवत्पदवाच्या भवत्येव। भगवान् महावीरोऽभूत् तीर्थङ्करेष्वन्यतमोऽनुशास्तोपदेष्टा भारते वर्षे। उपदेष्टा पुरुषः शरीरेणाचारणं विधाय शरीरान्तरं प्राप्नोति परन्तु तस्यानुभूतिनिकषवैदुषीमात्मन्याहित-तत्त्वप्रवणां वाणीं स्मारं स्मारं जनाः स्वजीवनं तपोमहितं विदधति। आचारैरेवाचार्यतामपि यान्ति सन्मार्गजुषः। यद्यपि सूत्रग्रन्थेषु संकलिताः सन्ति भगवतो वाचः। तासु जीवननिर्माणाय मानवताविकासाय च सम्यगुपदेशा राजन्ते।

''**महावीर उक्तवान्**'' इति शीर्षकेण संकलितां रचनां पिपठिषुः कश्चिदपि मनुष्यजीवने दैवीं सम्पदवाप्तुं क्षमो भवेद्। सूत्रेषु समग्रा जीवनपद्धतिः जीवननिर्मितिश्च साद्यन्तमनुस्यूता विद्यते, परन्तु वर्त्तमानाचार्यवर्यैः श्रीजयन्तसेन सूरीश्वरपादैः पञ्चाशदुत्तरसूत्र-शतयोरेव संकलनं विधाय भगवतो महावीरस्य वाक्शक्तिरुपबृंहिता। उत्तराध्ययन-सूत्रकृताङ्गाऽऽचाराङ्ग-दशवैकालिक-प्रश्नव्याकरण-भगवती-ज्ञातृधर्मकथाऽऽनुयोगद्वार- राजप्रश्नीयोपासकदशासूत्रेभ्यः सूत्राणि संगृह्य स्वानुभववैशिष्ट्य- भावनया व्याख्याय श्रमण-

श्रावकाभ्यां कृते समर्प्य महानुपकारः विहितः श्रीमद्विराचार्य-जयन्तसेनसूरिभिः।

मानवजीवने तृष्णाया लोभस्य च प्रभावः सर्वानतिशेरते परन्तु ग्रन्थास्यास्य श्रीगणेश एव तयोरपाकरणायालमुपदिशति यथा—

तण्हा हया जस्स न होइ लोहो,
लोहो हओ जस्स न किंचणाइ ।।

सूत्रमिदमविस्मरन् जनो न कदापि साधनायां विषीदति। मुहुर्मुहुर्गुरूपदेशं विनाऽपि लक्ष्यनिष्ठया निःस्पृहो निर्लोभश्च सिद्धिम् अधिगच्छति। तदेव श्रेयान्— ''मा गलियस्सेव कसं वयणमिच्छे पुणो पुणो'' इति द्वितीयं सूत्रवचनम्। किंविधमाचरणं निर्विघ्नतया नयति सिद्धदशां साधकमिति विचार्य षट् सूत्राणि प्रदर्शितानि।

स्वमार्गात्सुमार्गाद्वा विचलनक्षणे स्मर्तव्यानि सूत्राणि नव सन्ति। जगति व्याप्तमना सुखदुःखेषु विगतस्पृहो भूयाद्यतो हि स्वयमेवात्मना मित्रमात्मैव भवतीति यथा— ''पुरिसा तुममेव तुमं मित्तं किं बहिया मित्तमिच्छसि?'' तथैव बन्धमोक्षावपि स्त आत्मगतावेव। तद्यथा— ''बन्धप्पमोक्खो अज्झत्थेव''। आत्मनो रिपुरप्यात्मैवेति सूत्रयति सूरिर्यथा— ''एगप्पा अजिए सत्तु।'' एवमेवाभयदानार्थं भोगत्यागाय मिष्टभाषणाय, गोप्यं गोपनाय चापि सूत्राणि संकलितानि सन्ति। प्राप्तं विभज्य सेव्यं, गर्वोऽनाचरणीयः, स्वयमिव परेऽवगन्तव्या आत्मनो विजयश्च विधेयस्तथान्तःशुद्धिर्गरीयसीति सूत्रवाक्यानि वर्णितानि। सत्कर्माचरणं, ब्रह्मचर्यव्रतम् धर्मः सर्वमिति, प्रियभाषणञ्च सर्वैः साधनीयानि। क्रोधमपि शमेन शमयेत्— 'उवसमेण हणे कोहं'' एवमेव पञ्चाशदुत्तरसूत्रशतयोः संकलनं विधायात्र जीवनस्य व्यवहारं प्रति मानवीयतामुत्कर्तुञ्च भृशमुपदिशन्त्याचार्याः। क्वचिदाचरणार्थं

क्वचित्संयमार्थं, क्वचिद् व्यवहारार्थं क्वचिच्चिन्तनार्थं क्वचिद् बोधार्थञ्चोपदेशाः कृताः सन्ति मुनिना। कुत्रचित् प्रतिष्ठावृत्तिं क्वापि मिथ्याभाषणम् क्वापि च त्रासवृत्तिं नाभिनन्दति धर्माचार्यः। कुशीलस्य त्यागः, सदाचारसंग्रहः, धर्माचार्याणां वन्दनम्, जनानामुपहासवर्जनम् पापादपाकरणं गुरुसम्माननम् निश्चयेन विधेयमिति समादिशति सूत्रद्वारेणाचार्यः। वाक्संयमः विनयः सत्यवाक्, शुचिता, गर्वशून्यता, निष्कामता, मूर्खसंगतित्यागोऽपरिग्रहादयो भावा मानवान् दैवत्वं प्रति नयन्ति। मैत्रीभावेनापि शान्तिर्भवति, हितभुक् मितभुक् ऋतभुक् च जनो व्रतेन साफल्यमेति। लाभचिन्तया लोभवृद्धिः लोभेनासत्यवृत्तिः समुदेति, विद्ययाऽचरणेन च मोक्षप्राप्तिः। विनयी मानं त्यक्त्वा स्वात्मोन्नतिं विदधाति। अतः परं ब्रह्मचारिणां साधकानां विरक्तानां व्यवहरणयोग्या विषयाः वर्णिताः सन्ति। ''न विरुज्झेज्ज केणवि'' इत्यनेन विरोधत्यागस्योपदेशः कृतो मुनिना। एवमेव श्रुतधर्मं तत्त्वज्ञानं चारित्रधर्मं नैतिकतां वा पालयित्वा श्रुतशीलतपोभिः श्रेयस्करमाचरणं कुर्वता जनेन मोक्षावगमो विधीयते। साधुभिः सम्पर्कः साधनायां साहाय्यम् उपस्करोति। विषयभोगैः क्षणं सुखमयोऽन्ते दुःखमय एव भवति दीर्घकालः। ''अणुचिंतिय वियागरे'' इत्यनेन भाषणं सुचिन्तितं स्यादिति काङ्क्षति सूत्रकारः। स्वाध्यायस्य महत्त्वं ''सज्झाएणं नाणावरणिज्जं कम्मं खवेई'' इति सूत्रेण स्पष्टम्। अन्ततः क्षमापनाया महिमानं प्रकाश्य ज्ञानं सदाचारं चाधिगन्तुं कृतोऽस्त्युपदेशः पुनश्च अहिंसां दयां वा धर्मं घुष्यत्याचार्यः। ''एवं खु नाणिणो सारं जं न हिंसइ किंचणं'' इति सूत्रेण समापयति ग्रन्थमयमाचार्यः॥

सूत्रैरेतैः प्रतिपादितमाचरणं कमपि जनं व्रतिनं विधास्यति, व्रतिनमाचार्यं विधास्यति। एकैकस्यापि सूत्रस्य पालनं जीवनं सार्थकं

विधातुमलमस्ति। श्रीमद्विजयजयन्तसेनसूरिमहोदयानां तपश्चर्या, साधनाव्यवहिताबुद्धिः सदाचारपरिपूता प्रवृत्तिरेतेषां सूत्राणां सरलं सहजमभिप्रायं सोदाहरणं प्रस्तूय सर्वजनसुलभमकरोत् महावीरवचसां भावम्। एतादृशैरुपदेशरत्नैरेव लोके जनानां सौविध्यमाचरणव्यवहारा-ऽऽदिविधौ भवत्येव। सर्वेभ्यो धर्मबोधः, मानवेभ्यः स्वाचरणशीलत्वं व्रतादिभिर्जीवनयापनञ्च यथा शक्यते तथा विधातुं अनेन ग्रन्थेन दयालु-राचार्यो भृशं सम्पादितवान्। भगवान् महावीरोऽपि स्वधर्माचार्याणां सदुपदेशगीभिरिव स्वमतान्यद्यापि प्रचारयति प्रसारयति च। सूत्रबद्धा गिरः सम्प्रदायाचार्यप्रवचनवाग्भिरञ्चिताः जनान् पुलकयन्ति सामोदं सुखयन्ति निर्भरं स्वमतं प्रवेशयन्ति जने जने समाजे समाजे अथ च मानवतायाः चरमविकासार्थं डिण्डिमघोषमपि विशदयन्ति येन मानव-जातिः जन्मनो लक्ष्यमधिगत्याचरणैरन्यानपि निदर्शयित्। शास्त्राणां मर्मभेदनं गुरुभिरेव विधीयते। गुरवो ज्ञानाञ्जनशलाकाभिः समागतान् बोधयन्ति तत्त्वं प्रदर्शयन्ति। संकलनमिदं न केवलं भगवतो महावीरस्य वचनभूतमस्ति, अत्र भगवतो वचांसि, आचार्याणां प्रवचनानि, गुरूणां तत्त्वोन्मीलनसूत्राणि, लौकिकानां श्रद्धामेदुरितस्वाध्यायवस्तूनि, साधकानां स्वमतदार्ढ्यं धर्मानुसरणं च वरीवर्ति। सहैवाद्यतनानाम् आचार्यवर्य्याणां श्रीमज्जयन्तसेनसूरीश्वराणां व्याख्यानानि विलसन्ति। परोक्षेऽपि विजयन्ते जयन्तसेनाश्रिताः सज्जनाः सूत्रोपदेशावगमवृत्त्या। स्मारयति च भणितिभङ्गीकौशलम्—

विदुषां वदनाद् वाचः सहसा यान्ति नो बहिः।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव॥

वचोभिरेतैर्मानवनिर्मापणं विधाय जयन्तसेनसूरिभिः न खलु केवलं जैनमतानुयायिनामपितु निखिलमानवजातीयानामपि महानुपकारः

सम्पादित:। मधुपवद् शास्त्रपुष्पेभ्य: पायं पायं मधुरसं भवरोगग्रस्तानां सुस्थतायै योग्यौषधानुपानवद् मधु स्वादु समसृजत् यथा तथैवाग्रेऽपि विदुषां मोदाय बोधराशिमर्पणाय तत्परो भविष्यत्ययाचार्य: त्रिस्तुतिभि: समाजनीय: त्रिस्तुतिकसंघपरमोपदेशक:। एकेन श्रेष्ठोपदेशेन वीरतामापादनाय भुवि बहवो जनास्तत्परा विलोक्यन्ते परन्तु बहुभिरुपदेशैर्महावीरतामधिगत्य सर्वानतिशेते साम्प्रतिकोऽयमाचार्य: स्वगुरुपरम्परयाऽद्याचार्यत्वं वहति। आचार्यस्यास्य धर्मप्रवणा जगति स्थाने स्थाने व्यापृता सेना सदैव धर्मविजय-वैजयन्तीमधिकृत्य मोक्षाचल-शिखरमारूढा स्वयश:पताकां स्थापयिष्यत्येव। कलिप्रभावग्रस्तेऽपि जनसमूहे बहुभिर्विकारैराकुलिते जीवनेऽपि जनानां संतापनिरसनार्थं विदुषामेतादृशां वाच एवावलम्बनं भवन्ति। यावद्वाचो जनमन:सु निष्ठिता जननिवहेषु गुञ्जिता च भविष्यन्ति तावज्जयन्तसेनसूरीश्वराणां तप:-प्रभावोऽपि तान् सर्वानध्यात्माध्वनि नियोजयिष्यत्येव। साधूनामियमेव दुरन्ता साधुता जागर्ति यया लोककल्याणपरम्पराऽद्यापि निरवद्या प्रवहमाणा जनान् भृशमुपकरोत्येव।

विजयादशमी
७.१०.२०००
इन्दौरम्

**डॉ. मिथिलाप्रसाद त्रिपाठी**
पी-एच.डी. (संस्कृत,हिन्दी), डी.लिट् (संस्कृत)
उपाचार्य:
तुलनात्मकभाषा एवं संस्कृति अध्ययनशाला
देवी अहिल्या विश्वविद्यालय:, इन्दौरम्

# सम्पादकीयम्

महत्य एव महतां विभूतयः —इत्युक्त्यनुसारं न खल्वाश्चर्यस्य विषयो यच्छ्रीमदाचार्याणां राष्ट्रसतां विजयजयन्तसूरिवर्य्याणां प्रवचनान्यपि महान्ति सन्ति। तथाप्याचार्यैः वै यत्किमपि व्याख्यातं तत्सर्वमपि किमप्यपूर्वमिव प्रतिभाति सर्वेषाम्।

मयाद्यप्रभृति आचार्यवर्यैः कृतं साहित्यमवलोकितं तेषु "जैनागमसाहित्य : एक अनुशीलन" अथ च "मिला प्रकाश : खिला वसन्त" इत्येतद्द्वयं अन्यतमं विद्यते। अस्मिन् कृतिद्वये आचार्यवर्यैः यादृशा बोधगम्यया भाषया जैनदर्शनमाध्यमेन जनदर्शनस्य विवेचनं विशदयितं जैनागमसाहित्यस्य च या समीक्षोपस्थापिता सा ह्यनायासेनैव हृदि प्रविशति। आचार्यवर्य्याणां प्रत्येकं रचना हृदि धारणीया आस्ते।

मम च आचार्यैः सह परिचयो नूत्न एवास्ति तथापि प्रतीयते यदनेकवारं मया ते दृष्टा पठिताश्च। सहजस्वाभाविकतया कदापि नो प्रतिभाति यदहं आचार्यसमक्षं उपस्थितोऽस्मि अपितु कस्यापि चिरपरिचितस्यानुभूतिरेव जायते।

आचार्यमिश्रैः यदा मयि "महावीर उक्तवानि"त्येतस्य सम्पादनस्य भारः पातितः तदा मयानुभूता काप्यद्वितीया कृपा, यतो हि नाहं एतावानपि योग्योऽस्मि येन सम्पादनकार्येऽस्मिन् समर्थो भवेयम्, परन्तु इदमपि सत्यमेव यत्गुरुकृपातः सर्वमेव सुकरं भवति।

सम्पादनकार्ये मम लाभस्तु सम्पन्न एव जातः यद् मया आदितोऽवसानपर्यन्तं एषा रचना नैकशोऽपलोकिता हृद्गता कृतानुभूता चालोचिता च। अस्यां रचनायां ऋजुकऋजुकेषु सूत्रवाक्येषु यद् भगवता महावीरेण प्रतिपादितं तस्यैव लोकबोधगम्यभाषायां आचार्यवर्य्यैः व्याख्या कृता।

इयं रचना प्रवचनशैल्यां निबद्धास्ति —इति मयानुभूतम्। अनुक्रमेण पठन् कोऽपि जनोऽनुभवं प्राप्तुं शक्नोति यदाचार्यशिरोमणयोऽत्र सम्बोधयन्त आसन्ते। सर्वेषां कृते इयं व्याख्यानमाला मननीया वर्तते। मानवजीवनस्य साफल्यं विधातुमियं भूरिरलम्।

इन्दौरम्
17.10.2000

—वैद्यो गजेन्द्रकुमारो जैनः
व्याख्याता,
शा. अ. आयुर्वेद महाविद्यालयः, इन्दौरम्

# शीर्षक-सूची



०१. अकिञ्चनतानुभूतिः
०२. मा भव गलिताश्वः
०३. नातिभोगिनो निर्ग्रन्थाः
०४. माऽतिवेलं वदेत्
०५. लुब्धोऽदत्तमादत्ते
०६. अदीनभावः
०७. मा हसेयुरमर्यादम्
०८. इच्छाऽप्यनन्ता
०९. अनन्तानन्दः
१०. अनन्यदर्शिता
११. अनाथता
१२. सत्यान्वेषणम्
१३. अनिदानता
१४. अनेकान्तवादी
१५. कर्मफलभोगः
१६. अन्यथा कुतो मुक्तिः ?
१७. दुःखानुभूतिः
१८. स्वमित्रता
१९. कुत्रस्थौ बन्धमोक्षौ
२०. अपराजेयः शत्रुः
२१. अप्रमत्तो भवः
२२. अभयदानम्
२३. अभोगी
२४. शब्दविवेकः
२५. यद्गोप्यं तन्नवाच्यम्
२६. असतोऽनुत्पत्तिः
२७. मूल्याङ्कनम्
२८. असंविभागी
२९. असंवृताः
३०. अभिमानिनः
३१. अज्ञः कः ?
३२. अज्ञानिनां का गतिः ?
३३. आतङ्कदर्शी
३४. आतुरता
३५. आत्मवत्
३६. आत्मविजयः
३७. आत्महितम्
३८. अन्तः शुद्धिः
३९. आयुषो ह्रासः
४०. आस्रवसंवरौ
४१. इच्छानिरोधः
४२. क्षणं जानीयात्
४३. सत्कर्मफलम्
४४. काऽस्ति महत्ता गोत्रस्य?
४५. ब्रह्मचर्यम्
४६. उत्तमशरणम्

४७. कविपरीक्षा
४८. सर्वज्ञः कः ?
४९. वाणी
५०. कर्त्ता भोक्ता च कः ?
५१. हिंसाऽस्ति कर्मभूमिः
५२. अपनेयं कर्मरजः
५३. कर्मबन्धः
५४. कष्टकारणम्
५५. कल्याणकारिणी
५६. कामासक्तिः
५७. दुःखभूमिः का ?
५८. कामकामना
५९. कायोत्सर्गः
६०. वन्दनाकर्दमः
६१. कृताकृते
६२. क्रियारुचिः
६३. न कोपनीयम्
६४. क्रोधनाशोपायः
६५. क्रोधस्त्याज्यः
६६. मितभोजनम्
६७. रक्तं रक्तैर्न क्षाल्यते
६८. गर्भागमनम्
६९. गुणनाशहेतवः
७०. सद्गुणाकांक्षा
७१. गुरुविनयः
७२. पश्यति चक्षुष्मान्
७३. चत्वारः पुत्राः
७४. श्रावकाश्चत्वारः
७५. संयमभेदाः
७६. ज्ञात्वा भाषणम्
७७. देहात्मपार्थक्यम्
७८. शरीरस्य सदुपयोगः
७९. नश्वरत्वम्
८०. अप्रमादः
८१. दातरि कोपो न कार्यः
८२. मिथ्याभाषी लुब्धः
८३. निर्भयता
८४. पूजाभिलाषा
८५. जातिविशेषः
८६. त्यागी
८७. मा त्रासयन्तु
८८. मा लिहन्तु निष्ठीवम्
८९. तृष्णात्यागः
९०. दुःखमविभाज्यम्
९१. दुःखं स्वकृतमेव
९२. दुःखदायकता
९३. दुरुक्तम्
९४. दुर्गतिः
९५. दुर्लभा श्रद्धा
९६. दुष्करत्वम्
९७. दुष्करा तपस्या
९८. कुशीलस्थलवर्जनम्


९९. वित्तं न त्रायते
१००. धनेन किम् ?
१०१. धर्मस्थानम्
१०२. वन्दना
१०३. शुभाजीविका
१०४. आशातनां करोतु मा
१०५. न तृप्तिर्न तुष्टिः
१०६. समता
१०७. कुशलः कः ?
१०८. कस्त्राता ?
१०९. भवभ्रमणम्
११०. मुनेर्मनः
१११. निर्लिप्ताः स्वावलम्बिनः
११२. निवृत्तिः प्रवृत्तिः
११३. अनर्था हिंसा
११४. सत्कर्मफलम्
११५. मा परिहसन्तु
११६. दया कदा ?
११७. मा करोतु पापम्
११८. पापश्रमणः
११९. पापिनः पीड्यन्ते
१२०. पैशुन्यत्यागः
१२१. पूज्यः कः ?
१२२. दत्तादानम्
१२३. अलं प्रमादेन
१२४. प्रमादत्यागः
१२५. प्रेमनिषेधः
१२६. प्राणवधः कीदृशः ?
१२७. शिक्षाधिकारी
१२८. प्रीतिनाशकः
१२९. गुरोराशातना
१३०. प्रशस्यः कः ?
१३१. वावदूकाः
१३२. स्वल्पभाषिणः
१३३. बालप्रज्ञाः
१३४. अपृष्टो न भाषेत
१३५. मध्ये कुतः स्यात् ?
१३६. मध्ये मा वद
१३७. नमन्ति धीमन्तः
१३८. बुद्धिवादः
१३९. जरद्गवाः
१४०. सुदुर्लभा बोधिः
१४१. कथं भाषेत ?
१४२. सत्येश्वरः
१४३. भगवती अहिंसा
१४४. भवतृष्णात्यागः
१४५. त्रुटिशोधनम्
१४६. भोगवियोगः
१४७. मनोविजयः
१४८. मनुष्यभवः
१४९. ममतात्यागः
१५०. संयतो महर्षिः

१५१. मार्गे गृहम्
१५२. मायामृषावाद:
१५३. मित्रं शत्रु:
१५४. मित्रनाशिका
१५५. मुक्त: क: ?
१५६. मुखरतात्याग:
१५७. मूर्खसङ्गति:
१५८. परिग्रह: क: ?
१५९. अमूर्त्तभावा:
१६०. मोहस्य नाशकता
१६१. मृत्योरागमनम्
१६२. मार्दवम्
१६३. मैत्री कार्या
१६४. अहमेकाकी
१६५. अहमन्य:
१६६. मोहग्रस्तता
१६७. निर्वाणम्
१६८. यथावादी तथाकारी
१६९. रसनाया उपर्यङ्कुश:
१७०. रागद्वेषक्षय:
१७१. मोक्षसाधनम्
१७२. लाभालाभौ
१७३. लाभलोभौ
१७४. अलीकोक्ति:
१७५. लोभस्त्याज्य:
१७६. लोभ: सर्वनाशक:
१७७. प्रशस्या वाणी
१७८. वाणी-गुणा:
१७९. भाषितव्यम्
१८०. अवक्तव्या वाक्
१८१. विचार्य वदेयु:
१८२. रुचिभिन्नता
१८३. विद्याचरणे
१८४. विनय:
१८५. विनयनाशक:
१८६. विनीतो भूयात्
१८७. विषयविरक्ति:
१८८. स्त्रीत्याग:
१८९. विरक्त: साधक:
१९०. विज्ञानयुतो धर्म:
१९१. वीर्याभिव्यक्ति:
१९२. वृद्धावस्था
१९३. वेदाध्ययनम्
१९४. वैरत्याग:
१९५. मा कुरु वैरम्
१९६. वैरवृद्धि: परिग्रहे
१९७. शस्त्रमशस्त्रम्
१९८. शुद्धात्मा
१९९. शूरम्मन्या: के ?
२००. शङ्काहीना: भवेयु:
२०१. न वक्तव्यम्
२०२. कुर्वन्तु साधनाम्

२०३. धर्मद्वयम्
२०४. कषायाग्निजलम्
२०५. किं श्रेयः
२०६. सत्यज्ञानम्
२०७. शिक्षायाः सार्थकता
२०८. सत्यस्य आज्ञा
२०९. सत्यनिष्ठा
२१०. सद्गुण-साधना
२११. अमूढः सम्यग्दर्शी
२१२. चारित्रमूलम्
२१३. जागृताः के ?
२१४. निष्पापाः के ?
२१५. सम्बोधिः
२१६. समयं जानन्तु
२१७. समयोचितम्
२१८. विना प्रमादं करोतु कार्यम्
२१९. समताभावः
२२०. सम्यक्त्वम्
२२१. सम्यक्त्वदर्शी न करोति पापं
२२२. दृष्टौ स्थैर्यम्
२२३. मायालोभौ
२२४. सहिष्णुता
२२५. शरीरं कीदृशम् ?
२२६. मानवचक्षुः
२२७. साधूनां प्रसन्नता
२२८. सत्सङ्गः
२२९. निर्भयता
२३०. दुःखदत्वम्
२३१. सुव्रताः
२३२. सूक्ष्मशल्यम्
२३३. अन्तर्बहिर्ज्ञानम्
२३४. विमृश्य वदेत्
२३५. वार्धक्यम्
२३६. न सञ्चिनुयात्
२३७. कर्मक्षयः
२३८. तपस्संयमौ
२३९. सुखी भवति कः ?
२४०. वीतरागता
२४१. समर्थः कः ?
२४२. स्वाध्यायः
२४३. जीवेषु समानत्वम्
२४४. हसन्न वदेत्
२४५. हिंसकाः के ?
२४६. हिंसां न कुर्यात्
२४७. क्षान्तिः कथं जायते ?
२४८. प्रसन्नता
२४९. असन्त्रस्ताः
२५०. ज्ञानसारम्



विश्वपूज्य प्रातःस्मरणीय
परमयोगीन्द्राचार्य प्रभु श्रीमद् विजय राजेन्द्र सूरीश्वरजी महाराज



राष्ट्रसन्त साहित्यमनीषी तीर्थप्रभावक
जैनाचार्यप्रवर श्रीमद् विजय जयन्तसेन सूरीश्वरजी महाराज

# १. अकिञ्चनतानुभूतिः

*''तण्हा हया जस्स न होइ लोहो*
*लोहो हओ जस्स न किंचणाइ ॥''*

*—उत्तराध्ययनसूत्रम् ३२/८*

यः सम्यगवगच्छति यदस्मिञ्जगतीतले स्वीयं वस्तु नास्ति किञ्चित्— यश्चिन्तयति यज्जन्मकाले वयमात्मना साकं किञ्चिदपि वस्तु नैवानीतवन्तः तथैव मृत्युकालेऽपि वयम् आत्मना साकं किञ्चिदपि वस्तु न नेष्यामः— सम्पूर्णं धनं, क्षेत्राणि, विविधवस्तूनि, सर्वाणि भव्यभवनानि चात्रैव स्थास्यन्ति— यो जानाति यदात्मनोतिरिक्तं समस्तं वस्तुजगत् जडं क्षणभङ्गुरञ्चास्ति, स एव ''अकिञ्चन'' इति कथ्यते।

एतादृशो मनुष्यो लोभी भवितुं नार्हति । योऽकिञ्चनः सञ्जातः तस्य मनसो लोभः सर्वथा विनष्टो भवतीत्याशयः।

पुराऽस्मिन्नेव क्रमे चरमतीर्थङ्करा महाश्रमणवर्य्याः प्रभुः श्रीमहावीरस्वामिनः प्ररूपयन्ति स्म यद् यस्मिंल्लोभो न भवति अर्थाद् यो वर्त्तमानायां स्वसम्पत्ता अधिकतरवृद्धेः प्रयासं न चिकीर्षति, तस्य तृष्णा विनश्यति। अन्धीकरोति कृष्णरात्रिसन्निभेयं तृष्णा प्राणिनस्सर्वान्। तस्मादेषा त्याज्या।

इत्थं तृष्णायास्त्यागार्थं नाशार्थं वा यथा लोभहीनता भवत्यनिवार्या तथैव लोभहीनतायाः कृतेऽप्यनिवार्यास्त्यकिञ्चनतानुभूतिः।

# २. मा भव गलिताश्वः

*"मा गलियस्सेव कसं*
*वयणमिच्छे पुणो पुणो ॥"*
*— उत्तराध्ययनसूत्रम् १/१२*

नित्यं कर्त्तुं यानि यानि कर्त्तव्यानि गुरुवर्य्यैः पूर्वनिर्धारितानि सन्ति तेषां सर्वदा स्वात्मप्रेरणया स्वयं सम्पादनादेव सर्वे शिष्याः शोभामाप्नुवन्ति। विवेकिनः सुविनीताः शिष्या एवमाचरन्तो निरन्तरं गुरूणां हृदयदेशेषु सुस्थापिता भवन्ति। क्रमाच्च तत्रोच्चतरं पदं लभन्ते।

एतत्प्रतिकूलं ये शिष्या विवेकविरहिता विनयविहीनाश्च भवन्ति, तेषां कृते दैनन्दिनकार्याणामपि निर्देशः प्रतिदिनं गुरुभिर्दातव्यो भवति। एतादृशाः शिष्याः प्रशंसापात्राणि न भवन्ति स्वगुरूणाम्। खेदयन्ति च तेषां मनांसि।

बाल-बुद्धयस्ते शिष्याः सम्यग्ज्ञानिभिर्गलिताश्वेनोपमीयन्ते। यथा गलिताश्व एकदा प्रतोदितस्सन् किञ्चिद्दूरं गत्वा तत्र तिष्ठति, पुनश्च प्रहृतः किञ्चिच्चलित्वा मार्गे स्थिरो भवति— इत्थं वारं वारं तस्य कृते प्रहारा अनिवार्या भवन्ति। तथैव मूर्खा अविवेकिनोऽविनीताः शिष्या अपि स्वगुरुभिः पुनः पुनः प्रेरिताः स्वकर्त्तव्यमाचरन्ति।

महात्मभिर्महावीरस्वामिभिः प्ररूपितं यत्कोऽपि शिष्योऽत्र गलिताश्वसन्निभो मा भवेत्।

# ३. नातिभोगिनो निर्ग्रन्थाः

*''णाइमत्तपाणभोयणभोई से णिग्गंथे॥''*

*—आचारांगसूत्रम् २/३/१५/४*

सन्ति बहवो जनास्तथा स्वादलोलुपा येऽतिभोजिनो भूत्वाऽऽमन्त्रयन्ति विविधान् रोगान् स्वदेहे। आगतैश्च रोगैश्चिरकाल-पर्यन्तं दुःखान्यनुभवन्ति।

समीचीनमेवोक्तं केनाऽप्यनुभविना सुचिन्तकेनैतद् यद् अस्माभिर्भक्षितस्य भोज्यस्य द्वाभ्यामेव तृतीयांशाभ्यां वयं जीवामस्तथा एकेनावशिष्टेन तृतीयांशेन जीवन्ति वैद्याश्चिकित्सका वा।

सूक्तेनानेन सुस्पष्टं ज्ञायते यत्स्वादमोहवशाद् गृहीतेनानावश्यक-खाद्यपदार्थेन ये रोगाः सञ्जायन्ते तेषां चिकित्सायाः कृते चिकित्सकेभ्यो यच्छुल्कं दीयते तेन तेषामाजीविका चलति।

यदि वयं स्वोदरपरीपूरणार्थमत्यावश्यकं क्षुधानुसारं नियतमेव भोज्यं स्वीकुर्याम तर्हि सदा स्वस्था(नीरोगाः) भवेम। एतदर्थं रसनेन्द्रियविजयाभ्यास आवश्यकः।

येऽपि जगति सन्ति संयताः साधवो निर्ग्रन्थास्तेभ्यस्त्वेतदाशास्यत एव यत्ते परिमितं भोज्यमावश्यकञ्च जलादिकमेवाङ्गीकरिष्यन्ति, स्वादलोभवशादतिमात्रं भोज्यं न ग्रहीष्यन्ति कदाचिदपि।

अत एव ये मुनयो निर्ग्रन्थाः सन्ति तेऽत्र न स्वीचिकीर्षन्ति खाद्यपेयादिकमतिमात्रमिति युक्तमुक्तमस्यां सूक्तौ।

# ४. मातिवेलं वदेत्

*''नाइवेलं वएज्जा ॥''*

— सूत्रकृतांगसूत्रम् १/१४/२५

वेलाशब्दोऽत्र द्वयर्थकः। प्रथमोऽर्थः कालः, द्वितीयोऽर्थो मर्यादा। अत एव सूक्तस्यैतस्यात्र द्वावप्यर्थावुपयुक्तौ।

न वदेच्चिरकालमिति प्रथमोऽर्थः। केचित् पुरुषा भवन्ति स्वभावादेव वावदूकाः। लभेरंश्चेदवसरं ते नक्तन्दिवं भाषमाणा एव तिष्ठेयुः। सच्छिद्रघटोपमास्ते भवन्ति। छिद्रान्विते घटे यथा जलं न भवति स्थिरं तथैव वावदूकस्य मनसि काऽपि वार्त्ता स्थिरतां न लभते। साधुस्तु भवति संयतः। तेन वचनसंयमाभ्यासः कर्त्तव्यः, येन स न्यूनतमसमये स्वल्पसंख्यकशब्देष्वपि स्वीयं हार्दं प्रकाशयितुं सक्षमो भवेत्।

मर्यादा स्यात्— अतिक्रमणं न भवेत्तस्याः (मर्यादायाः) स्वभाषणे —इति द्वितीयोऽर्थोऽप्यत्रोपयुक्तः। कीदृशी मर्यादा ? उच्यते, कस्यापि वक्तुः कथनं न भवति पूर्णं यावत्तावन्न वदेत्, महत्तराणां वार्त्तासु मध्ये न ब्रूयात्, भवच्छब्दस्थाने युष्मच्छब्दं न भाषेत— पापप्रेरकं सावद्यं वचो न कथयेत्, व्याकरणसम्मतवाक्यमेव मुखतो बहिष्कुर्यात्— शुद्धमेव भवेच्छब्दोच्चारणम्।

इत्थमुभयोरप्यर्थयोरतिवेलशब्दः सार्थकः प्रयुक्तोऽस्त्यत्र। स्वीयहृद्गतभावप्रकाशनं संक्षेपतः कथं कुर्यादित्यस्योदाहरणत्वेनैषा सूक्तिरेव स्वयं समर्थाऽस्तीति वक्तुं प्रस्तोतुं पुरस्कर्त्तुं वा शक्यतेऽस्माभिः।

# ५. लुब्धोऽदत्तमादत्ते

*''लोभाविले आययई अदत्तम् ॥''*

— उत्तराध्ययनसूत्रम् ३२/२९

दीयते स्म यत्किञ्चिद्वस्तु तद् दत्तम् । तद्विपरीतं यन्न दत्तम् तद् अदत्तम्। सज्जना: सर्वदा सर्वत्र दत्तमेवाङ्गीकुर्वन्ति वस्तु, न कदापि कुत्रचिद् अदत्तम् ।

अदत्ते वस्तुनि तत्स्वामिन एवाधिकारो भवति, नान्यस्य कस्यचित्। अत एवादत्तादानस्य गणनाऽपराधेषु क्रियते ।

कस्याऽप्यदत्तवस्तुनश्चेदत्यावश्यकताऽनुभूयते तर्हि तस्य स्वामिनमुपगम्य तद् याचनीयम् । यतोऽयाचितस्यादत्तस्य वस्तुनः उत्थापनमादानं वाऽनुचितमनीतिपूर्णञ्चास्ति— कामं स्यात्तद्वस्तु कियदपि मूल्यहीनं स्वल्पमूल्यं वा ।

अदत्तादानमेव व्यवहृतौ चौर्यमित्युच्यते । यथा वयं नेच्छामः कदापि यत्कोऽपिजनः यत्किञ्चिदप्यस्मदीयं वस्तु चोरयेत्— सूचनां विनैवोत्थापयेत्तथैवान्येऽपि जनास्तेषां वस्तूनामन्यैर्जनैः कृतामपहृतिं नेच्छन्ति ।

अतः सौजन्यस्यानुरोधोऽस्ति यत्कोऽपि न कुर्यात् प्रयासं चौर्यस्य। यः करोति कुत्रापि चौर्यप्रयासं तस्य जीवो भवति लोभाविलोऽर्थात् प्रलोभनमनोवृत्तिकलुषितः । यतः समीचीनमेवोक्तं यल्लुब्धोजन एवादत्तमादत्ते ।

# ६. अदीनभावः

*"अदीणमणसो चरे ॥"*

*—उत्तराध्ययनसूत्रम् २/३*

विनयोऽस्ति गुणः, दैन्यं तु दोषः। यो विनयगुणान्वितः, स पुरुषो भवति विवेकसम्पन्नः। ज्ञानाधिकेषु गुरुजनेषु विनम्रतापूर्वकं व्यवहरति स। अनेनैव व्यवहारेण स तेभ्यो ज्ञानमाप्तुमर्हति।

विनीतशिष्यसमक्षं गुरुः सहसा स्वहृदयोद्घाटनं करोति। ज्ञानं लब्ध्वाऽपि मदीयशिष्यो मां प्रति सविनयं व्यवहरिष्यति, यावज्जीवं मदुपकारं स्मरन् कृतज्ञतापूर्वकं मां सेविष्यते, मदीयं यशः सर्वत्र प्रसारयिष्यति— इति विश्वासो गुरोर्मनसि प्रादुर्भवति।

विपरीतमस्माद् दीनस्तु विवेकविहीनः सन् स्वकं सदा तुच्छमवगच्छति। हीनमनोवृत्तिपरिपूर्णस्तादृशः शिष्यः स्वकीयोन्नतेः प्रगतेर्वाऽऽशामेव मुञ्चति। यद्यपि गुरुः सप्रेम तं शास्त्रज्ञानं दातुं यतते तथापि स न शिक्षते। प्रबलतरप्रमादिनस्तस्य जीवनं स्वार्थं परार्थञ्च भवति भारभूतम्।

गुरुकृतां ताडनां तर्जनां चापि स सोढुं न शक्नोति। कुर्वन्नपि वारं वारं त्रुटीर्न लज्जते। "अहमस्मिन् जगति किञ्चिदपि कर्त्तुं न क्षमः।" इत्येव विचारस्तस्य चेतसि पदं धत्ते। अतस्त्याज्यं दैन्यम्।

सुबुधा बोधयन्ति, ज्ञानिनः कथयन्ति— "उन्नतेरभिलाषुकाणां कृतेऽतीवावश्यकोऽस्त्यदीनभावः।"

# ७. मा हसेयुरमर्यादम्

*''णाइवेलं हसे मुणी ॥''*

*—सूत्रकृताङ्गसूत्रम् १/९/२१*

स्मिताननो भवेत्सदा —इति समीचीनमेव कथ्यते सुज्ञैः, यतो हास्यमस्ति सर्वेभ्यो मनुष्येभ्यः स्वास्थ्यवर्द्धकम् । नक्तन्दिवं यः खिन्नस्तिष्ठति, अन्यैः सह वृथा विवादं करोति, प्रतिवेशिभिः साकं प्रतिदिनं कलहं करोति, निर्दोषानपि सदोषान्मत्वा निन्दति, नित्यं दण्डादण्डि, केशाकेशि, मुष्टीमुष्टि करोति, स किं कदापि स्वस्थो भवितुमर्हति ? नैव ।

एतदस्मदीयं जीवनं प्रसादस्य कृतेऽस्ति, न विषादस्य— इति ध्यातव्यम् । अस्माकं प्रयासः सर्वान् मनुष्यान् हासयितुं स्यान्न तु रोदयितुम्। सङ्कटे रुदतो बुद्धिर्भवति कुण्ठिता। कुण्ठिताबुद्धिः सङ्कटसागरात्पारं गन्तुं उपायानपि नोपदिशति ।

विपरीतमस्मात् प्रसन्नचित्ते मनुष्ये बुद्धेर्निवासो भवति । सङ्कटान् पारं कर्त्तु बुद्धिस्तं मनुष्यं विविधोपायानुपदिशति । अतः प्रसन्नचित्तत्वं सर्वेभ्यो मानवेभ्य आवश्यकं मन्यते ।

न केवलं गृहस्थेभ्यः, अपि तु मौनं भजमानेभ्यो मुनिभ्योऽपि प्रसन्नचित्तत्वं प्रशस्यम् । यतो हास्यं नास्ति दूषणम् । तत्तु लक्षणमस्ति मनुष्यस्य । न कमपि पशुं वयं हसन्तं पश्यामः । दूषणं तु गण्यते चिरहासः, परिहासः, अट्टहासो वा । अत एव मुनिभ्यो महावीरस्वामिना स्पष्टमुपदिष्टं यत्ते मा हसेयुरमर्यादम् ।

# ८. इच्छाऽप्यनन्ता

*''इच्छा हु आगाससमा अणंतिया ॥''*

*— उत्तराध्ययनसूत्रम् ९/४८*

वयं दुःखिनः कथम् ?

यतो वयं किञ्चिदिच्छामः।

अस्य कोऽभिप्रायः ?

इच्छा स्वयमस्ति दुःखरूपा।

यावदिच्छा, तावद् दुःखम्।

यस्मिन्निच्छा स एव दुःखी।

कथं भवति जन्मेच्छायाः ?

आत्मन्यभावानुभूतेः।

किं कारणं तस्याः ?

आत्मनो यथार्थस्वरूपस्य ज्ञानाभावः।

आत्मनः स्वरूपः कीदृशः ?

अनन्तानन्दमयः।

यावदात्मनो यथार्थस्वरूपस्य ज्ञानं न जायते, तावत्प्राणिनः सुखगवेषणार्थं बहिर्बहिरेव भ्रमन्तीतस्ततः। रमणीयविषयवस्तूनां शरणं गच्छन्ति, यत्र न भवति सुखं वास्तविकम्, केवलं सुखस्याभासोऽनुभूयते, यतस्तत्राचिरस्थायि सुखं दृश्यते। पुनर्विषयैर्मनसि तृप्तिरपि न जायते। एकस्याः पश्चादपरा, लघुतरायाः पश्चाद् बृहत्तरा इच्छा प्रादुर्भवति, मनसः प्रसादश्चापहरति। अत एवेच्छापूर्तेः प्रयासो विफलो भवति।

उपरि पश्यन्तु ! आकाशः कीदृशः ?

अनन्तः। न तस्यावारं न वा पारम्। तत्तुल्या इच्छाऽप्यनन्ता।

# १. अनन्तानन्दः

*''मा एवं अवमन्नंता*
*अप्पेणं लुंपहा बहुं ॥''*

—सूत्रकृताङ्गसूत्रम् १/३/४/७

हीरकस्य स्थाने प्रस्तरखण्डं कोऽपि यदि उत्थापयति, तर्हि तस्य विषये भवन्तः किं विचारयन्ति ? 'मूर्खोऽज्ञोऽविवेकी सोऽस्ति' इति। सुमार्गस्य स्थाने कुमार्गे चरन्तो मानवा अपि मूर्खा अज्ञा अविवेकिन न सन्ति किम् ? सन्त्येव।

कुमार्गे चरतां जीवानां कृते पञ्चेन्द्रियविषयाणां यदाकर्षणं भवति, सुमार्गे तस्य आशा का ? विषयाणां विषाद् बृहत्तरमन्तरं दृश्यते। किम् तत् ?

उच्यते, विषन्तूपभुक्तमेव हन्ति, किन्तु विषयाः स्मरणमात्रेणैव जीवान् घ्नन्ति। अत एव विषया विषादपि घातकतरा इति वक्तुं शक्यते।

विषयसुखं शीघ्रं लभ्यते, परन्तु क्षणभङ्गुरत्वात्तच्चिरस्थायि न भवति। विपरीतमस्मात् सुचिरस्थायि भवति मोक्षसुखम्, किन्तु तत्कठोरसाधनायाः घोरतपस्यायाः पश्चाल्लभ्यते।

मोक्षधामप्राप्तेः पूर्वमपि तत्रत्यस्यानन्तसुखस्य कल्पनाजन्यं भोगं कुर्वन्तो धीमन्तः तस्यां दिशायामेव शनैः शनैः क्रमशः प्रगतिं विदधति। ते एव सज्जनाः कुमार्गप्रस्थितजनानेवमुपदिशन्ति— ''स्वल्पस्य विषयसुखस्य कृते न मोक्तव्यो मोक्षस्यानन्तानन्दः।''

# १०. अनन्यदर्शिता

*''जे अणण्णदंसी से अणण्णारामे*
*जे अणण्णारामे से अणण्णदंसी ॥''*

*—आचारांगसूत्रम् १/२/६*

आत्मनोऽतिरिक्तं कुत्राप्यन्यत्र यः स्वदृष्टिं न स्थापयति, स एवोच्यते ''अनन्यदृष्टिः'' इति । तादृशो जीवोऽन्यत्र रमणं न कुरुते । तस्य चेतः केवलमात्मनि रमते, नान्यत्र । अत एव स कथ्यते ''अनन्याराम'' इत्यपि ।

परैश्वर्याद् निर्जीवेषु जड़पदार्थेषु यः सुखं न गवेषयति, सोऽनन्यारामो जीवोऽन्यत्र दृष्टिक्षेपं न करोति । तस्माद् अनन्यदृष्टिरथवाऽनन्यदर्शी अस्ति ।

इत्थमनन्यदर्शिनोऽनन्यारामस्य च परिभाषा एतयोर्द्वयोरेकतामभिन्नतां वा स्पष्टं प्रकटयति ।

येन साधकेन आभ्यन्तरसुखस्यास्वादोऽनुभूतः स कदापि बाह्यसुखार्थं न चिन्तयति । कोऽस्ति तादृशोऽल्पमतिर्यो: अमृतबिन्दुकणान् आस्वाद्य दुग्धं कामयते ?

परन्त्वाभ्यन्तरसुखं सर्वेभ्यो जनेभ्यो नास्ति सुलभम् । तस्य लाभार्थमन्तर्मुखत्वमतीवावश्यकम् । यदि ह्यनन्यारामता अस्मदीयं लक्ष्यमस्ति तर्हि प्रथमं सर्वैरनन्यदर्शिता स्वीकर्त्तव्या (उपादेया) अस्ति। सर्वेषामेव जनानां कृते मनसाङ्गीकर्त्तव्याऽस्ति अनन्यदर्शिता ।

# ११. अनाथता

*"अप्पणा अणाहो सन्तो*
*कहं णाहो भविस्ससि ?"*

—उत्तराध्ययनसूत्रम् २०/१२

यदि कोऽपि स्वमनस्येवं मनुते यदहं कस्यचित्पालकोऽस्मि, रक्षकोऽस्मि, नाथोऽस्मीति, तर्हि तस्यैषा भ्रान्तिरेवास्ति। कथम्?

उच्यते, अस्मिन् सुविशाले जगति कोऽपि प्राणी कस्याऽप्यन्य-प्राणिनो रक्षणं तक्षणं वा कर्त्तुं न समर्थः; यतः सर्वे प्राणिनः स्वपूर्वभवेषूपार्जितैरेव शुभाशुभकर्मभिर्नियन्त्रिता भवन्ति। तानि कर्माण्येव कुर्वन्ति तेषां रक्षणं तक्षणं भक्षणं वा, नान्यः कश्चित्।

पुनश्चिन्तनीयम्, यः प्राणी स्वयमेव कारागारे लौह शृङ्खलाभि-र्निगडितोऽस्ति स कथमन्यांस्तत्र निगडितान् जनान् बन्धनमुक्तान् कर्त्तुमर्हेत् ? यः स्वयं क्षुधातुरः,स कथमन्यजनान् भोजयेत् ? कर्मभिर्बद्धो यः प्राणी स्वयं संसारचक्रे परिभ्रमति, स कथमपरेभ्यो मुक्तिं दद्यात् ? यः स्वयमरक्षितः शरणार्थी वाऽस्ति स कथमितरान् रक्षेत् ?

शुभाशुभकर्मभिर्बद्धस्सांसारिकः प्रत्येकजीव आधिव्याध्युपाधि-जलधिमग्नत्वाद् विषण्णः कदाऽप्यन्येषु जनेषु प्रसन्नतायाः सञ्चारं कर्त्तुं न शक्नोति— इति निश्चितम्।

अतस्समीचीनमेवोच्यते मनीषिभिर्यत्परेषां नाथस्स भवितुं नार्हति यस्यजीवनेऽभिद्रुताऽनाथता।

# १२. सत्यान्वेषणम्

*"अप्पणा सच्चमेसेज्जा ॥"*

*—उत्तराध्ययनसूत्रम् ६/२*

उच्यते— "मुण्डे मुण्डे मतिर्भिन्ना तुण्डे तुण्डे नवं वचः ॥"

अस्य सुभाषितस्य तात्पर्य्यार्थ एषोऽस्ति यज्जने जने बुद्धि र्भिन्ना भवति। प्रत्येकमानवः पृथक् पृथक् चिन्तनं करोति। स्वीयं विचारं च सत्यं मनुते सः।

सर्वेषां मनीषिणां विचारान् क्रमशो वयमाकर्णयामः। एकदा कस्यचिदेकस्य विचारो रोचतेऽस्मभ्यमन्यदा चान्यस्य। अस्यां स्थितौ सत्यस्य निर्णयं कथं कुर्याम ? इति जटिलो प्रश्न मानसे उद्भवति।

भगवता महाश्रमणेन महावीरेणैतस्य जटिलतरस्य प्रश्नस्योत्तरमुपरिलिखितसूक्तस्य माध्यमेन सम्यग्दत्तम्। स्वयमेव सत्यान्वेषणं कुर्यादिति।

वक्तारः के ? किं किं च कथयन्ति ते ? कस्य विरचिते शास्त्रे किं लिखितमस्ति ? इति विचारं विना स्वयं सत्यस्य गवेषणा कार्या। किञ्चिदपि न चिन्तयित्वा परेषां वचनेषु विश्वसन्तोऽन्धश्रद्धावन्तो जना अवश्यं वञ्चिता भविष्यन्ति। त्याज्योऽन्धविश्वासः। उपादेयो विवेकः। यतो हि यत्किञ्चिदपि न तत् पीतं सर्वं स्वर्णं भवति। पित्तलस्यापि तत्र सम्भावनाऽस्ति।

अतः समीचीनमेवोक्तं यत्स्वानुभवपूर्णचिन्तनेन कार्यं सत्यान्वेषणम्।

# १३. अनिदानता

*''सव्वत्थ भगवया अनियाणया पसत्था।''*

*— स्थानांगसूत्रम् ६/१*

विशुद्धकार्यस्य मूलं निःस्वार्थत्वम्। यस्मिन् कार्ये यावत्स्वार्थित्वं तस्मिन् कार्ये तावदशुद्धत्वम्। स्वार्थबुद्धिः कलुषयति कार्यम्। फलाप्तिस्तु भवितैव, किन्तु फलाशां मनसि कृत्वा कार्यं न करणीयम्। बुधा एवं बोधयन्ति।

एष बोधः कथं दीयते ? यतः कर्मणां फलं यदा-कदा चिरकालाल्लभ्यते, कदाचित्त्वपरलोकगमनानन्तरं लभ्यते। इत्थं यदा जनैः स्वकृतशुभकर्मणां फलं शीघ्रमथवाऽस्मिन्नेव भवे न प्राप्यते तदा निराशाभिभूतास्ते कर्त्तव्यविमुखा भवन्ति। विपरीतमस्मात् फलाकांक्षारहिता निष्कामा जनाः स्वकर्त्तव्ये संलग्ना दृष्यते।

पुनश्च धनदानेन पुण्यं संजायते यशोऽपि। अस्यां स्थितौ दातुर्दृष्टिर्यदि यशसि भवेत् तर्हि यत्र यत्राधिकयशसः प्राप्तेराशा स्यात्तत्र तत्रैव स धनं दद्यात् भवतु नाम तत्रोपकारः स्वल्पोऽपि कथं न स्यात्।

इत्थं फलकामना कार्यदिशायाः परिवर्त्तनं कृत्वा कार्यस्य विफलतामातनोति।

अत एव सूत्रकाराः सूक्तेनानेन प्रकटयन्ति यत् सर्वत्र (सर्वेषु कार्येषु) भगवता महावीरेणं 'अनिदानतां' (निष्कामता) प्रशस्ताऽस्ति।

# १४. अनेकान्तवादी

*''विभज्जवायं च वियागरेज्जा ॥''*

— सूत्रकृतांगसूत्रम् १/१४/२२

''स्याद्वादः'' जैनदर्शनस्यैकः प्रमुखसिद्धान्तोऽस्ति। ''स्याद्'' इति शब्दस्यार्थः— अपेक्षा; अतः ''सापेक्षवादः'' इत्यप्यस्यापरं नाम। अत्र कस्याप्येकस्या मान्यताया एकातेन आग्रहो न भवति; अत एनम् 'अनेकान्त' इत्यपि कथयन्ति। सिद्धान्तस्यास्य यः समर्थकः सः ''अनेकान्तवादी'' इत्युच्यते। स दुराग्रही न भवति।

अनेकान्तवादी मनुते यदेकस्मिन् वस्तुनि अनेके गुणधर्मा विराजन्ते। अपेक्षाभेदेन तेषां दर्शनं भवति। स सम्यग्जानाति यद् द्रव्यदृष्ट्या नित्यं वस्तु पर्यायदृष्ट्या अनित्यमपि भवति। मुकुटं त्रोटयित्वा हारः कारितः। पुनस्तं हारं त्रोटयित्वा कङ्कणं कारितम्। अत्र मुकुटहार-रूपाभ्यामनित्यं भूत्वाऽपि स्वर्णरूपेण वस्तु नित्यमस्ति। क्षुधातुराय यद्भोज्यं वस्तु रोचकं तदेव रुग्णाय सर्वथाऽरोचकं भवति। जलेन यत्पात्रं अर्धं पूर्णम्, तदेव अर्धं रिक्तमप्यस्ति। इत्थमेकस्मिन्नेव पात्रे पूर्णत्वं रिक्तत्वञ्चेति परस्परविरुद्धौ धर्मौ समकाल एव वसतः।

एकान्तवादी स्वमान्यताया दुराग्रही भवति। अनेकान्तवादी सत्याग्रही भवति। एकान्तवादी ''एव'' शब्दस्य प्रयोगं करोति, किन्तु अनेकान्तवादी''अपि''शब्दस्य। सत्यान्वेषणे समर्थो भवत्यनेकान्तवादी।

# १५. कर्मफलभोगः

*''अन्ने हरन्ति तं वित्तं*
*कम्मी कम्मेहिं किच्चती॥''*

—*सूत्रकृतांगसूत्रम्* १/९/४

यदा कोऽपि जनः कस्यचिद् धनं चोरयति तदा तस्य चेतस एष ध्वनिर्निस्सरति— ''मा कुरु,मा कुरु;एतदस्ति गर्हितं कर्म, सज्जनो न करोति कदाप्येतादृक् कुत्सितम् अशोभनं कार्यम्।'' किन्तु न शृणोति प्रलोभन-प्रेरितो मनुष्य एतमन्तर्ध्वनिम्।

अन्यपापानां विषयेऽपि कथयितुं शक्यते एतत्। पापकर्मभिः कलुषीकृतेनाप्यात्मना यद्धनस्योपार्जनं भवति तस्य भोगं कुर्वन्ति कुटुम्बिजना अन्ये। पापात्मा स्वयं सर्वस्य स्वोपार्जितधनस्योपभोगं कर्त्तुं नार्हति। स स्वधनस्य केवलं भवति संरक्षकः। रक्षणमपि स सर्वथा कर्त्तुं न प्रभवति।

यतस्तस्य धनं कुटुम्बिनः, वयस्याः, उत्कोचाकांक्षिणोऽधिकारिणाः, चौराः, धूर्त्ताः, वञ्चकाश्च भोक्तुमपहर्तुं वा सन्नद्धाः प्रयासरताश्च भवन्तीति जानन्ति सर्वे। स तु केवलं धनसञ्चयार्थमुपार्जितपापकर्मणां कुफलं दुःखमेवानुभवति। एषा मूर्खताऽस्ति। विवेकिनो जनास्तु परिश्रमेण प्रामाणिकतया च जीवननिर्वाहार्थमावश्यकं धनमर्जयन्ति। तेनैव सन्तुष्यन्ति च।

# १६. अन्यथा कुतो मुक्तिः ?

*"कडाण कम्माण न अत्थि मोक्खो ॥"*

उत्तराध्ययनसूत्रम् ४/३

दीपकस्य ज्योतिष उपरि कश्चित्पुरुषो यदि स्वहस्ताङ्गुलिं स्थापयति, तर्हि किं भवेत् ? उच्यते, चर्मणि उष्णतानुभूतिर्भवेत् । दाहानुभवेऽङ्गुलिस्ततो निवार्येत चेत्कामं न ज्वलेत्सा, तथापि कतिपयदिवसपर्यन्तं दाहस्थले वेदना तु स्थास्यत्येव ।

कर्मणां विषयेऽपि कथयितुमेतत्पार्यते। कर्त्तुरात्मा कृतकर्मभिर्बद्धः सञ्जायते। कृताशुभकर्मणां यथा बन्धनं भवति तथैव कृतशुभकर्मणामपि। भवतु नाम शृङ्खला लौहस्य स्वर्णस्य वा बाधिष्यत एव प्राणिनो गतिम्।

कारावासे शृंङ्खलानिगडितो मनुष्यो निर्धारितावधिपर्यन्तं तत्र वेदनां भुक्त्वैव तस्मान्मुक्तो भवति। तथैव शुभाशुभकर्मबद्धो जीवोऽपि पूर्वतो निर्धारितावधिपर्यन्तं अनुकूलां प्रतिकूलां वा वेदनां (सुखं दुःखं वा) भुक्त्वैव संसारकारावासतो मुक्तो भवति ।

स्वकृतदुष्कर्मजन्यां वेदनां भुञ्जानं महात्मानं महावीरं यदा शक्रो निवेदितवान्—"किमहं अज्ञजनकृतोपसर्गेभ्यो रक्षणं करवाणि—भवताम्।

तदा महावीरेणैषा सिंहगर्जना कृता— "कडाण कम्माण न अत्थि मोक्खो ।" यावत्फलं न भुज्यते तावत्कृतकर्मभ्यो मोक्षो न भवेत्; अतो भवतां सहायतां न अपेक्षे । अनेन सिद्ध्यति यत् कर्मफलभुक्तिं विना नास्ति मुक्तिः ।

# १७. दु:खानुभूति:

*''एगो सयं पच्चणुहोइ दुक्खं ॥''*

सूत्रकृतांगसूत्रम् १/५/२/२२

प्रतिकूलां वेदनां दु:खमिति वदन्ति जगति पण्डिता: । किमस्ति दु:खं तत् ? उच्यते, निजकृतकुकर्मणां कुफलमस्ति तत्। सर्वै: प्राणिभि: कर्मफलमवश्यं भुज्यते । न कोऽपि तस्यापवाद:।

स्वकर्मफलं स्वयमेव भुनक्ति प्राणी । नान्य: कश्चिदस्मिन् सहभागी भवितुमर्हति — इत्यस्या: सूक्तेर्हार्दम्। काममस्तु कोऽपि प्रगाढो वयस्य: कुटुम्बी वा, दु:ख स्यावसरे स सहानुभूतिं प्रकटयेत्, सेवां सहायतां वा कुर्यात्, किन्तु, दु:खं नापहरेत्, न भुञ्ज्यात् । तस्य कृतेन प्रयासेन नूनं दु:खावेगो न्यून: स्यात्; किन्तु वेदनां तु कर्मकर्त्ता प्राणी एव भुनक्ति ।

अन्यकृता सेवा सहायता वाऽपि सम्भवाऽस्मिन्नेव भवे, परभवे तु तादृशं सहायकमपि न लप्स्यामहे । एकाकिनो वयमेव तत्र स्वकर्मफलं भोक्ष्याम:। आजीवनं यानि यानि शुभाशुभकर्माणि क्रियन्ते तैरस्माकम् आत्मा श्लिष्यते लिप्यते वा । तत: परस्मिन् जन्मन्यात्मना तत्फलानि भुज्यन्ते ।

अत: पापकर्मभिरात्मा रक्षणीय: । अस्य तात्पर्य्यमेतदस्ति यद् दु:खदायकानि पापानि न करोतु कोऽपि । सन्देशोऽयं सदा सर्वै: स्मरणीयो यत्पापिभिरेवात्र क्रियते दु:खानुभूति: ।

# १८. स्वमित्रता

*''पुरिसा ! तुममेव तुमं मित्तं*
*किं बहिया मित्तमिच्छसि ।''*

*— आचारांगसूत्रम् १/३/३*

केनचिद् विचारकेण कथितम् यत् प्रभुरपि तस्यैव साहाय्यं करोति, यः स्वयम् आत्मनः साहाय्यं करोति । अस्य अयमाशयो यत्परेषां सहायताया आशां विहाय स्वयमेव स्वकर्त्तव्यपालनं कर्त्तव्यम्।

यः साधकः स्वकर्त्तव्यपथे प्रचलितः, स परेषां सहायतायाः किञ्चिदपि चिन्तां न करोति । सर्वेषां सत्त्वानां कृते स्वमनसि मित्रतां स्थापयन्नपि स एतादृशं विचारं न करोति यदन्यः कस्कः तेन सह मैत्रीं करोति इति ।

मित्रैः साकं मित्रताया व्यवहारस्तु वस्तुतो व्यापारः; यतः यैरस्मभ्यं सहायता क्रियते, तेषामेव सहायतां वयमपि कुर्मः। इत्थं परकृतसहायतामवलोक्य कृता सहायता तु विनिमयव्यवहृतिर्गण्यते।

वास्तविकः साधको न भवत्येतादृशो व्यापारी । विनिमयविचारं विहाय स सर्वत्र यथाशक्ति भास्करवत्, चन्द्रवत्, पयोदवत्, वृक्षवत् सर्वेषां सहायतां करोति, कारयति, अनुमोदयति; परन्तु एतस्याः परिवर्त्तने परकृतां सहायतां न अपेक्षते; यतः स्वकमेव मनुते स्वकीयं मित्रं सः; अन्यानि बहिर्मित्राणि नेच्छति कदापि ।

# १९. कुत्रस्थौ बन्धमोक्षौ

*"बन्धप्पमोक्खो अज्झत्थेव ॥"*

*— आचारांगसूत्रम् १/५/२*

बन्धमोक्षयोर्विचार आन्तरिकस्थितिषु निर्भरो भवति, न बाह्यस्थितिषु । समीचीनमेव कथ्यते एतत्—

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥

मनसा बन्धस्तेनैव च मोक्षः सम्भवति । पुरा निरन्तरं नवतिवर्षपर्यन्तं प्रचलिते स्वतन्त्रतायाः सङ्ग्रामस्य आन्दोलने आंग्लदेशीयैः शासकम्मन्यैराततायिभि ये देशभक्ता नेतारः कारावासे स्थापिताः किं नु खलु ते सत्यमेव बद्धा आसन् ? तथा कारावासतो बहिस्स्थिता उच्चपदारूढा भृत्याः किं सत्यमेव स्वतन्त्रा आसन् ? विचार्य वदन्तु यत्किम् पञ्जरबद्धः सिंहः स्वतन्त्रोऽस्ति अथवा पञ्जरबहिस्स्थितो गर्दभः ।

अनयोरुदाहरणयोराशयः स्पष्टं ज्ञायते यत्प्रतिकूलासु परिस्थितिष्वपि यस्य मनसि स्वतन्त्रता-भावो विराजते स एव वस्तुतः स्वतन्त्रः तथा चानुकूलासु परिस्थितिषु सतीष्वपि यस्यान्तस्तले पारतन्त्र्यभावो गौरवहीनताभावश्च वर्तेते स एव वस्तुतः परतन्त्रोऽस्ति।

स्वातन्त्र्यं पारतन्त्र्यञ्च बन्धो मोक्षश्चैतौ युग्मौ मनसोऽवस्था-विशेषौ स्तः। एनयोर्दर्शनं करणीयमस्ति चेद् द्रष्टव्यमात्मनि, न बहिरित्युपदिशति सूक्तिरियम् ।

# २०. अपराजेयः शत्रुः

*''एगप्पा अजिए सत्तू ॥''*

*—उत्तराध्ययनसूत्रम् २३/३८*

कोऽस्ति स्वकीयः शत्रुः ?

यं वयं शत्रुं मनुमहे !

वरम्, किन्तु यदि वयं कमपि शत्रुं न मनुमहे तर्हि किं स्यात् ?

तर्हि सर्वान् प्रति अस्माकं मित्रता स्यात् । अस्य तात्पर्य्यमेतदस्ति यदस्मिन् जगति वस्तुतः कस्यापि न कश्चिच्छत्रुर्न मित्रम् वाऽस्ति । अस्मदीयसद्भावजन्या मित्रकल्पना भवति दुर्भावजन्या च शत्रुकल्पना।

अनुकूलस्थितिमूला सद्भावना प्रतिकूलस्थितिमूला च दुर्भावना। विवेकिनः प्रतिकूलां स्थितिमपि अनुकूलां मत्वा सन्तुष्यन्ति। विपरीतमस्मादविवेकिनोऽनुकूलामपि स्थितिं प्रतिकूलां मत्वा सीदन्ति। अविवेकमूलकं यथा भवति दुःखं तथैव विवेकमूलकं सुखम् ।

अत्रोदाहरणमेकं प्रस्तूयते ।

कुर्वन्तु कल्पनां— द्वौ पुरुषौ दूरस्थितौ मिथः कमपि वार्त्तालापं कुरुतः । तावस्मान् निन्दतः —इति मत्वा वयं विषण्णाः भवितुमर्हामः अथवा तावस्मान् प्रशंसतः —इति मत्वा वयं प्रसन्ना अपि भवितुमर्हामः।

इत्थं तयोः मित्रशत्रुकल्पना केवलम् अस्मच्चेतसि निर्भरा । वस्तुतोऽस्मच्चेतोऽथवा अस्मदीयोऽसंयतात्मा एवैकोऽपराजेयः शत्रुर्नाऽन्यः ।

# २१. अप्रमत्तो भव

*''सव्वओ पमत्तस्स भयं*
*सव्वओ अप्पमत्तस्स नत्थि भयं ॥''*

*— आचारांगसूत्रम् १/३/४*

कोऽत्रबिभेति ?

यो नियमान् भनक्ति, चौर्यं आचरति, विविधापराधान् विदधाति, स एव सर्वतो बिभेति, भयात्कम्पमानस्तिष्ठति ।

विपरीतमस्माद् यो नियमान् पालयति, प्रामाणिकतया व्यवहरति, दोषान् न विदधाति, प्रतिपदं सावधानः तिष्ठति यत्तस्य आचरणे कापि त्रुटिर्न स्यात्, स सर्वत्र निर्भयस्तिष्ठति। अकुतोभयस्तादृशः पुरुषो एवास्माकमादर्शः, नान्यः।

अनयोः प्रथमोदाहृतः पुरुषः प्रमत्तो द्वितीयश्चास्त्यप्रमत्तः । प्रमादवशात् प्रथमोऽस्ति भयाकुलो दुःखी च । तस्य जीवनं न भवत्यनुकरणीयः । अत्र द्वितीयोदाहृतः पुरुषोऽप्रमत्तो निश्चिन्तो निर्भीकः सुखी शान्तश्चास्ति । तस्य जीवनमनुकरणीयमस्ति सर्वेभ्योऽपि मानवेभ्यः।

साम्प्रतम् चिन्वन्तु प्रमत्ताप्रमत्तयोरनयोः पुरुषयोः कः श्रेष्ठतरः? को भवद्भ्यो रोचतेतराम् ? अप्रमत्तं पुरुषं श्रेष्ठतरं मन्वानेभ्यो भवद्भ्यस्तस्यैव जीवनं रोचिष्यते, नेतरस्येति निश्चितम् । ज्ञानिनां महात्मनां मनस्स्वप्येषैव शुभाकांक्षा विराजते यत्सर्वेऽपि साधका अत्र अप्रमत्ता भवन्तु ।

# २२. अभयदानम्

*''दाणाण सेट्ठं अभयप्पयाणं ॥''*

*—सूत्रकृताङ्गसूत्रम् १/६/२३*

दीयते इति दानम् । आवश्यकतायाः पूर्तेः कृते नाना वस्तुनि अन्येभ्योऽस्माभिर्दीयन्ते; अतो दानान्यपि विविधानि भवन्ति । तथाहि अन्नदानं, जलदानं, वस्त्रदानं, शयनदानं, आसनदानं, धनदानं, आश्रयदानं, भूदानं, गोदानं, श्रमदानमित्यादीनि सन्ति प्रमुखदानानि।

किन्तु समस्तवस्तुषु आवश्यकतमं तत्त्वमस्ति जीवनम् । प्रभुणा श्रीमहावीरेण कथितमासीत् —

''सव्वे जीवाऽवि इच्छन्ति
जीविउं न मरिज्झिउं ॥''

सर्वेऽपि जीवा जीवितुं वाञ्छन्ति, न मर्त्तुम् । जले मज्जन्, वह्नौ ज्वलन्, आततायिनां प्राणान्तकप्रहारैः प्रहृतः सन् कम्पमानः सर्वप्रथमं जीवनमिच्छति । भीताय शरणदानं मरणासन्नाय च प्राणदानं सर्वोत्तमं दानं गण्यते ।

पाकिस्तानीयशासकैः कृतैः प्रहारैः व्याकुलीभूय पलायितेभ्यो बंगदेशतो विस्थापितेभ्यः कोटिसंख्यकेभ्यः शरणार्थिभ्यः स्त्रीपुरुषेभ्यो भारतदेशः शरणदानं कृतवानिति सुविख्यातम् । शरणं प्राप्य शरणार्थिनो निर्भया भवन्ति । अतएव तद् अभयदानम्'' इति कथ्यते, सर्वोत्कृष्टं च मन्यते ।

# २३. अभोगी

*''भोगी भमइ संसारे*
*अभोगी विप्पमुच्चइ ॥*

*—उत्तराध्ययनसूत्रम् २५/४१*

इन्द्रियाणां यो वशवर्ती भवति स सदा विषयभोगसामग्रीमेकत्रीकर्तुं प्रयतते। अनुकूलां सामग्रीं प्राप्य प्रहृष्टः स कदाप्येकां कदाप्यन्यां स्वीयेन्द्रियपिपासां शाम्यति।

विविधविषयभोगनिरतान्यपीन्द्रियाणि वस्तुतो न तृप्यन्ति। इन्द्रियेषु गुप्तं, विषयान् प्रति इन्द्रियाणां प्रेरकं मन एव तृप्तिमनुभवति। अनुभूताऽपि तृप्तिः क्षणिका भवति, न चिरं तिष्ठति।

परन्त्वतीवाश्चर्यस्यास्ति वार्त्तेयं यन्मनसः क्षणिकायास्तृप्तेः कृते भोगी भूत्वा जीवो रसयन्त्रस्य बलीवर्द्दवत् (कोल्हू के बैल की तरह) चतुरशीतिलक्षयोनिषु परिभ्रमति। यथोच्यते —

पुनरपि जननं पुनरपि मरणम् ,
पुनरपि जननीजठरे शयनम् ॥

अस्मिन्नतिदुर्गमे जन्मजरामरणे चक्रे पतितो जीवो यदाऽभोगी, भोगत्यागी, भोगेष्वनासक्तः, विरक्तो भवति तदैवास्मात्संसारात् प्रमुच्यते सुखञ्च लभते। यथोक्तं केनचित्सुकविना —

सर्वपरिगह्रभोगत्यागः कस्य सुखं न करोति विरागः ?

सुखप्रदो विरागस्सदा तिष्ठत्यभोगिनो जीवने; यतोऽत्र सर्वत्र दरीदृश्यते भीमे भवे भ्रमणशीलो भोगी, न कदाप्यभोगी।

# २४. शब्दविवेकः

*''तुम तुमंति अमणुन्नं*
*सव्वसो तं न वत्तए॥''*

—सूत्रकृतांगसूत्रम् १/९/२७

अम्बामीश्वरञ्च 'त्वम्' इत्युच्यते। अन्यान् सर्वान् प्रति 'भवत्' इति सर्वनाम प्रयोक्तव्यम्। एतत्सर्वनाम सम्मानसूचकमस्ति। पत्राचारे वार्त्तालापे च 'भवत्' इति शब्दस्य प्रयोगः कर्त्तव्यः। अन्यान् प्रति 'भवत्' इति शब्दस्य प्रयोगं वयं करिष्यामश्चेत् सम्मानार्थमन्येऽपि अस्मान् प्रति एतस्य शब्दस्य प्रयोगं करिष्यन्ति।

यत्रापि 'भवत्' शब्दः प्रयोक्तव्यस्तत्र 'त्वम्' अथवा 'यूयम्' इति शब्दस्य प्रयोगोऽनुचितोऽमनोज्ञो वा प्रतीयते। अन्येषां मुखैर्निर्गतं 'त्वम्' इति पदं श्रुत्वा श्रोतारो मनसि खिद्यन्ते। वक्तॄन् तेऽहंकारिणो मन्यन्ते। अहङ्कारिणां मनुष्याणां वक्तव्यानि कोऽपि रुचिपूर्वकं न शृणोति।

'त्वम्' 'यूयम्' चैतो द्वावपि शब्दौ स्वस्य अभिमानवृत्तेरन्यान् प्रति तुच्छताभावस्य च द्योतकौ स्तः।

ये स्वयं तुच्छा भवन्ति ते एवान्यान् मानवान् तुच्छानवगच्छन्ति। सत्पुरुषा न भवन्ति एतादृशाः। सन्नार्योऽपि न भवन्ति एतादृश्यः। सत्पुरुषा सन्नार्यश्च सर्वदा अपरेभ्य मानवेभ्यो एवमेव शिक्षयन्ति यत्— ''त्वम् यूयम् इति अमनोज्ञौ शब्दौ कदापि न प्रयोक्तव्यौ पत्रव्यवहारेषु वार्त्तालापेषु वा।''

# २५. यद्गोप्यं तन्न वाच्यम्

*''जं छन्नं तं न वत्तव्वं ॥''*

*— सूत्रकृताङ्गसूत्रम् १/९/२६*

यद् गोप्यमस्ति तद् गोपनीयम् । प्राप्ते सुयोग्येऽवसरे एव तस्य प्रकाशनमुचितम् । अनवसरे रहस्यस्य प्रकाशनाद् अनर्थै: सम्भाव्यन्ते।

ये जना अतीव भाषमाणा: तिष्ठन्ति तेऽत्र कथ्यते वावदूका: । वावदूकानां मुखेभ्यो समये अपि रहस्यानि प्रकटीभवन्ति; अत: कदापि तान् प्रति न प्रकटनीयानि न कथनीयानि तानि ।

''फलानुमेया: प्रारम्भा:'' इति महाकविकालिदासस्योक्ति: समीचीनैव प्रतिभाति । सिद्धे: पूर्वं सज्जना: स्वसाधनानां विज्ञापनं न कुर्वन्ति । सिद्धिमवलोक्य सर्वै: सरलतया साधनानामनुमानं कर्त्तुं शक्यते। सज्जना: किं कुर्वन्ति, किं वा करिष्यन्ति— इति न केनापि ज्ञातुं शक्यते। तै: किं कृतमित्येव लोका ज्ञातुमर्हन्ति ।

कार्यकरणात्पूर्वमेव श्रेय: प्राप्तुकामा: पुरुषा आत्मश्लाघां कुर्वन्तो न लज्जन्ते । न भवन्ति सज्जनास्तादृशा: ।

''षटकर्णो भिद्यते मन्त्र:'' इति सुप्रसिद्धसूक्तेरिदमस्ति तात्पर्य्यम् यत् त्रयाणां जनानां कर्णेषु गता वार्त्ता प्रकटिता भवति । प्रकटितायां तस्यां विविधा बाधा: सञ्जायन्ते । अत: कार्यसिद्धिकामुकैर्यद् गोप्यं तन्न कदापि वाच्यम् ।

# २६. असतीऽनुत्पत्तिः

*''णो य उप्पज्जए असं ॥''*

— सूत्रकृतांगसूत्रम् १/१/१/१६

यस्य सत्ता विद्यते तत् 'सद्' इत्युच्यते। विपरीतमस्माद् यस्य सत्ता (अस्तित्वम्) न विद्यते तद् 'असत्' कथ्यते।

सतः कदाप्युत्पत्तिर्न भवति, अन्यथा उत्पत्तेः पूर्वं तद् असद् अविद्यमानं वा इति वक्तुं विवशाः स्याम; किन्तु सर्वथा असम्भवं तद्; यतः यद् असत्' तत्कदापि 'सद्' न भवितुमर्हति। 'असद्' गर्दभविषाणं न केनापि दृश्यते —इति सुस्पष्टम्।

एवमेव यद् 'असद्' अस्ति, तस्योत्पत्तिर्न भवति। यत उत्पत्तौ असत् 'सद्' भविष्यति। एतदसम्भवम्। अतो यद् 'असद्' अस्ति तत्सदा 'असद्' एव स्थास्यति। तत् कदापि 'सद्' रूपेण न परिणमिष्यति।

यथैतद् ध्रुवसत्यमस्ति यद् असतः 'सद्' न भवति, तथैवैतद् अपि ध्रुवसत्यमस्ति यत् सतः 'असद्' न भवति।

गीतायामपि महर्षिणा व्यासेनोद्घोषितमस्ति —

नासतो विद्यते भावो, नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥— अध्याय २/१६

दार्शनिकसिद्धान्तस्यास्यायमस्ति निष्कर्षो यज्जीवोऽजीवो न भवति, अजीवश्चापि जीवो न भवति। जीवाजीवयोः संयोगवियोगौ भवतः, न तूत्पत्तिविनाशौ।

# २७. मूल्याङ्कनम्

*''राढामणी वेरुलियप्पगासे*
*अमहग्घए होई हु जाणएसु ॥''*

*—उत्तराध्ययनसूत्रम् २०/४२*

कृत्रिमं मौक्तिकं प्राकृतिकमौक्तिकाद् द्युतिमत्तरं भवति; किन्तु मूल्यं तस्य न कदापि प्राकृतमौक्तिकमूल्यतुल्यं भवति। विशेषज्ञास्तयो-रुभयोरन्तरमवगच्छन्ति सम्यक्।

एवमेव विषयभोगादपि सुखं लभ्यते अथ च आत्मरमणादपि; किन्तु द्वयोरप्येतयोः सुखयोः कियदन्तरमस्ति। एकस्मात् क्षणिकं सुखं लभ्यते, अन्यस्माच्छाश्वतम्। अध्यात्मविद्याविशेषज्ञा उभयोरप्येतयोः सुखयोरन्तरमवगम्य केवलं शाश्वतसुखलाभाय यतन्ते।

क्षणिकं कामभोगजन्यं सुखमधिकमाकर्षकमवलोक्यते। तत्कालं प्रत्यक्षञ्चानुभूयते; अत एव तत्सुखं वास्तविकसुखं मन्यमाना जनास्त-त्प्राप्तये विविधसाधनानि एकत्रीकर्त्तुं जीवनपर्यन्तं संलग्नास्तिष्ठन्ति, स्वकीयं समग्रं जीवनं वृथैव नाशयन्ति च। ज्ञानिनो न भवन्ति तादृशा। आध्यात्मिकसुखसन्निभं वैषयिकसुखमपि प्रतीयते मोहकम्, किन्तु सम्यग्ज्ञानिनां समक्षं तस्य न भवति किञ्चिदपि मूल्यम्। वयं जानीमो यत्काचखण्डमपि वैदुर्य्यरत्नसङ्काशं द्योतते; किन्तु रत्नपरीक्षकाणां समक्षं तस्य न भवति किञ्चिदपि मूल्याङ्कनम्।

# २८.असंविभागी

*''असंविभागी न हु तस्स मोक्खो ॥''*

*—दशवैकालिकसूत्रम् १/२/२३*

यो जनः प्राप्तभोग्यवस्तूनामेकाक्येव करोति भोगं, सोऽतीव न्यूनं सुखं लभते, किन्तु विपरीतमस्माद् यो जनो वस्तूनि मित्रेषु विभज्य तैः साकमुपविश्य तेषामुपभोगं करोति सोऽधिकतरं सुखमनुभवति खलु ।

वस्तुविभाजनं कथने यावत्सरलमस्ति, करणे तावदेव कठिनम्; यतो विभाजने यदि सर्वेभ्योऽल्पमल्पं दत्तं स्वस्मै किञ्चिदप्यधिकं गृहीतं तर्हि सर्वेषां दृष्टौ वयं स्वार्थिनो भविष्यामः । मित्रेष्वपि कस्मैचिदधिकं कस्मैचिच्च किञ्चिन्न्यूनं दत्तं तर्हि किं स्यात् ? यो न्यूनं लप्स्यते सोऽपमानमनुभूय खिन्नो भविष्यति, विभाजकाँश्चास्मान् पक्षपातिनोऽवगमिष्यति च ।

अत एव विभाजकाय संविभागस्य सन्देशः परामर्श उपदेशो वा प्रदत्तोऽस्ति । तस्य तात्पर्य्यमेतद् यत्प्रत्येकस्मै मित्राय स्वस्मै च देयवस्तूनः समानं विभाजनम् कर्त्तव्यम् । विभाजकः स्वस्मै कृते यदि किञ्चिन्न्यूनं स्वीकरोति तर्हि तेन तस्य शोभावृद्धिरेव भवेत; परन्तु सर्वेष्वन्येषु गृहीतृषु वस्तुनः समभाग एव वितरणीयः; यतोऽसंविभागिनो मोक्षोऽसम्भवः। अयमेवाशयोऽस्त्यस्या आगमसूक्तेः।

# २९. असंवृताः

*''मोहं जंति नरा असंवुडा ॥''*

— सूत्रकृताङ्गसूत्रम् १/२/१/२०

ये जनाः संयमविहीनाः सन्ति,येषां स्वकीयानीन्द्रियाणि वशवर्त्तीनि न सन्ति,येषां स्वमनसि किञ्चिदपि प्रभुत्वं नास्ति, ते शीघ्रमेव विषयान् प्रति मोहिता भवन्ति।

विषयान् प्रति तेषामेष मोहः कर्त्तव्यपालने बाधको भवति। पथि प्रस्तरवत् प्रगतिं रुणद्धि। धर्माचरणे प्रमादं वर्धयति। तथापि ते मोहत्यागस्य साहसं कर्त्तुं न पारयन्तीति चित्रम्।

ये प्राणिन असंवृताः (संवरेण रहिताः) सन्ति ते निरन्तरं कर्मणां बन्धनं कुर्वन्ति। कर्मभिर्बद्धास्ते भवे भवे भ्रमन्ति च। तावत्कालपर्यन्तं तेषां कर्मबद्धानां जीवानामस्मिन् जगति समुद्धारो न सम्भवति यावत्संवरस्य महत्त्वमभिज्ञाय स्वयं संवृता(संवरसम्पन्नाः) न भवन्ति।

संवरसम्पन्नाः प्राणिनः संसारस्य जन्मजरामरणचक्रे न पतन्ति, विषयान् विषवत्त्यजन्ति, भोगजन्यक्षणभङ्गुरसुखं प्रति आकर्षिता न भवन्ति। आन्तरिकस्य सुखस्य तुलनायां बाह्यसुखं ते तुच्छमवगच्छन्ति।

ते असंवृता एव जनाः सन्ति ये पञ्चेन्द्रियविषयभोगसामग्री-मवलोक्य तां प्रति तत्कालमेव मुग्धा भवन्ति।

# ३०. अभिमानिन:

*''बालजणो पगब्भइ ॥''*

—सूत्रकृताङ्गसूत्रम् १/११/२

विद्या यदि मातास्ति तर्हि तस्य पुत्रो भवेत् विनय: । विनयस्य यत्राभावस्तत्र विद्यायां वृद्धिर्न भविता । प्राप्तापि काचिद्विद्या पुन: शनै: क्षीयते ।

विद्या विनयेनैव शोभां लभते । अत: स्वकीयविद्वत्त्वशोभार्थमपि विनय उपादेय: ।

ज्ञानं त्वेवंविधा: समुद्रोऽस्ति यस्मिन् यावदन्तर्निमज्ज्यते तावदधिकं गाम्भीर्यम् प्रतीयते । अनेनैव कारणेन ज्ञानस्य कोऽपि जनो मानं कर्त्तुं नार्हति । कषायत्वात् मानं तु सदैव आत्मनि कालुष्यं जनयति; परन्तु इतरवस्तूनामभिमानात् ज्ञानस्याभिमानं कुत्सिततरमस्ति; यत: ज्ञानस्याभिमानेन आत्मन: पतनं शीघ्रम् भवति ।

ज्ञानम् पवित्रम्, अभिमानञ्चापवित्रमिति स्मरणीयं सर्वदा । अत एव यस्मिन् जनेऽभिमानस्य ज्ञानं भवति स ज्ञानस्याभिमानं कर्त्तुं नार्हति।

ये जना यावत्परिमाणं ज्ञानस्याभिमानं कुर्वन्ति ते जना: तावत्परिमाणं अनभिज्ञा अज्ञा वा भवन्तीति मन्यन्ते मनीषिणो ज्ञानिन: सुविज्ञा: । अज्ञजना एवात्र स्वकं महत्तरमवगच्छन्ति, अन्यान् जनान् सुतुच्छकान् जानन्ति ।

सूक्तिरियं स्पष्टीकरोति यद् बालजना(मूर्खा:) अभिमानिनो भवन्ति ।

# ३१. अज्ञः कः ?

*''बाले पापेहिं मिज्जती ॥''*

*— सूत्रकृताङ्गसूत्रम् १/२/२/२१*

क्रियते इति कार्यम्। शुभाशुभभेदेन द्विधा भवति तत्। सत्कार्यम् 'पुण्यम्' तथा दुष्कार्यम् 'पापम्' इत्युच्यते।

बहवो जना विस्मृत्य विज्ञाय वापि परिस्थितिविशेषवशाद् विवशतया पापमाचरन्ति; किन्तु पापाचरणानन्तरं मनसि लज्जिता भवन्ति पश्चात्तपन्ति च। पुनः कदापि पापाचरणं न करिष्याम इति ते सङ्कल्पन्ते। प्राप्ते पापाचरणदण्डे तं सप्रसादं सहन्ते।

कृतेनापराधेन स्वकं योऽपराधिनं मनुते, स्व पापाचरणं स्वीकरोति, न च गोपायति, तस्य जीवने सुधारस्सम्भवः। शनैः शनैः स पवित्रात्मा भवितुमर्हति।

परन्तु भवन्ति केचिज्जनास्तादृशा ये स्वदोषं 'दोषं' न मन्यन्ते — अपराधं कृत्वापि तस्यौचित्यं प्रकटयन्ति— स्वदुष्कृतं तर्केण समर्थयन्ति अर्थात्तत् 'सुकृतम्' अस्तीति सिद्धं कुर्वन्ति, अन्यान् जनान् वञ्चयन्ति तान् प्रति विश्वासघातं कुर्वन्ति; तथैतत् कार्यं स्वचातुर्यमवगच्छन्ति। निर्दयं तुदन्ति निरपराधान्, निर्बलान्, निर्दोषान्; अथ च एतत्कार्यं स्वीयां वीरतां मन्वते।

एवमेव ये स्वपापकार्यैः (दुष्कृतैः) गर्वानुभूतिं कुर्वन्ति, ते ह्यज्ञाः सन्ति।

# ३२. अज्ञानिनां का गतिः

*''अन्नाणी किं काही*
*किं वा नाही इ सेयपावगं॥''*

*—दशवैकालिकसूत्रम् ४/१०*

द्रव्य-गुण-पर्ययविषयको बोधो 'ज्ञानम्' इत्युच्यते। ज्ञानस्य चाभावो ह्यज्ञानम्।

देशतः सर्वतो भावतश्चेति भेदाद् अज्ञानम् भवति त्रिविधम्।

तत्रांशिकरूपेण अज्ञानम् देशतः, पूर्णरूपेण अज्ञानम् सर्वतः, पर्यायविषयकं अज्ञानम् च भावतः कथ्यते।

यस्मिन् जने भवत्यज्ञानं स एवास्त्य ज्ञानी। वस्तुतत्त्वं स यथार्थ-रूपेण ज्ञातुं नार्हति।

यस्य दृष्टिकोणे तिष्ठति सम्यक्त्वं स ज्ञानी। विपरीतमस्माद् यस्य दृष्टिकोणे तिष्ठति मिथ्यात्वं सोऽज्ञानी।

स्वजीवनं पवित्रतापथे नेतुं नवतत्त्वानां सम्यग्ज्ञानमपेक्ष्यते। जीवाजीवयोः ज्ञाने सति लोका अहिंसका भवितुमर्हन्ति। संसाराक-र्षणाद् विरक्ता भवितुम् अर्हन्ति। विरक्ता अमृतपदमाप्तुं सक्षमा भवन्ति।

एवमेव पुण्यपापयोः स्वरूपमवगम्य मनुष्या आस्रवाणां संवरम् बन्धस्य च निर्जरां कृत्वा केवलज्ञानेन जन्म-जरा-मरण हीनं मोक्षं लभन्ते। अज्ञानिनः कृते न केवलं दुर्लभो मोक्षः, अपित्वसम्भव एव। पुण्यपापयोः विश्लेषणे प्रत्यभिज्ञाने च अज्ञानिनां का गतिः ?

# ३३. आतङ्कदर्शी

*"आयंकदंसी न करेइ पावं ॥"*

*—आचाराङ्गसूत्रम् १/३/२*

लोकेऽस्मिन् कः प्राणी नास्ति दुःखापन्नः ? दुःखं तु प्रत्येकं जीवमनुगच्छत्येव। जन्मनो वृद्धावस्थाया मरणस्य तु दुःखमनिवार्यमेवास्ति, यस्यानुभूतिः क्रियते सर्वजीवैः संसारे; किन्तु तदतिरिक्तं रोगस्य, शोकस्य, वियोगस्य, अपमानस्य, बन्धनस्य, ईर्ष्यायाः, आघातस्य, कटुशब्दस्य, कुरूपतायाः, दुर्गन्धस्य, स्वादविहीन भोजनस्य, कठोरस्पर्शस्य, निर्धनतायाः, तिरस्कारस्य, स्वामिनो धुत्कारस्य, अतिश्रमस्य चैवं शताधिकविधं दुःखमनुभूय प्राणिनो निरन्तरं कम्पन्ते, व्याकुलीभवन्ति रुदन्ति च।

असंयमः पापाचरणं वा समस्तदुःखानां मूलमस्ति । यो जनः सांसारिकप्राणिभिरनुभूते विविधदुःखे विचारं करोति, स दुःखाद् आत्मानं रक्षितुं स्वकं पापाचरणाद् रक्षति, दुष्कर्मभ्यः स्वयं दूरं तिष्ठति, दुःखस्य स्थाने सुखं प्राप्तुं पुण्यकार्यमाचरति।

दुःखं शल्यमिवात्मानं तुदति। दुःखं 'सन्तापः' 'कष्टम्' 'आतङ्कः' इत्यपि कथ्यते। यो दुःखविषयकं विचारं करोति स आतङ्कदर्शीइत्युच्यते। ज्ञानिनः कथयन्ति— कामं करोतु पुण्यकार्यम्, किन्तु पापकार्यं कदापीह न करोति आतङ्कदर्शी। अत एव स प्रशंसनीयः।

# ३४. ''आतुरता''

''आतुरा परितावेंति ॥

—आचाराङ्गसूत्रम् १/१/६

ये जना आतुरा भवन्ति, तेऽन्यान् परितापयन्ति । कामातुरा विषयातुरा वा जना लज्जाहीना भवन्ति । यथोक्तम्—

कामातुराणां न भयं न लज्जा ॥

स्वगुरुजनेभ्यो निर्भया: तेऽविनीता उद्दण्डा भवन्ति । दुर्भोगं कुर्वाणास्ते न किञ्चदपि लज्जन्ते । परांस्तुदन्तो मनसि हर्षमनुभवन्ति।

तादृशानां स्वार्थान्धानां नेत्रे अर्थात् विवेकचक्षुषी पिदधीयेते अत एव ते स्वकर्त्तव्याकर्त्तव्यस्य विश्लेषणं कर्त्तुं नार्हन्ति । स्वकीयस्य अचिरस्थायिसुखस्य कृते अपरेभ्यश्चिरस्थायि दु:खदानेऽपि ते सङ्कोचं नानुभवन्ति । एतेषां क्रूरता स्वचरमसीम्नि वर्त्तते । उच्यते बुधै:—

न पश्यति दिवा घूक: काको नक्तं न पश्यति ।
विचित्र: कोऽपि कामान्धो दिवा नक्तं न पश्यति ॥

पद्येऽस्मिन् आतुराणां दुदर्शा वर्णिताऽस्ति केनचित्कविना । भय-विनय-लज्जा-सङ्कोचादिगुणान् विहाय दिवानिशं ते कामभोगार्थमुपकरणानामन्वेषणे संलग्नास्तिष्ठन्ति। कामभोगानां कृते उपयोगिविविधसाधनानामन्वेषणे ये बाधका भवन्ति तांस्ते परितापयन्त: स्वयमपि दु:खान्यनुभवति सदा ।

# ३५. आत्मवत्

*''आयओ बहिया पास ॥''*

*— आचाराङ्गसूत्रम् १/३/३*

दुराचरणैः स्वात्मानं रक्षितुं मनीषिभिः सुकर एक उपाय उपदिष्टः, येन वयं पुण्यपापयोर्धर्माधर्मयोर्निर्णयमपि कर्त्तुं शक्नुमः तथा दुराचारात्स्वात्मानं दूरीकर्तुमपि स्वयं समर्था भवामः।

कोऽस्त्युपायस्सः ? ज्ञातुं स्युर्भवन्तः कदाचिदुत्कण्ठिताः। सर्वभूतेष्वात्मवद् दृष्टिरेव स उपायः। सर्वे प्राणिन आत्मवत्सन्तीति चिन्तनीयम्। यदि कोऽपि अस्मान् वञ्चयति तर्हि यथा वयं दुःखिनो भवामस्तथैवान्येऽपि प्राणिनो वञ्चिताः सन्तो दुःखिनो भवन्ति। अन्यैः कृतं मिथ्याभाषणं धनापहरणं च यथाऽस्मभ्यं न रोचते तथैवास्माभिः कृतं तदन्येभ्योऽपि न रोचते। यथा वयं जीवितुमिच्छामः मृत्युरस्माकं अप्रियः तथैव सर्वेऽपि जीवितुमिच्छन्ति मृत्युश्च सर्वेषाम् अप्रियः।

एवमेव सर्वान् जीवान् ये आत्मवद् जानन्ति तेऽन्यान् न वञ्चयन्ति, मिथ्याभाषणं न कुर्वन्ति, धनं न चोरयन्ति, कस्यापि प्राणान् न हरन्ति, सर्वैः सह शिष्टं व्यवहरन्ति।

अस्यां सूक्तौ धर्मसारः समाविष्टोऽस्ति। श्रीवीतरागदेवाः सर्वेभ्य उपदिशन्ति यद्बहिः (अन्यजीवान्) आत्मवत्पश्यन्तु।

# ३६. आत्मविजयः

*''सव्वमप्पे जिए जियं ॥''*

*—उत्तराध्ययनसूत्रम् ९/३६*

आत्मविजयस्यार्थोऽस्ति मनोनिग्रहः स्वचित्तवृत्तिष्वङ्कुशः।

मनस्त्वश्ववच्छक्तिमच्चञ्चलञ्चास्ति। तस्य वशीकरणं नास्ति साधारणकार्यम्, नास्ति बालक्रीडनकवत् क्रीडनम्।

अश्वं वशीकर्त्तुं विनेतुं वा यः परिश्रमः क्रियते, तस्मादपि बहुगुणः परिश्रमो मनोवशीकरणार्थमपेक्ष्यते।

यथा प्रतोदो वल्गा चाश्वं विनेतुं प्रयुज्येते तथैव संयमस्तपस्या च चित्तं विजेतुं प्रयुज्येते।

विकारग्रस्तं मनः विषयभोगान् प्रति पुनः पुनर्धावति। पञ्चापीन्द्रियाणि समग्रं शरीरञ्च तत्र गत्वा विषयान् भोक्तुं प्रेरयन्ति। तत्संयम्य धर्मध्याने योजयेच्चेदात्मकल्याणं सुलभं भवेत्।

श्री महावीरेण भगवता भाषितम्—

जो सहस्सं सहस्साणं संगामे दुज्जए जिणे।<br>
एगं जिणेज्ज अप्पाणं एस से परमो जयो॥

एको वीरः स्वप्रबलपराक्रमेण दुर्जये सङ्ग्रामे सहस्रशो विपक्षीय-शत्रून् जयति, अन्यो वीरः केवलमात्मानं जयति— अनयोर्वीरयोरपरो वरतरः। शत्रुविजेतुरात्मविजेता श्रेष्ठः। यतो मनसि आत्मनि वा जिते सर्वं विजितं भवति।

# ३७. आत्महितम्

*"अत्तहियं सुदुहेण लब्भइ ॥"*

*— सूत्रकृताङ्गसूत्रम् १/२/२/३०*

अस्मिँल्लोके वयं पश्यामो यत् पाषाणाः सन्ति बहवः, हीरका न्यूनाः, सारमेयाः सन्तिबहवः मातङ्गा न्यूनाः, शृगालाः सन्ति बहवः सिंहा न्यूनाः, निम्बाः सन्ति बहव आम्राः न्यूनाः, एवमेव दुष्टाः दृश्यन्ते बहवः, शिष्टाः न्यूनाः ।

यादृशानां मनुष्यणां सङ्गतौ वसामो वयं तादृशा एव स्वयमपि भवामः । दौर्जन्यमतिशीघ्रं स्वीकरोति मनुष्यः, यतोऽत्र दुर्जनाः सन्ति बहुसंख्यकाः। विपरीतमस्मात् सज्जनानामल्पसंख्यकत्वात्सत्सङ्गतेरवसरो भवति दुर्लभः ।

सज्जनानामपेक्षयाऽपि साधूनां संख्याऽस्ति अल्पतरा । अतः साधूनां सङ्गतेः तेषामुपदेशश्रवणस्य चावसरो भवति मानवेभ्यो दुर्लभतरः ।

प्राप्तस्यापि सत्सङ्गतेरवसरस्योपयोगं कुर्वन्ति सुधियः सुज्ञा एव, न कुधियोऽज्ञा वा । उक्तञ्च —

चन्दनं शीतलं लोके, चन्दनादपि चन्द्रमाः । .
ताभ्यां चन्दनचन्द्राभ्यां, शीतला साधुसङ्गतिः ॥

शीतलायाः साधुसङ्गतेरात्मकल्याणस्य मार्गं स्पष्टं ज्ञायते । सर्वैरपि भव्यजनैरात्महितार्थं प्राप्तस्यावसरस्योपयोगः कर्त्तव्य इति शिक्षयतीयं सूक्तिः ।

# ३८. अन्तः शुद्धिः

*''उदगस्स फासेण सिया य सिद्धी*
*सिज्झंसु पाणा बहवे दगंसि ॥''*

*— सूत्रकृताङ्गसूत्रम् १/७/१४*

बहवो जना: स्नानं कृत्वा मनसि विचारयन्ति यत्तैर्महती आत्मसाधना कृताऽस्ति; किन्तु ते अन्धविश्वासिन एतन्नावगच्छन्ति यदात्मशुद्धौ शारीरिकशुद्धौच महदन्तरमस्ति ।

नाना जना: स्नानेन स्वशरीरं तु मलविहीनं शुद्धं वा कुर्वन्ति किन्तु मनस्तेषां रागद्वेषादिभिर्दुर्गुणै: समलं अशुद्धं वा तिष्ठति । विपरीतम् अस्मात् बहूनां जनानां काममस्तु शरीरमशुद्धं मनस्तेषां निर्मलमेव भवति।

साम्प्रतम्, एकस्य मन: शुद्धं शरीरम् अशुद्धम्, अन्यस्य शरीरं शुद्धं मनोऽशुद्धम् अनयो: क: श्रेयान् ? क: विश्वसनीय: ?क: मैत्रीयोग्य:?सम्यग्विचार्य वदन्तु ।

मन: शुद्धिमान् मनुष्य एव सर्वेभ्यो रोचिष्यते । अनया मनोवृत्त्या अन्त:शुद्धे: महत्त्वं स्पष्टं भवति ।

यदि स्नानेनैव आन्तरिक शुद्धे: प्राप्तिरभविष्यत्तर्हि तिमिङ्गिलगिलेभ्य आरभ्य अमीबापर्यन्ता: सर्वेऽपि जलजन्तव: पूर्वमेव आत्मसाधनाफलसम्पन्ना: सिद्धा बुद्धा मुक्ता अभविष्यन्। सिद्धगति - नामधेयं स्थानं सम्प्राप्तिहेतवे मन:शुद्धि:, आत्मशुद्धि:, अन्त:शुद्धिर्वा अनिवार्याऽस्ति इति घोषयन्ति मुहुर्मुहुरध्यात्मवादिनो मुनय: ।

# ३९. आयुषो ह्रासः

*''सेणे जह वट्टयं हरे*
*एवं आउखयम्मि तुट्टइ ॥''*

*— सूत्रकृताङ्गसूत्रम् १/२/१/२*

सम्पूर्णः संसारो मृत्योराहारः । यथा चणकान् भक्षयतः कस्यचित्कपेः करतले भवन्ति केचिच्चणकाः केचिच्च तस्य मुखे; तथैव केचित्प्राणिनः तिष्ठन्ति मृत्योः करतले केचन च तस्य मुखे। अस्मिंल्लोके केचित्प्राणिनो मृताः, केचन म्रियमाणाः, केचिच्च मृत्युप्रतीक्षापरायणाः मरिष्यन्ति।

यस्यावस्थाऽस्त्यवशिष्टा, न पूर्णमभवदायुः, कामं स साम्प्रतं जीवतु; परन्तु एकदा तस्य मृत्युरवश्यम्भावी। येषां जन्म भवति तेषां मृत्युरपि भवितैव। नास्त्यत्र सन्देहलेशः। कश्चित् प्राणी पूर्वं गच्छति कश्चिच्च पश्चादित्येवान्तरं दृश्यते।

श्येनो यथा सहसाऽऽक्रम्य वर्त्तकां हन्ति तथैवायुषः क्षये मृत्युरपि प्राणिनं सहसाऽऽक्रम्य हन्ति।

मृत्योरवश्यभावितामेनां विज्ञाय साधकः साधनापथे प्रगच्छन् कदापि प्रमत्तो न भवति। यस्य मनसि मरणस्य स्मरणं भवति, तस्मै न रोचन्ते पापकार्याणि। किञ्चिदपि दुराचरणं कर्त्तुं नोत्सहते सः।

सम्यग् विजानाति स यत्क्षणिकह्लासुखस्य कृतेऽस्माभिः पापकार्याणि कथं क्रियेरन्, यदा आयुषो ह्रासः भवति प्रतिपलम्।

# ४०. आस्रवसंवरौ

*समुप्पायमजाणं ता कहं नायन्ति संवरं ॥*

*—सूत्रकृताङ्गसूत्रम् १/१/३/१०*

कुर्वन्तु कल्पनां यदस्माकं समक्षमेको विशाल: सरोवरोऽस्ति। तस्य मध्ये एका नौका तरति। नौकायां नाना यात्रिण उपविष्टा: सन्ति। शनै: शनै: सा नौका मज्जन्ती प्रतीयते। यतस्यस्यां जलप्रवेश: प्रारब्ध:। यात्रिणो निमज्जनभयात् क्रन्दन्त: श्रूयन्ते— "अस्मान् पातु, अस्मानवतु, अन्त:प्रविशज्जलं शीघ्रमेव रुणद्धु!" इति।

साम्प्रतं चिन्तनीयमेतद् यन्नौकायामन्त: प्रविशज्जलं क्रन्दनमात्रेण तु रोद्धुं नैव शक्यते। अस्यां स्थितौ तज्जलं रोद्धुं किं करणीयम्?

सर्वप्रथमं तु एतदवलोकनीयं यत्तानि कानि कानि सन्ति छिद्राणि, यैर्बहि: स्थितं सरोवरजलमन्त: प्रवेशं लभते। अवलोकनानन्तरं तानि सर्वाणि छिद्राणि क्रमश: पिहितव्यानि। छिद्रपिधानस्य पश्चात्सा नौका अध:स्थिते जले न मंक्ष्यति।

संसारोऽपि तादृश एवैक: सरोवरोऽस्ति। आत्मा नौका। कर्मजलं सच्छिद्रायामात्मनौकायां शनै: शनै: प्रविशति। तेनात्मनौका संसारसरोवरे मज्जन्ती दृश्यते। यै: कार्यै: कर्मजलस्यात्मन्यागमनं भवति ते "आस्रवा:" इत्युच्यन्ते। यैश्च कार्यै: कर्मजलस्यागमने रोधो भवति ते 'संवरा:' इति कथ्यन्ते। आस्रवान् ये सम्यगवगच्छन्ति ते एव सज्जना: संवरान् विज्ञातुं प्रभवन्ति। इत्यस्या: सूक्तेस्तात्पर्य्यम्।

# ४१. इच्छानिरोधः

*छन्दं निरोहेण उवेइ मोक्खम् ॥*

*—उत्तराध्ययनसूत्रम् ४/८*

इच्छा अनन्ता भवति। प्रथमेच्छायाः पूरणे द्वितीयेच्छा प्रादुर्भवति। ततस्तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी.. इति क्रमशश्चैकैकेच्छा समुत्पद्यते। तस्याः पूर्त्यै प्राणीतस्ततो धावमानः स्वकीयमन्तिमश्वासं अपि मुञ्चति, समस्तमायुः क्षपयति, समग्रं जीवनं नाशयति। इच्छापूर्त्यै संगृहीतं वस्तुजातमत्रैव त्यक्त्वा गच्छति परलोकम्। तत्र च नूतनं शरीरं धृत्वा पुनरिच्छापूर्तिचक्रे पतति। तस्मिंश्चक्रे यावज्जीवं भ्रमन् जीवो वास्तविकं सुखं कदापि न लभते। स्थायिसुखमेव भवति वास्तविक-सुखम्, यत्प्राप्यतेऽन्तः न बहिः।

भौतिकवस्तुजातजन्यं बहिर्लब्धं सुखं स्थिरं न भवति, वास्तविकं न भवति। मोक्षसुखमेव भवति वास्तविकं सुखम् यदिच्छानिरोधात्संय-मात्तपसश्चाप्यते, न त्विच्छापूरणात्।

पञ्चेन्द्रियप्रियाणि विषयवस्तूनि संकलनयन् जीवः सुखमाशासते, किन्तु तत्र सुखाभास एव भवति, न सुखम्। इन्द्रियविषयेभ्यो निवारितं मनो यदा परमात्मन्यात्मनि वा संलग्नं क्रियते तदैवेच्छानिरोधः साध्यते। इच्छानिरोधेन च भव्यैर्लभ्यते मोक्षः।

# ४२. क्षणं जानीयात्

*इणमेव खणं वियाणिया ॥*

*—सूत्रकृताङ्गसूत्रम् १/२/३/१९*

अस्मदीयमायुः क्षयति प्रतिक्षणम्— नास्त्यत्र सन्देहलेशावकाशः। यथाऽञ्जलिस्थितं जलं क्षीणं भवति तथैवास्मदीयमायुः अपि क्रमशः क्षीणं भवति। आयुषि क्षीणे वयमन्तिमश्वासं मुक्त्वा पिहितलोचनाः स्वीयमतिप्रियमपि देहं त्यक्ष्यामः।

व्यतीतः कालो दिवसः सप्ताहः पक्षो मासो वर्षो वा पुनर्न लभ्यते —इति जानन्ति सर्वे। यथोक्तम्—

जाजा वच्च रयणी
न सा पडिनियत्तइ।
अहम्मं कुणमास्स
अफला जंति राइओ ॥

ये अधर्ममाचरन्ति तेषां कालो निष्फलो भवति। एतद्विपरीतम् धर्मम् आचरतां कालः सफलो भवति।

दीयमानाभिः कोटिभिः स्वर्णमुद्राभिरप्यायुषः क्षणमात्रमपि न लभ्यते। अतः बुद्धिमद्भिर्भव्यजीवैः स्वायुषः क्षणस्यापि वृथा व्ययः कदापि न कर्त्तव्यः। प्रत्येकस्यापि क्षणस्योपयोग आत्मकल्याणाय करणीयः। अतीतकालस्तु व्यतीत एव; परन्त्वागामिकालस्य प्रत्येकं क्षणः सदुपयोक्तव्यः। एतदर्थं क्षणं जानीयात्(क्षणस्य महत्त्वं ज्ञातव्यम्)।

# ४३. सत्कर्मफलम् ।

*इह लोगे सुचिण्णा कम्मा इह लोगे*
*सुह फलविवागसंजुत्ता भवन्ति ॥*

*— स्थानांगसूत्रम् ४/२*

अस्मिन् लोके, अस्मिन् भवे, अस्मिन् जीवने वा कृतानां शुभकर्मणाम् सुफलम् अस्मिन्नेव लोके लभ्यते ।

अभावग्रस्तेभ्यो मानवबन्धुभ्यो योऽत्र धनस्य दानं करोति, कृतस्य दानस्य चाभिमानं न करोति, स लोके जनैः ''दानवीर'' इति कथ्यते । तस्य मनसि यदौदार्यं भवति, तत् सर्वत्र प्रशस्यते ।

यस्य जीवनं शुद्धं दुर्व्यसनविहीनं भवति, मनसा वचसा कायेन च यः संयतो भवति, मिथ्यारोपेण यः परान् न दूषयति, न निन्दति, सर्वेषां सज्जनानां यः सन्मानं करोति, अपमानं न करोति, दुःखापन्नानां मानवानां योऽश्रूणि प्रोञ्छति मार्जयति वा, प्रसन्नचित्तो यः शुभाचरणं करोति, स ''सदाचारी'' इत्युच्यते सन्मानं च लभते ।

आगतानि कष्टानि यो धैर्येण सहते भौतिकवस्तुषु ममतां न धारयति, नाना तपांसि चरति, परिचर्यासु वैयावृत्येषु वा तत्परस्तिष्ठति, स ''तपस्वी' इत्युच्यते प्रतिष्ठाञ्च प्राप्नोति ।

इत्थमस्मिन्नेव लोके लभ्यते प्रशंसा सन्मानप्रतिष्ठारूपं सत्कर्मफलम्।

# ४४. काऽस्ति महत्ता गोत्रस्य ?

*से असइ उच्चागोए, असइं नीआगोए,*
*नो हीणे नो अइरित्ते ॥*

— *आचाराङ्गसूत्रम् १/२/३*

तथाकथिते उच्चगोत्रे समुत्पन्नो मानवः स्वं महान्तं मनुते, नीचगोत्रे चोत्पन्नः स्वं तुच्छं मनुते; किन्तु मान्यताद्वयमपि भ्रान्तिजन्यम्। यतोऽद्यावधि स नैकवारं नीचगोत्रेषु नैकवारञ्चोच्चगोत्रेषु जन्मग्रहणं चकार, अत उच्चगोत्रेषु जन्मग्रहणेऽभिमानं न कार्यम् तथैव नीचगोत्रेषु जन्मग्रहणेऽपि स्वात्मानं दीनं हीनं तुच्छञ्च न मन्तव्यम् ।

महत्ताया उच्चगोत्रेण नास्ति कश्चिदपि सम्बन्धः तथैव हीनताऽपि नीचगोत्रसम्बद्धा न भवति। सदाचारेण निजपवित्रकार्यैश्च महत्तां प्रतिष्ठां वा प्राप्नोति मानवः। दुराचारेणापवित्रकार्यैश्च हीनतामपयशस्विताञ्चाप्नोति ।

इत्थं प्रतीयते यत्प्रतिष्ठा वा प्रतिष्ठा वा मनुष्यस्याचरणमवलम्बते। को न जानाति यद्रावण-कंस-दुर्योधनादयो निन्दनीयाः, यद्यपि ते उच्चगोत्रजाता आसन् ? तथैव हरिकेशीमेतार्यादयो महामुनयो वन्दनीयाः, यद्यपि ते नीचगोत्रसमुत्पन्ना आसन् ?

अस्यां स्पष्टायां स्थितौ कास्ति महत्ता गोत्रस्य वराकस्य ।

# ४५. ब्रह्मचर्यम्

*तवेसु वा उत्तम बंभचेरम् ॥*

*— सूत्रकृताङ्गसूत्रम् १/६/२३*

परमार्थस्य आत्मकल्याणस्य वा कृते विविधकष्टेषु या सहिष्णुताऽवलम्ब्यमाना दृश्यते सैव तपस्येत्युच्यते ।

शास्त्रेषु द्विविधं तपः वर्णितम्— बाह्यं तपः आभ्यन्तरञ्च तपस्तत्। अनशनम्, ऊनोदरिता, वृत्तिसंक्षेपः, रसपरित्यागः, कायक्लेशः प्रतिसंलीनता चैतानि षट् बाह्यतपांसि सन्ति। प्रायश्चितं विनयो वैयावृत्त्यं स्वाध्यायो ध्यानं कायोत्सर्गश्चैतानि षडाभ्यन्तरतपांसि सन्ति। साधक उभयविधमपि तपः आचरति ।

क्षुधा, पिपासा, शैत्यम्, उष्णता, दंशः, अचेलत्वमित्यादिषु द्वाविंशतिपरीषहेष्वपि सहिष्णुताया आवश्यकता भवति। एषु परीषहेषु स्त्रीणां कृते पुरुषः, पुरुषाणां कृते च स्त्री, परीषहरूपा भवतीति वर्णितमस्ति । सुन्दरीं स्त्रियं सुन्दरं पुरुषं च प्रति वासनात्मिकया दृष्टयाऽऽकृष्टस्य मनसो रोध एवं ब्रह्मचर्यव्रतपालनम् । यः करोत्येवं स एवास्ति ब्रह्मचारी । ब्रह्मचारी भवति उत्तमस्तपस्वी; यतः सर्वेऽपि मनीषिणो ज्ञानिनो विचारवन्तो विवेकिनो ब्रह्मचर्यम्'' उत्तमम् तपो'' मन्वते ।

# ४६. उत्तमशरणम्

*धम्मो दीवो पइट्ठा य*
*गई सरणमुत्तमम् ॥*

— उत्तराध्ययनसूत्रम् २३/६८

अम्बुनिधौ तरन्नतीव क्लान्तः कोऽपि तितीर्षुर्मानवो जलराशि-मध्ये कञ्चिद् द्वीपं दृष्ट्वा कियत्सुखमनुभवति ? धर्मोऽपि संसारसागरे तरद्भ्यो जीवेभ्यो द्वीपवत् सुखप्रदो भवति ।

कुतोऽप्यपयशोऽपमानं वा प्राप्यात्र प्राणिनो मनसि क्लेशं महत्कष्टं वानुभवन्ति । प्रतिष्ठां प्राप्य सुखम् अनुभवन्तो मोदन्ते । अधर्माचरणेन प्राणी तिरस्क्रियते जनैः । धर्माचरणेन च सत्क्रियते सः। अतो धर्मोऽपि प्रतिष्ठायाः कारणत्वात् स्वयं प्रतिष्ठासमः सुखदः ।

बन्दिनः कारागारे तिष्ठन्तो रुग्णाः खट्वाम् आश्रयन्तः कां सुखानुभूतिं कुर्वन्ति ? गतिशीलतायामस्ति सुखं, न तु स्थिरतायाम् । कर्त्तव्यप्रेरणां विधाय धर्मो गतिशीलान् करोति मानवान् । अतः स्वयं धर्मो गतिवत्सुखदोऽस्ति ।

आध्यात्मिकपथे विचरतां प्राणिनां चिन्ताया अन्तो भवति । मर्दितस्तुदितः सन्तापितो व्याकुलो नरः कस्यचिद् वीरपुरुषस्य शरणं गत्वा निर्भयो भवति । धर्मोऽपि चिन्तामुक्तिसाधनत्वादुत्तमं शरणमस्ति।

# ४७. कविपरीक्षा

*सित्थेण दोणपागं कविं च एक्काए गाहाए ॥*

*—अनुयोगद्वारसूत्रम् १/६*

एकमंशमवलोक्य समस्तं वस्तु परीक्ष्यते। पाकपात्रस्थेभ्यस्त-ण्डुलेभ्य एकं कणं निष्कास्य तस्याङ्गुल्या मर्दनेन ज्ञातुं शक्यते यत्तत्रत्याः समस्तकणाः पक्वाः सन्ति अपक्वा वा। पक्वताया अपक्वताया वा ज्ञानं लब्धुं समेषां तण्डुलकणानां मर्दनमनावश्यकम्।

शास्त्रकारैर्द्रोणस्य दृष्टान्तेनैतत् प्रतिपादितम्। षट्पञ्चाशदधिक-शतद्वयमुष्टिकापरिमितं भवत्येक आढकः। आढकचतुष्टयपरिमितो भवत्येको द्रोणः। द्रोणपरिमितपाकस्यापि परीक्षणं क्रियते कणस्यैकस्य मर्दनेन।

दृष्टान्तमेनं पुरस्कृत्य शास्त्रकारा अस्मानेवमवगमयितुमिच्छन्ति यत् कवेः परीक्षणमपि एवमेव कर्त्तुं शक्यते। महाकवयः काव्यानि रचयन्ति तथैव सामान्याः कवयोपि; किन्तु केवलं रसात्मकं वाक्यमेव काव्यं भवति इति काव्यलक्षणज्ञाः कविकर्मकुशलाः कथयन्ति। सफलाः कवयस्तु विरला एव भवन्ति। पाकपात्रगृहीतमर्दितपरीक्षितैककणवत् कस्यापि कवे रचितस्यैकस्य पद्यस्य अध्ययनेन श्रवणेन वा समस्तं काव्यं परीक्ष्यते।

# ४८. सर्वज्ञः कः ?

*जे एगं जाणइ से सव्वं जाणइ*
*जे सव्वं जाणइ से एगं जाणइ ॥*

*- आचाराङ्गसूत्रम् १/३/४*

यस्मिन्नेकस्य(आत्मनः) ज्ञानमस्ति तस्मिन् सर्वस्य (अनात्मपदार्थव्रजस्य) ज्ञानमस्ति।

तथैव यस्मिन् जीवे सर्वेषाम् (अजीवतत्त्वानाम्) ज्ञानमस्ति तस्मिन् एकस्य(आत्मतत्त्वस्य) ज्ञानमस्ति।

यस्य मनसि आत्मस्वरूपस्य सम्यग्ज्ञानमुद्भवति, स न कदापि अनात्म-तत्त्वेषु रमणं करोति, यतः स आत्मभिन्नपदार्थानां क्षणभङ्गुरत्वम् अवगच्छंस्तेभ्यो विरक्तः सञ्जायते।

इत्थमेव यो भौतिकपदार्थानां क्षणभङ्गुरत्वस्वभावमवगच्छति स तद्भिन्ने चिदानन्दमये आत्मतत्त्वे एव रमणं कर्त्तुं यतते। सर्वेषामनात्मपदार्थानां ज्ञानस्य पश्चात्स एकमात्मतत्त्वं जानाति, स्वीकरोति च।

दार्शनिकभाषायां प्रकटिताया अस्याः सूक्तेः तात्पर्यम् रहस्यम् वा एतदेवास्ति यदस्माभिरात्मस्वरूपबोधस्य प्रयासः सर्वप्रथमं कर्त्तव्यः। यतो यः सर्वज्ञोऽस्ति स एवैकज्ञः तथा य एकज्ञोऽस्ति स एव सर्वज्ञः।

# ४९. वाणी

*नो वयणं फरुसं वइज्जा ॥*

*— आचाराङ्गसूत्रम् २/१/६*

वाणी द्विविधा भवति— परुषा मृद्वी च। परुषा कठोरा, मृद्वी कोमला। यदा मनसि क्रोधः क्रूरता वा निवसति तदा वाणी कठोरा निस्सरति मुखात्। यदा च तत्र विनयः शान्तिर्वा तिष्ठति तदा वाणी कोमला भवति। करुणया, दयया, मायया, ममतया, प्रेम्णा, स्नेहेन, मोहेन, सहानुभूत्या च वाण्यां कोमलता प्रादुर्भवति। एतद्विपरीतम् निष्ठुरतया, निर्दयतया, निश्छलतया, निर्ममतया, ईर्ष्यया, द्वेषेण, दुर्भावेन च वाण्यां कठोरता समुद्भवति।

कोकिलाया मयूरस्य च वाणी सर्वेभ्यो मानवेभ्यो रोचते, किन्तु काकस्य गर्दभस्य च वाणी केभ्यश्चिदपि न रोचते। कोऽत्र न वेत्ति तथ्यमेतत्?

प्राकृताः प्राणिनोऽस्मान् शिक्षयन्ति मृदुवाणीप्रयोगम्। कटुशब्द-प्रयोक्तारः सर्वत्र हीतस्ततः स्वकीयशत्रून् सृजन्ति। एतद्विपरीतम् ये मधुरशब्द-प्रयोक्तारः सन्ति ते सृजन्ति परितो मित्राणि। मृदुवचसि यथाऽऽकर्षणं भवति तथैव परुषवचसि भवति विकर्षणम्। धर्मोपदेशकानां तु वचांसि सर्वदा मृदूनि भवेयुः। न शोभन्ते परुषवचांसि तेषाम् न च रोचन्ते केभ्योऽपि तानि।

# ५०. कर्ता भोक्ता च कः

*अप्पा कत्ता विकत्ता य*
*दुहाण य सुहाण य ॥*

—उत्तराध्ययनसूत्रम् २०/३७

सुखं भवत्यनुकूलवेदनम्, दुःखञ्च प्रतिकूलवेदनम्। सुखं दुःखञ्च स्वेषामेव विचाराणां कार्याणां च फलम्, न परेषाम्। शुभविचारैः पवित्रकार्यैश्चास्मत्कृते वयं सुखं सृजामः, दुर्विचारैः दुष्कार्यैश्च दुःखं सृजामः। इत्थम् वयमेव सुखदुःखनिर्मातारः स्मः।

सुखदुःखे निर्माय स्वयमेव वयं ते भुञ्ज्मः। अतः सुखदुःखयोर्निर्मातारो भोक्तारश्चापि वयमेव स्मः।

निर्मितिः भुक्तिश्च पृथक् पृथग्गुणौ। रोटिकां निर्माय तस्या भक्षणं अकृत्वा कोऽपि तां क्वापि क्षिपेदिति सम्भवति। स्वकीयशुभकृत्यैः सुखदामनुकूलां स्थितिं निर्माय कोऽपि शिष्टाभावस्मृतिं विधाय क्रन्देत् (रुद्यात्) इति सम्भवति।

विपरीतमस्मात् स्वदुष्कृत्यैर्दुःखदां प्रतिकूलां परिस्थितिं विधायापि स्वीयामांशिकसफलतां स्मृत्वाऽथवाऽऽध्यात्मज्ञानं लब्ध्वा सांसारिकसुख-दुःखयोः क्षणभङ्गुरतां स्मृत्वा मनसि प्रसीदेदिति सम्भवति।

इत्थं सिद्ध्यति यदात्मैवास्ति सुख-दुःखयोः कर्त्ता भोक्ता च।

# ५१. हिंसाऽस्ति कर्मभूमिः

*कम्ममूलं च जं छणं॥*

*— आचारांगसूत्रम् १/३/१*

क्षणवधे इति तनादिगणीयः सकर्मक उभयपदीयो धातुरस्ति। तस्मात् क्षणशब्दस्य निष्पतिः। अतो वधः, हत्या, हिंसा वा तस्यार्थः। यद्यपि क्षणशब्दस्य उत्सवः, अवसरः, दशपलपरिमित कालः, निमेषकियाचतुर्थभागश्चेत्यन्येऽप्यर्थाः शब्दकोषे सन्ति, किन्तु अस्यां सूक्तौ हिंसेत्यर्थ एवोपयुक्तः।

अष्टानां कर्मणामुत्पादिका भूमिः कर्मभूमिः हिंसैवास्ति। दया यथा धर्ममूलम् तथैव हिंसा कर्ममूलम्। यदि अहिंसा, संयमः तपश्च उत्कृष्टो धर्मस्तर्हि हिंसा, असंयमः कुतपश्च निकृष्टं कर्मास्तीति मान्यता वैमत्यविहीना। यतो धर्मः कर्म च परस्परौ विरोधिनौ शब्दौ।

धर्मसाधका जिनाराधकाः कर्मबन्धनाद् दूरे एव तिष्ठन्ति। एतदर्थं ते हिंसाकार्यात्, प्राणितिपातात्, प्राणिवधात् विरमन्ति, स्वात्मानं रक्षन्ति; यतो हिंसा कर्मभूमिरहिंसा च धर्मभूमिः— इति जानन्ति सर्वे सुज्ञाः।

वीतरागै र्मनीषिभि र्महामानवैः स्वीयवाण्यां स्पष्टमुद्घुष्टम् यद् धर्मस्य मूलमहिंसा, कर्मणाम् मूलञ्च हिंसा।

# ५२. अपनेयं कर्मरजः

*विहुणाहि रयं पुरे कडं ॥*

*—उत्तराध्ययनसुत्रम् १०/३*

कुक्कुरोऽपि यत्रोपविशति तत्स्थलमादौ स्वपुच्छेन पादेन वा स्वच्छं करोतीति प्रसिद्धम् । प्रवृत्तिरेषा दर्शयति यत् प्राणिनः स्वच्छताप्रिया भवन्ति।

प्रत्यहं परिधातव्यानि स्वीयवस्त्राणि कतिपयदिवसपर्यन्तं यदि न प्रक्षाल्यन्ते तर्हि कियन्ति मलिनानि भवन्ति ? कियन्ति चाशोभनानि प्रतीयन्ते ? मलिनवसनधारकस्य नरस्य सामीप्यमपि न रोचतेऽस्मभ्यम्। एवमेव मलिनं शरीरम्, मलिनं गृहम् तथा मलिनानि वस्तूनि न रोचन्ते कस्मायपि । वयं कामयामहे यदस्माकं परितः स्थितं प्रत्येकं वस्तु स्वच्छं भवेत् ।

बाह्यस्वच्छताया अपेक्षा अन्तः स्वच्छताऽस्ति आवश्यकतरा —इति मन्वते मनीषिणः। मलिनाच्छरीरान्मलिनं मनो घातकतरम्। कषायचतुष्टयस्य सम्पर्काद् भवति मलिनं मनः; अतस्तस्माद् रक्षणीयं तत्।

साम्प्रतमात्मनो विषये विचारयामः । पूर्वभवेषु सञ्चितैः कर्मभिर्लिप्त आत्मा कलुषितो भवति । यथा वयं मार्जन्या गृहाङ्गणगतं रजो मार्जयामस्तथैव अहिंसया, संयमे न, तपसा च आत्मनि संलग्नं कर्मकालुष्यमपि मार्जनीयम् येन भवेदात्मशुद्धिः ।

# ५३. कर्मबन्धः

*जं जारिसं पुव्वमकासि कम्मं*
*तमेव आगच्छति सम्पराए ॥*

— सूत्रकृतांगसूत्रम् १/५/२/२३

काष्ठनिर्मितः कन्दुको जले क्षिप्तश्चेत् स न निमंक्ष्यति, अपितु प्लवति। आत्मा तु तस्माल्लघुतरोऽस्ति तथापि संसारमहासागरे निमग्नः। कथमेतत् ?

तस्मिन् काष्ठकन्दुके यदि क्लिन्नाया मृत्तिकाया लेपम् कृत्वा वस्त्रावेष्टनं विधाय पुनः क्लिन्नमृत्तिकालेपस्तस्योपरि क्रियेत, एवमेवाष्टवारं लेपं विधाय स कन्दुको जलतले स्थाप्येत, तर्हि किं स्यात्? निश्चितमेव स कन्दुको जलमग्नो भवेत्।

अनेन कन्दुकदृष्टान्तेन महामुनयः प्रतिपादयन्ति यदात्माऽपि अष्टऽकर्मावरणलिप्तत्वात्संसारसागरे निमग्नोऽस्ति।

जन्मग्रहणस्य पश्चात् क्रमशः कर्माणि उदयन्ति, शुभाशुभफलानि च यच्छन्ति, तदनुसारं प्राणिनः सुखं दुःखञ्च भुञ्जन्ति। कदापि क्वापि सुखं कदापि क्वापि दुःखञ्च स्वोपार्जितकर्मानुसारमनुभवन्ति।

अयमाशयोऽस्ति यदात्मकल्याणं कामयमानैरस्माभिः सावधानेन मनसा सदा धर्मसम्बन्धः कार्यः न तु कर्मबन्धः।

# ५४. कष्टकारणम्

*सकम्मुणा विप्परिया सुवेइ ॥*

*—सूत्रकृताङ्गसूत्रम् १/७/११*

अहो वैषम्यम् जगति ! कश्चिज्जायते कश्चिज्जन्यते, कश्चिज्जीवति कश्चिद् म्रियते, कश्चिज्जागर्त्ति कश्चित् स्वपिति, कश्चित् सुखमनुभवति कश्चिद् दुःखम्, कश्चित् तुदति, कश्चित् तुद्यते, कश्चिद् हसति कश्चित् हस्यते, कश्चिद् रोदिति, कश्चिद् रुद्यते। किमत्र कारणं स्यात् ?

निगदन्ति मनीषिणो यदस्या विचित्रताया विषमताया वा कारणम् अस्ति पूर्वभवेषु सञ्चितानि शुभाशुभकृत्यजन्यानि शुभाशुभकर्माणि।

भ्रमवशात् कतिपये मानवा मन्यन्ते यदमुकः प्राणी सुखदुःखे अस्मभ्यं ददाति, परन्तु वस्तुस्थितिरस्माद्विपरीतैव। अन्यः कोऽपि जीवोऽन्यस्मै कस्मैश्चित् सुखं दुःखं वा दातुं न शक्नोति। कमप्यन्यं सुखदातारं मत्वा तं प्रति वयं रागिणः तथा दुःखदातारं मत्वा द्वेषिणो भवामः। रागद्वेषौ कलुषितं कलङ्कितं कुरुतः स्वजीवनम्।

रागद्वेषाभ्यां स्वात्मनो रक्षार्थम् अस्माभिरेतदेव मन्तव्यम् सर्वदा यत्कोऽपि कस्मायपि सुखं दुःखं वा दातुं नार्हति। दुःखं तु स्वोपार्जितदुष्कर्मणां फलमेवास्ति, यतः स्वकृतकर्मभिरेव तुद्यतेऽत्र कोऽपि प्राणी।

# ५५. कल्याणकारिणी

*अहिंसा तस-थावर-सव्वभूयखेमंकरी ॥*

*— प्रश्नव्याकरणसूत्रम् २/१*

द्विविधा भवन्ति सर्वे जीवा: सिद्धा: संसारिणश्च । सिद्धा: कर्मरहिता: संसारिणश्च कर्मसहिता: ।

संसारिणोऽपि जीवा द्विविधा:— त्रसा:स्थावराश्च। त्रासेन भयेन ये इतस्तत: सञ्चरन्ति ते त्रसजीवा: । यथा शंख-सीप-मत्कुण-यूका-वृश्चिक-भ्रमर-मक्षिका-मकर-कूर्म-सर्प-नकुल-शुक-गो-मनुष्यादय: सर्वे त्रसा: सन्ति । वृक्ष-लता-पुष्प-बीज-दूर्वादय: स्थिरा जीवा: स्थावरा: सन्ति ।

अहिंसको मानव: कमपि जीवं दु:खिनं कर्त्तुं न वाञ्छति, भवतु नाम स त्रस: स्थावरो वा । यत: स सम्यग् जानाति यद् यथाऽहमस्मि जीवितुकाम:, तथैव सर्वे जीवा: सन्ति जीवितुकामा: । यथाऽहं नास्मि मर्त्तुकाम: तथा कोऽप्यन्यो जीवो नास्ति मर्त्तुकाम: । अत: कस्यापि प्राणिन: प्राणातिपात: कुत्रापि नैव कर्त्तव्य: ।

प्राणातिपातविरतो मानव एतदपि चिन्तयति यद् यथाऽहं नेच्छामि यत् कोऽपि मां तुदेत् तथाऽन्ये जीवा अपि नेच्छन्ति यत्कोऽपि तान् तुदेत्। कष्टं कस्यापि न प्रियम् । अत एव अहिंसा उपादेया । समेषां प्राणिनां सा कल्याणकारिणी ।

# ५६. कामासक्तिः

*कामेसु गिद्धा निचयं करेंति॥*

*— आचाराङ्गसूत्रम् /३/२*

कामेषु आसक्ता मानवाः कर्मणां बन्धं कुर्वन्ति। पञ्चेन्द्रियेषु चक्षुरिन्द्रियस्य श्रोत्रेन्द्रियस्य च ये विषयाः सन्ति ते कामेषु गण्यन्ते। यथा सुन्दरं चित्रम्, नाटकम्, चित्रपटम्, मनोहारि प्राकृतम् दृश्यम्, रमणीयं शरीरम्, नृत्यमित्यादयश्चक्षुरिन्द्रियाह्लादजनकत्वात्कामाः सन्ति। तथैव मनोरञ्जकं सरसं काव्यम्, चित्रपटसङ्गीतम्, मधुरं स्वरवृन्दम्, परैः कृता प्रशंसा, विविधवाद्यानां मधुरध्वनिरित्यादयः श्रोत्रेन्द्रियाह्लादकत्वात् कामाः सन्ति। न जातु कामः उपभोगेन शाम्यति इति समीचीन मेवोच्यतेऽनुभविभिः। एतान् विषयानहर्निशं ये चिन्तयन्ति, तल्लाभाय चोचितानुचितकार्याणि कुर्वन्ति तेषु कामासक्तिः तिष्ठति।

अवशिष्टेन्द्रियत्रयस्य सुगन्धादयो घ्राणेन्द्रियस्य, मिष्टान्नादयो रसनेन्द्रियस्य, मैथुनादयः स्पर्शेन्द्रियस्य च विषयाः सन्ति ते भोगेषु गण्यन्ते।

कामासक्तिवत् भोगासक्तिरपि कर्मबन्धस्य हेतुभूताऽस्ति। कर्मबन्धकारणात् प्राणिन्ः संसारे चतुरशीतिलक्षजीवयोनौ भ्रमन्तः सुख-दुःखेऽनुभवन्ति।

अतस्त्याज्या साऽऽसक्तिर्या कर्मबन्धजनिकाऽस्ति।

## ५७. दुःखभूमिः का ?

*कामाणुगिद्धिप्पभवं खु दुक्खम् ॥*

*—उत्तराध्ययनसूत्रम् ३२/१९*

कामानुगृद्धिप्रभवं खलु दुःखम् । दुःखम् सर्वेभ्योऽनिष्टम् । तस्य भूमिः(उत्पन्नकर्त्री) कामासक्तिरस्ति। कामनायाः क्षेत्रे, इच्छाया भूमौ, जन्म भवति दुःखस्य।

यत्र कामनास्तिष्ठन्ति, विविधविषयभोगसामग्रीलाभाय लालसाः निवसन्ति, तत्र केवलमशान्तेः साम्राज्यमस्ति। शान्तिस्तत्र कथं सम्भवेत्?

मनुष्यसमुदायस्य मानसिकीं शान्तिमपहर्त्तुं कामासक्तिरतीव कुशला। मुहुर्मुहुःसा प्रेरयति मानवं कामभोगसामग्रीम् एकत्रीकर्त्तुम्। प्राणिनां मस्तिष्केषु तादृशीम् भ्रान्तिमुत्पादयति सा यया ते वास्तविकं स्थायि स्वात्मरमणसुखमुपेक्ष्य केवलं बाह्यसामग्रीतः प्राप्तं क्षणिकं सुखं प्रति भवन्त्याकृष्टाः। फलतः कृत्वाऽप्याजीवनं परिश्रमं वास्तविकेन स्थायिना सुखेन वञ्चिता भवन्ति।

तान् सावधानान् कुर्वाणा मनीषिणो भाषन्ते यद्यत्रापि कामनाः कल्लोलं कुर्वन्ति, वासना वसन्ति, लालसा लसन्ति, इच्छा आक्रामन्ति तत्र चिन्तास्तिष्ठन्ति। यत्र चिन्तास्तिष्ठन्ति तत्र दुःखानामनुभूतिरनिवार्या। स्वात्मानं दुःखाद् दूरीकर्त्तुं कामनास्त्याज्याः, कामासक्तिर्निवार्या।

# ५८. कामकामना

*कामी कामे न कामए*
*लद्धे वावि अलद्ध कण्हुइ ॥*

*—सूत्रकृताङ्गसूत्रम् १/२/३/६*

संसाराद् विरक्ता ये मानवाः प्राप्तामपि कामसामग्रीम् (भोगसामग्रीं) परित्यज्य प्रव्रज्यामङ्गीकुर्वन्ति, दीक्षिता भवन्ति, तैः पुनः कामुकैः भूत्वा कामभोगकामनाः कदापि न कर्त्तव्या। कामभोगसामग्रीसंकलनं कर्त्तुं प्रयासोऽपि न करणीयः।

कदापि क्वापि प्रयासं विना पञ्चेन्द्रियसुखदायिनी कामभोगसामग्री समुपलभ्येत चेत् 'सानुपलब्धाऽस्ति' —इति मन्तव्यमवगन्तव्यं वा।

कथनस्यायमेवाशयोऽस्ति यत्तां सामग्रीं प्रति सर्वथोपेक्षाभावो मनसि स्थापयितव्यः। आत्मकल्याणपथस्य पान्थेभ्यः तादृश उपेक्षाभावः सहायको भवति।

संसारेऽस्मिन् कामना एव सर्वत्र क्रीडन्ति। न केवलं मानवाः, किन्तु सर्वेऽपि प्राणिनः कामनाः कुर्वन्ति। तासां पूर्त्यै इतस्ततो धावन्ति। धावन्तोऽपि न किञ्चिदपि शान्तिं लभन्ते।

साधकाः आत्मकल्याणेच्छुका अपि साधारणमनुष्यवत्कामना-जंजाले पतन्ति चेदुभययोरन्तरं पार्थक्यं वा किं स्यात्? अतः साधकै-राराधकैः त्याज्या कामकामना।

# ५९. कायोत्सर्गः

*वोसिरे सव्वसोकायं*
*न मे देहे परीसहा ॥*

*— आचाराङ्गसूत्रम् १/८/२१*

कायस्य शरीरस्य उत्सर्गः त्यागः ''कायोत्सर्गः'' इत्युच्यते। षडावश्यकेषु एष एक आवश्यकः। क्रियन्ते कायोत्सर्गः सर्वैर्धर्माराधकैः साधकैः, किन्तु शरीरस्य त्यागं कोऽपि न करोति। यतः शरीरत्यागः ''आत्महत्या'' इत्युच्यते लोके। स महापापम् मन्यते। एकस्मिन् जन्मनि शरीरत्याग एकदैव कर्त्तुं पार्यते; किन्तु कायोत्सर्गस्तु सर्वदैव कर्त्तुं शक्यते। अनेन ज्ञायते यत्कायोत्सर्गशरीरत्यागयोर्महदन्तरमस्ति। किं तत् ?

उच्यते, शरीरेमोहस्य त्यागः कायोत्सर्गः, न तु शरीरत्यागः। कायोत्सर्गानन्तरमेव ध्याने एकाग्रता भवितुमर्हति। ध्यानकाले मनः शरीरं विस्मरति यथा नास्त्येव तत्। अनेन शरीरं प्रति ममता नश्यति। ममताया नाशे क्षुधापिपासाशीतोष्णदंशादयः सर्वे परीषहाः सह्यन्ते। यतः स्वकीयं शरीरमुपेक्षमाणेन साधकेन एवमनुभूयते यत्कोऽपि परीषहो नास्त्येव। ध्यानात् पूर्वमिव मनसि सङ्कल्पः क्रियते यद्— अहं स्वशरीरस्य ममत्वं सर्वथा त्यजामि; अतः कोऽपि परीषहोऽधुना माम् ध्यानच्युतमशान्तं वा कर्त्तुं नार्हति।

# ६०. वन्दनाकर्दमः

*एयं पलिगोव जाणिया*
*जा विय वंदणपूयणा इहं ॥*

— सूत्रकृताङ्गसूत्रम् १/२/२/११

प्रशंसाप्राप्तेरपि मदो भवति। मदेन मत्तः पुरुषो यथौचित्यविचारं विना स्वच्छन्दं कार्यं कुर्वाणिस्तिष्ठति तथैव प्रशंसाक्षुधातुरोऽपि औचित्य-मर्यादां विस्मृत्य येन कार्येणाधिकाधिकं यशोलाभो भवितुमर्हेत्तत्कार्यं कर्त्तुं संलग्नो भवति। विस्मरति स यत्प्रशंसकाः सर्वेऽपि सत्यवादिनो न भवन्ति। स्वार्थसिद्धेर्लक्ष्यं प्राप्तुं ते मिथ्या प्रशंसामपि कुर्वाणां दरीदृश्यन्ते।

स्वप्रशंसां श्रुत्वा सन्मानं वा प्राप्य ये प्रसीदन्ति, धूर्त्तास्तान् वञ्चयन्ति। तादृशः पुरुषः चाटुकारैः परिवृतस्तिष्ठति तैर्नरीनर्त्यते च यथेच्छम्।

अस्मिन् विषये त्यागिनस्साधकाः सदा सावधाना भवेयुः। सर्वाण्यपि तस्य कार्याण्यात्मकल्याणं लक्ष्यीकृत्यैव स्युः। तेषां मूले वन्दनपूजाप्राप्तेराकांक्षा न भवेत्। आत्मकल्याणकांक्षिभ्यो मुमुक्षुभ्यः साधकेभ्यो यदि वन्दन-पूजादिप्राप्तिर्भवति तर्हि ते निर्दोषाः सन्ति।

ज्ञानिनो निगदन्ति यत्कर्दममग्नः पुरुषो यथा गन्तव्यं न प्राप्नोति तथैव वन्दनपूजाभिलाषुको मोक्षं नाप्नोति।

# ६१. कृताकृते

*कडं कडेत्ति भासेज्जा*
*अकडं नो कडेत्ति य ॥*

*— उत्तराध्ययनसूत्रम् १/११*

कृतं 'कृतम्' इति अकृतञ्च 'अकृतम्' इति वक्तव्यम्। अस्यां सूक्तौ यथार्थवचनस्य स्वरूपम् प्ररूपितमस्ति । गुरोः सकाशे कृतकार्यस्य अकृतकार्यस्य च स्वीकृतिर्विधेया ।

सार्वजनिककार्यार्थम् कतिपये जना ''अहमियद्धनं दास्यामि'' इति लेखयन्ति । तदनन्तरं वयस्यान् सगर्वं वदन्ति— ''अमुककार्यार्थं मया इयन्ति रूप्यकाणिदत्तानि ।'' यद्यपि अद्यावधि न दत्तानि तानि, तथापि ''दत्तानि'' इति दानश्रेयोहरणार्थं यदेतत् कथ्यते तदयथार्थम् । दानानन्तरमेव 'दत्तम्' इति कथनीयम् यथार्थभाषिभिः ।

परन्तु ''कडेमाणे कडे ॥'' क्रियमाणं कृतमिति कथने न दोषः । यथा न सम्पन्नेऽपि भोजने अतिथिभ्यो ''भोजनं सिद्धमस्ति । चलित्वा स्वीकुर्वन्तु कृपया तत्'' इति कथ्यते। यद्यपि शाटिकायाः तटस्य स्वल्पांशमङ्गारेण दग्धं विज्ञाय ''अहो एषा शाटिका दग्धा !'' इति लोक-व्यवहारे उच्यते । व्यवहारमनुस्मृत्यानुसृत्य वा एतत्कथनमदुष्टमस्ति । एवं क्रियमाणं 'कृतम्' स्यात् तथापि अकृतं 'कृतं' न स्यात् — कृतञ्च अकृतं न स्यादिति ज्ञातव्यम् ।

# ६२. क्रियारुचिः

*किरियं च रोयए धीरो॥*

*— उत्तराध्ययनसूत्रम् १८/३३*

शरीरं पोषयति दुग्धम्— इति विज्ञाय शिशुः दुग्धपाने प्रवृत्तो न भवत्यपितु ''मधुरमेतद् दुग्धं मह्यं रोचते'' इति मनसि विचार्यैव स सदा दुग्धं पिबति।

क्रीडाभिर्व्यायामो भवेत्तेन च शरीरं पुष्टं भवेदिति विचिन्त्य बालकाः किशोरा वा न क्रीडन्ति; किन्तु क्रीडाभिर्भवति मनोरञ्जनमिति मत्वा ते विविधक्रीडासु प्रवृत्ता भवन्ति।

जीवनस्य प्रत्येकस्मिन् कार्ये दृष्टिरेषा भवितव्या। प्रयत्नः कदापि व्यर्थं न गच्छति; अतस्तस्य फलं तु लप्स्यामहे वयम् इति निश्चितम्; परन्तु प्रयत्ने एव यत्सुखं विलसति तस्य लाभेन वञ्चिताः कथं भवेम ?

दुर्भाग्यशालिनस्सन्ति ते ये कदापि स्वकार्यगतसुखं नानुभवन्ति। स्वकार्यं भारमिव मन्वते। चिन्तयन्ति निरन्तरं यत्तेऽमुकं कार्यं कर्तुं विवशाः सन्ति। तादृशाः पुरुषाः सन्ति सहस्रशः प्रत्येकग्रामे। तेभ्यः क्रिया न रोचते। अत एव तैः कृतं कार्यमुत्कृष्टमपि न भवति। धैर्यशालिन मानवाः क्रीडावत् स्वकार्याणि कुर्वाणाः कार्यगतसुखं लभन्ते तथा कार्यजन्यसाफल्यञ्चापि।

# ६३. न कोपनीयम्

*अणुसासिओ न कुप्पिज्जा ॥*

*—उत्तराध्ययनसूत्रम् १/६*

माता, पिता, पितृव्याः, अग्रजा इत्यादयः कुटुम्बिनोऽस्मद्-गुरुतरा अस्मदपेक्षयाऽधिकतरा अनुभविनश्च भवन्ति। तेऽस्मान् कुमार्गान्निवार्य सुमार्गे नेतुं प्रयासरता भवन्ति। ते निरन्तरं चिन्तयन्ति यत्कथं (कैरुपायैः) अस्माकं प्रगतिरुन्नतिर्वा स्यात्।

अस्माकं जीवनशुद्धये प्रयत्नशीलाः ते कदाप्यालोचनां विदधति, दोषान् दर्शयन्ति, हितमुपदिशन्ति, एकमेवापराधं मुहुर्मुहः कुर्वतोऽस्मान् ते वर्जयन्ति, तर्जयन्ति, ताडयन्ति च।

तदीयस्यैतस्य कठोरव्यवहारस्य मूले स्थितां तेषां हितैषितां विस्मृत्य तेभ्यो ये कुप्यन्ति ते स्वयमेव स्वपादयोः कुठाराघातं कुर्वाणा महामूर्खाः सन्ति।

महामूर्खैस्तैरेवं चिन्तनीयं यत् तर्जनायां ताडनायां वा ते किञ्चिदपि सुखं नानुभवन्ति। हितैषिणस्तेऽनिच्छापूर्वकमेवानुशासनात्मकं कठोरव्यवहारं कुर्वाणाः कष्टानि सहन्तेऽस्मत्कृते। किञ्चित्कालपर्यन्तं तेऽस्माकं भविष्यम् उज्ज्वलं कर्त्तुम् क्षोभस्य, उग्रतायाः, अशान्तेर्वा प्रदर्शनं कुर्वन्ति। न सन्ति ते शत्रवः। अत एवानुशासितैरस्माभिः तान् प्रति कदापि न कोपनीयम्।

# ६४. क्रोधनाशोपायः

*उवसमेण हणे कोहं ॥*

*—दशवैकालिकसूत्रम् ८/३८*

क्रोधः प्रथमः कषायः। स कथं प्राणिभ्यो घातकः —इति जानन्ति सर्वेऽपि सुज्ञाः । तस्य नाशः कथं क्रियते ? इत्येवात्र विचारं कुर्मः ।

यथाग्निरग्निना न शाम्यति तथैव क्रोधः क्रोधेन न नश्याति । यथाग्निशमनाय जलस्यावश्यकता तथैव क्रोधनाशायापि शान्तेरावश्यकता।

क्रोधोत्पादकहेतुभ्यो यदि वयं दूरे तिष्ठामः तर्हि क्रोधे विजयं प्राप्नुमः। स्वाभाविकरूपेण स्मितमुखस्य शान्तस्य धीरस्य वीरस्य समर्थस्य सत्पुरुषस्य पुरतः स्थितः क्रुद्धः शनैः शनैः स्वयमेव शान्तः सञ्जायते। तृणरहितस्थले पतितोऽङ्गारकः किमु स्वयं शान्तो न भवति!

उत्पन्ने क्रोधे तत्परिणामेषु विचारः करणीयः । यदि विचारो न सम्भवेत् तर्हि एकतः शतपर्यन्तं संख्याया मनसि गणना करणीया । गणनायाः प्रयोजनं मनोवृत्तेरन्यत्र परिवर्त्तनम् । गणनायाः स्थाने परमेष्ठिनां परमात्मनो वा नामस्मरणमपि कर्त्तुं शक्यते। नामस्मरणार्थं अष्टोत्तरशतमणियुतायाः एकस्या मालाया उपयोगोऽपि कर्त्तुं पार्यते । यदपि सम्भवेत् तत्कार्यम्। अनेन मन उपशान्तं भवति। उपशान्ते मनसि क्रोधः स्थातुं नार्हति। तत्काल एव नश्यति।

# ६५. क्रोधस्त्याज्यः

*वुच्चमाणो न संजले ॥*

*— सूत्रकृताङ्गसूत्रम् १/६/३१*

मनुष्यमात्रम् त्रुटेःपात्रम्('माणसमात्र भूलनो पात्र' इति गूर्जरभाषायां प्रसिद्धाऽस्ति लोकोक्तिरेका) अनेन ज्ञायते यत्प्रत्येकमपि मनुष्यो ज्ञातदशायामज्ञातदशायां वा विविधाः त्रुटीः करोति। स्वात्मना कृताऽपि त्रुटिः स्वयं ज्ञातुमवगन्तुं वा न शक्यते। अत एव भवति जीवने गुरोरावश्यकता। करुणापूर्णा दयालवो गुरुवर्य्या अस्मत्कृताः त्रुटीर्दर्शयन्ति येन वयं क्रमशः शुद्धतरा भवितुमर्हामः। विनीतेभ्यः साधकेभ्यः शिष्येभ्यो गुरुचरणाः एवमपेक्षन्ते यत्ते क्रमश एकैकां त्रुटिं त्यजेयुः।

परन्तु कतिपयेऽविनीताः शिष्या एतादृशा अपि भवन्ति ये गुरुदर्शितां त्रुटिं विज्ञाय क्रुद्धा भवन्ति। गुरुपादान् प्रति तेषां श्रद्धा नश्यति। गुरुभिः कृता ताडनां तर्जनां प्राप्यान्यशिष्यबन्धुमध्येऽपयशस्विनं स्वात्मानं मत्वा मनसि खिद्यन्ते। विचारयन्ति यत्कथं सुखमयं गृहस्थजीवनं विहाय वयं दुःखमयं संयतं साधुजीवनम् अङ्गीकृतवन्तः? अस्मात्तु पूर्वजीवनमेव अधिकं सुखदमासीत्! इति चिन्तयतां पश्चात्तपतां च शिष्याणामुद्धारः कदापि भवितुं न शक्नोति।

अत एवोपदिश्यते यत्ताड्यमानैरपि विनीतैः शिष्यैर्गुरुवर्यान् प्रति क्रोधस्त्याज्यः।

# ६६. मितभोजनम्

*माइन्ने असणपाणस्स ॥*

*— उत्तराध्ययनसूत्रम् २/३*

रसनेन्द्रियपरतन्त्रे स्वादलोलुपे मानवे न तिष्ठति भोजनस्य मात्राया ज्ञानम्। स्वोदरं प्रति निर्दयतया भक्षयति भोज्यपदार्थान् सोऽमर्यादम् । एतादृशं पुरुषं अक्षम्यं मनुते प्रकृतिरपि। सा तस्योदरेऽजीर्णमुत्पादयति यत्समस्त-रोगानां बीजमिवास्ति ।

खाद्यवस्तुवत् पेयवस्तुविषयेऽपि अवगन्तव्यमेतत्। रसनेन्द्रिय-परतन्त्राः स्वादलोलुपा मानवाः पेयपदार्थानां मात्राविषयं ततोऽप्यधिक-तरमसावधाना दृश्यन्ते। भ्रान्तिवशात्ते मन्वते यदुदरगताः पेयपदार्थास्तु सहजतया पच्यन्ते एव। दाधिकम्, दुग्धम्, चायम्, कफघ्नी, ईक्षुरसः, मद्यम्, मधु, पेप्सीकोला, मिराण्डा, रसना, कोकाकोला, सोडालेमनम्, गोल्डस्पाडित्यादीनि शतशो वस्तूनि विपणौ विक्रीयमाणानि दृष्ट्वा मानवः स्वादसुख-लाभाय एकस्य पश्चाद् द्वितीयं क्रमशः पिबन्नास्ते।

स विस्मरति यत् खाद्यवस्तुवत् पेयपदार्थान् पक्तुमपि उदरं करोति श्रमम् । अपक्वानि पेयवस्तून्यपि जनयन्ति नाना रोगान्। अतः सर्वैरपि मानवैर्मात्राज्ञैर्भवितव्यम्। भोज्यपेयपदार्थविषये मात्राया ज्ञानम् स्वास्थ्यरक्षार्थमत्यावश्यकम् ।

## ६७. रक्तं रक्तैर्न क्षाल्यते

*रुहिरकयस्स वत्थस्स रुहिरेणं चेव*
*पक्खालिज्जमाणस्स णत्थि सोही।*

*—ज्ञातृधर्मकथा १/५*

नाऽग्निनाऽग्निर्निर्वाप्यते। अस्मदीयं शरीरस्याङ्गं कोऽपि कुक्कुरो दशति चेत् तस्योपचारार्थं किं वयमपि तं दशामः ? न दशामः। तथैव गालीदानस्य गालीदानेन, घातस्य प्रतिघातेन प्रतीकारं कर्त्तुम् न पार्यते।

सम्यग्जानीमो वयं यत्क्रोधः क्रोधेन कदापि शान्तो न भवति। यदि अस्माकं पुरतः कोऽपि कोपं कुर्वाणः स्थितःस्यात् तर्हि वयमपि क्षुब्धाः तं प्रति कोपं कृत्वा तस्य कोपाग्निं वर्धयिष्याम एव। अतः कोपस्य प्रतीकारः कोपेन न भवतीति सिद्धचति।

शान्त्या प्रेम्णा सहिष्णुतया च वयं अन्येषां क्रोधं शान्तं कर्त्तुमर्हामः।

क्रोधस्य परिणतिः हत्यायां भवति। क्रमश मुष्टीमुष्टि, केशाकेशि, दण्डादण्डि संहरति प्राणिनां प्राणान्। प्रहाराः संहारेषु परिणमन्ति। मृत्युः करोति ताण्डवम्। सर्वत्र हाहाकारः प्रसरति। सर्वतश्चीत्कारस्य करुणक्रन्दनस्य च ध्वनिः श्रूयते।

अस्यां स्थितौ विशिष्टः प्रेम्णोऽतिरिक्तधैर्यस्य सहानुभूतेश्च प्रयोगः कार्यः। साधकः जानाति यत्प्रहारकं न प्रहरेत् यतः कदापि रक्तं रक्तैर्न क्षाल्यते।

# ६८. गर्भागमनम्

*माई पमाई पुण एइ गब्भं*

*— आचाराङ्गसूत्रम् १/३/१*

मायावी प्रमादी च पुन: पुन: गर्भम् आगच्छत: । संसारे जन्मग्रहणं कुरुत: । जन्मना सह मृत्यु: संलग्न: । ये जायन्ते तेऽवश्यं म्रियन्ते । ये म्रियन्ते ते सर्वामपि संकलितां भौतिकीम् सुखदसामग्रीम् परित्यजन्ति । कार्पासस्यैकं सूत्रखण्डमपि आत्मना साकं परलोके ते नेतुं न शक्नुवन्ति। किमधिकम् ?

संसारे परिभ्रमणम्, जन्म-जरा-मरण-चक्रे पतनम्, क्षणभङ्गुरं सुखं प्राप्य हसनं दु:खं चानुभूय रोदनम् स्वोपार्जितशुभाशुभकर्मणां फलमस्ति । छलेनालस्येन च भवति कर्मणामुत्पत्ति: । छलं कुर्वाणा जना मायाविन: कथ्यन्ते । एवमेवालस्यं कुर्वाणा जना: प्रमादिन: कथ्यन्ते । मायाविनो यथा संसारबन्धनाद्विमुक्ता न भवन्ति तथैव प्रमादिनोऽपि ।

माया कर्मणां माता प्रमादश्च तेषां पिता । मातापित्रो: परस्परसम्पर्केण यथा सन्तानोत्पत्तिर्भवतितथैव मायाप्रमादयो: सम्पर्केण आत्मनि कर्मोत्पत्तिर्भवति । ये प्राणिन: संसारे परिभ्रमणात्क्लान्ता श्रान्ताश्च ततो मुक्तिमभिलषन्ति तैरचिरमेव मायाया: प्रमादस्य च त्याग: करणीय:; यतो मायाविन: प्रमादिनश्चैव गर्भमागच्छन्ति ।

# ६९. गुणनाशहेतवः

*चउहिं ठाणेहिं संते गुणे नासेज्जा— कोहेणं, पडिनिवेसेणं, अकयण्णुयाए, मिच्छत्ताभिनिवेसेणं।*

*— स्थानाङ्गसूत्रम् ४/४*

चतुर्भिर्हेतुभिः सन्तोऽपि सद्गुणा नष्टा भवन्ति। तेषु हेतुषु —

प्रथमः क्रोधः। अनेन मानवा विवेकविहीना भवन्ति। विवेकहीनत्वात् किंकर्त्तव्यविमूढा भवन्ति। न जानन्ति ते स्वीयं कर्त्तव्यमकर्त्तव्यं वा।

द्वितीयो द्वेषः। स्वात्मोन्नतये स्पर्द्धा पर्याप्ता, यस्यां स्वयोग्यताया विकासस्य प्रेरणाऽस्ति, परन्तु द्वेष ईर्ष्या वाग्निरिव दहति स्वेषां परेषां च हृदयम्। उन्नतानामन्येषामवनतिः कथं भवेदिति चिन्तयितुं प्रेरयति द्वेषः।

तृतीयो हेतुरकृतज्ञता। उपकारिणः सन्मानं न कुर्वन्ति अकृतज्ञाः कृतघ्ना जनाः। उपकारिभिः करिष्यमाणैरुपकारैस्ते वञ्चितास्तिष्ठन्ति। कृतघ्नान् जनान् अवलोक्य परोपकारिण भवन्ति हतोत्साहाः।

चतुर्थो मिथ्याभिनिवेशः। एकदा स्वीकृतं सत्यमन्यदाऽसत्यं सिद्ध्यति चेत्तस्य त्यागः सहर्षं करणीयः; किन्तु मिथ्याभिनिवेशी न कर्त्तुं शक्नोत्येवम्।

इत्थं क्रोधादिचतुष्टयेन स्वकीयसद्गुणा नश्यन्ति।

# ७०. सद्गुणाकांक्षा

*कंखे गुणेजाव सरीरभेऊ ॥*

*— उत्तराध्ययनसूत्रम् ४/१३*

यावच्छरीरभेदो न भवति, जीवनस्य अन्तं नागच्छति, मृत्युः प्राणान् न हरति, तावन्निरन्तरमस्माभिः सद्गुणसंग्रहणस्य प्रयासः कार्यः।

विषयवस्तूनि तु सर्वेऽपि प्राणिनः सदा कामयन्ते, किन्तु सदसद्विवेकिनः प्राणिनः सद्गुणगणं कामयन्ते । परितः स्थितेभ्यः सर्वेभ्योऽपि मानवेभ्यतस्ते कञ्चित् कञ्चित्सद्गुणं शिक्षन्ते एव। गुणगणसंग्रहेण सद्गुणशालिनस्ते स्थाने स्थाने आद्रियन्ते ।

न केवलं गुणैर्दोषैरपि लभ्यते ख्यातिः । लुण्टाको महात्मा चोभावपि भवतः ख्यातौ; किन्तु प्रथमः कुख्यात द्वितीयः सुख्यातो इति तयोरन्तरम्।

या प्रशंसा मुखात्प्रकटीभवति सा सदैव न भवति यथार्था । स्वार्थसिद्धये चाटुकाराः कुर्वन्ति मिथ्या प्रशंसाम्। तां निशम्य मोदन्ते अहङ्कारपर्वत-शिखरमारोहन्ति च मूर्खाः ।

वास्तविकी प्रशंसा तु हृदयात् प्रकटीभवति, सदगुणेषु सत्कार्येषु चावलम्बिता भवति । एतादृशीं प्रशंसां निशम्य सज्जनाः सद्गुणगण-संग्रहाय यतन्ते । मृत्युपर्यन्तं ते गुणाकांक्षां न परित्यजन्ति ।

# ७१. गुरुविनयः

*जस्संतिए धम्मपयाइं सिक्खे*
*तस्संतिए वेणइयं पउंजे ॥*

*—दशवैकालिकसूत्रम् ९/१/१२*

पदस्यार्थः प्रयोक्तुं योग्यः शब्दः। धर्मस्य पदानि धर्मपदानि। ते शब्दा धर्मपदेषु गण्यन्ते यैर्धर्मस्य शिक्षा लभ्यते। धर्मपदानि धर्मशास्त्रेषु निहितानि सन्ति। धर्मशास्त्राणां येऽध्ययनं कृत्वा प्रवचनेषु धर्मपदानां विस्तृतां व्याख्यां प्रस्तुवन्ति ते धर्मगुरवः कथ्यन्ते।

येषां धर्मगुरूणां सन्निधौ स्थित्वा धर्मशिक्षा गृह्यते तान् प्रति मनसि सदा कृतज्ञताभाव आवश्यकः। गुरुकृतमुपकारमुपेक्षमाणाः कृतघ्नाः शिष्याः कदापि सत्यं ज्ञानं प्राप्तुं न शक्नुवन्ति।

विपरीतमस्माद् यदा गुरुवर्या विश्वसन्ति यदमुकः शिष्यः कृतज्ञो विनीतश्चास्ति तदा तस्य पुरतस्ते स्वीयं हार्दमुद्घाटयन्ति। यद् यत्ते जानन्ति तत्तत्सर्वं शिक्षयितुं सन्नद्धा भवन्ति।

अतो ज्ञानिनां कथनमस्ति यद् धर्मशास्त्रोपदेशकेभ्यो धर्मगुरुभ्यः प्रणतिः कार्या। यैर्धर्मपदानि शिक्षितानि, अवगमितानि, हृदयङ्गमितानि वा, तान् धर्मगुरून् प्रति सदा विनयपूर्वकं व्यवहर्त्तव्यम् यतो ज्ञानस्य स्रोतोऽस्ति गुरुविनयः।

# ७२. पश्यति चक्षुष्मान्

*सूरोदये पासइ चक्खुणेव ॥*

—सूत्रकृताङ्गसूत्रम् १/१४/१३

काममस्तु पुरतो दर्पणस्तथापि प्रज्ञाचक्षुः (नेत्रविहीनः) तस्मिन् स्वमुखमण्डलं द्रष्टुं न शक्नोति। यतस्तद् द्रष्टुं स एव भवति समर्थो यः स्वचक्षुषी धारयति।

एवमेव कामं सन्तु पुरतो गम्भीरज्ञानपूर्णानि शतशः शास्त्राणि तथापि यस्मिन् मनुष्ये स्वबुद्धिर्न स्यात् स तान्यध्येतुम् न शक्नोति। अध्ययनार्थं तु स्वीयबुद्धेरस्तित्वमनिवार्यम्।

ज्ञानिनो गुरुपादास्तु समानमेवोपदिशन्ति सर्वान्, परन्तु यस्य यावान् क्षयोपशमः स तावानुपदेशमवगच्छति स्वीकरोति च, नाधिकम्।

मेघादधः पतज्जलबिन्दुः शुक्तौ मुक्ता भवति सर्पमुखे च विषम्। बिन्दुस्वरूपे किञ्चिदपि अन्तरं नास्ति। पतनात्पूर्वं समानमेव निर्मलं भवति जलम्; परन्तु पात्रभेदात् तद्भिन्नरूपेण परिणमति।

ज्ञानोपदेशस्य परिणामोऽपि ग्रहणकर्तॄणां शक्तौ योग्यतायां बुद्धौ निर्भरो भवति। देवाधिदेवस्य तीर्थङ्करस्यापि समवसरणे श्रोतृवृन्देषु ये भव्यजीवा भवन्ति ते एव कल्याणमार्गोपदेशम् अवगच्छन्ति, नाभव्यजीवाः। यतः सूर्योदयेऽपि येऽन्धास्ते नार्हन्ति द्रष्टुम् पदार्थान्। चक्षुष्मानेव पश्यति।

# ७३. चत्वारः पुत्राः

*चत्तारि सुता—*

*अतिजाते, अणुजाते, अवजाते, कुलिंगाले।*

*— स्थानाङ्गसूत्रम् ४/१*

चतुर्विधा भवन्ति पुत्राः — (१) अतिजाताः, (२) अनुजाताः, (३) अवजाताः, (४) कुलाङ्गाराश्च।

प्रथमाः सद्गुणेषु स्वपितरमपि अतिरिच्यन्ते अर्थात् पितुरपेक्षया ते अधिकान् गुणान् धारयन्ति। एतादृशाः पुत्रा ''अतिजाताः'' कथ्यन्ते।

द्वितीयाः पुत्राः स्वपितुर्गुणान् अनुसृत्य तत्समा भवन्ति, न न्यूना नाप्यधकाः। यावत्पिता जीवति तावत्तस्य नाम जानन्ति जनाः। पश्चात्पुत्रं जानन्ति। एतादृशाः सर्वे पुत्राः ''अनुजाता'' उच्यन्ते।

तृतीया भवन्ति ते पुत्रा ये स्वपितुः समस्तगुणान् नानुसरन्ति। पितुरपेक्षया आंशिकगुणविहीनत्वादेते पुत्रा ''अवजाता'' भवन्ति।

चतुर्थाः पुत्रा दुर्व्यसनवशीभूता दुर्गुणधारिणः पितुर्विपरीतस्वभावम् बिभ्राणाः स्वकुलस्य प्रतिष्ठां दहन्ति, सम्मानं संहरन्ति, कीर्त्तिं कलङ्कयन्ति, मर्यादाञ्च मर्दयन्ति। तादृक्षाः पुत्राः ''कुलाङ्गाराः'' इति विशेषणं धारयन्ति।

एतेषु चतुर्षु प्रकारेषु भवन्तः कतमाः ? इति विचार्य उन्नततरां श्रेणीमारोहन्तु।

# ७४. श्रावकाश्चत्वारः

*चत्तारि समणोवासगा —*

*अद्दागसमाणे, पडागसमाणे, खाणुसमाणे, खरकंटगसमाणे।*

*— स्थानाङ्गसूत्रम् ४/३*

आत्मकल्याणाय ये श्रमं कुर्वन्ति ते श्रमणाः। श्रमणेषु श्रद्धाना ये तानुपासन्ते ते श्रमणोपासकाः श्रावका वोच्यन्ते। चतुर्विधा भवन्ति श्रावकाः— (१) दर्पणसमानाः (२) पताकासमानाः
(३) स्थाणुसमानाः (४) तीक्ष्णकण्टकसमानाश्च।

केषाञ्चित् श्रावकाणां हृदयानि दर्पणवन्निर्मलानि भवन्ति। तेषु प्रवचनानि सम्यक् प्रतिबिम्बितानि भवन्ति। उपदेशानुसारं ते जीवनशुद्धिं साधयन्ति।

केचिच्छ्रावकाः पताकावच्चञ्चला भवन्ति। तेषां श्रद्धा भवत्यस्थिरा। ते कदाप्येकं सिद्धान्तं स्वीकुर्वन्ति कदाप्यन्यम्, कामं स पूर्वस्मात् सर्वथा विरुद्धोऽपि स्यात्।

केचिच्छ्रमणोपासकाः स्थाणुवत् स्थिरविचारवन्तो भवन्ति। कदापि केनचिद् यदि गर्दभपुच्छं ग्राहितम् तर्हि कोऽपि कियदप्युपदिशेत्स तत्त्यक्तुं नोत्सहेत।

केचिच्छ्रावका अतीवः कटुभाषिणो भवन्ति। तीक्ष्णकण्टकसमं तेषां वचः श्रोतृवृन्दं तुदति, चित्तक्षोभं जनयति; व्यंग्यबाणप्रहारे दक्षा भवन्ति ते। एवं चतुर्विधेषु श्रावकेषु भवन्तः कीदृक्षाः सन्ति ? इति चिन्तनीयम्।

# ७५.संयमभेदा:

*चउव्विहे संजमे पण्णत्ते । तं जहा —*

*मणसंजमे, बइसंजमे, कायसंजमे, उवगरणसंजमे य ।*

*— स्थानाङ्गसूत्रम् ४/२*

श्रमणा अपि समुद्रवत् स्वमर्यादां न त्यजन्ति । संयमस्य सम्यक् पालनमेव तेषां मर्यादा ।

अतीव चञ्चलं भवति मन: । तद् विविधविषयान् प्रति आकृष्टं भवति। तेभ्यस्तन्निवार्य धर्मध्याने योजनमेव प्रथमो मनस्संयम: ।

कटुशब्दप्रयोगात् जिह्वां निवार्य कस्यचिन्मिथ्या प्रशंसां निन्दां वा न कुर्वाणैर्नृभि: सम्यग्विमृय परिमितशब्देषु स्वकीयहृद्गतविचार-व्यूहप्रकटीकरणं वचस्संयमो द्वितीय: ।

केनचित्साकं केशाकेशि मुष्टीमुष्टि दण्डादण्डि चाकृत्वा सुविचारपूर्वकं मृदु व्यवहरणम्, रात्रौ न विहरणम् (येन पादाधो जन्तूनां हिंसा न स्यात्) सावधानं विचरणम् तृतीय: कायसंयम: ।

परिमितवस्त्रपात्रादीनां स्वामित्वमुपकरणसंयमश्चतुर्थ: ।

एवं महाव्रतधारिणो मुनय: मनस्संयमं, वचस्संयमं, कायसंयमम्, उपकरण संयमं च धृत्वा कुर्वन्त्या आत्मकल्याणम्। साधनायां संयमचतुष्टयस्य भवति महत्यावश्यकता ।

## ७६. ज्ञात्वा भाषणम्

*जमट्ठं तु न जाणेज्जा*
*एवमेयंति नो वए ॥*

*— दशवैकालिकसूत्रम् ७/८*

यस्य विषयस्य अस्मदीयं ज्ञानं यथार्थं सम्पूर्णं च न भवेत् तस्मिन् विषये निश्चयपूर्वकं किमपि नैव वक्तव्यम् ।

तथा वक्तव्ये श्रोतारो यदान्यस्रोतोभिर्यथार्थं ज्ञास्यन्ति तदा वक्तृणां अस्माकं स्थितिः कियतत्युपहासजनिका भविष्यति, अविश्वसनीया च कियती? इति विचारणीयम् । समाप्ते विश्वासे जनाः सत्यमपि श्रोतुं नोत्सहन्ते । श्रुत्वाऽपि सत्यं न स्वीकुर्वन्ति । एवमस्माकं भाषणस्य लक्ष्यमेव नश्येत् ।

अतो यस्मिन् विषये काचिदपि शङ्का स्यात्, कश्चिदपि संशयः स्यात् तस्मिन् विषये "एवमेवैतद्" इति निश्चयात्मिकाया भाषायाः प्रयोगो न कार्यं, अन्यथा श्रद्धालुश्रोतृवृन्दं पथभ्रष्टकरणस्य वयमपराधिनः स्याम । अनेन स्वस्य परेषाञ्च पतनमवश्यम्भावि । अन्धा मनुष्या यथाऽन्यान् बन्धून् मार्गदर्शनं कर्त्तुं नार्हन्ति तथैव अज्ञा अपि अन्यमानवान् मार्गदर्शनं कर्त्तुं नार्हन्ति।

अतो भाषणस्य पूर्वं प्रतिपाद्यविषयस्य गम्भीरं यथार्थं ज्ञानं वक्तृषु भवेदिति सूक्तेस्तात्पर्यम् ।

# ७८. देहात्मपार्थक्यम्

*अन्नो जीवो अन्नं सरीरं ॥*

*— सूत्रकृताङ्गसूत्रम् २/१/१*

'अहम्' इति पदेन जीवस्यात्मनो वा भवति प्रत्यभिज्ञानम्। अतएव "अहं काणः, अहं बधिरः, अहं मूकः, अहं अन्धः" इति प्रयोगान् निशम्य केचिदिन्द्रियाण्येव जीवोऽस्ति इति मन्वते।

कतिपये विद्वांसश्च— "अहं धावामि, अहं स्वस्थः, अहं रुग्णः" इत्यादिवाक्प्रयोगं श्रुत्वा शरीरमेवात्माऽस्ति — इति मन्यन्ते।

केचन च "अहं अवगच्छामि, अहं प्रत्यभिजानामि" इत्यादि वचनानि श्रुत्वा बुद्धिरेवास्ति जीव इति वदन्ति।

कैश्चन पण्डितैः "अहं मन्ये, अहं चिन्तयामि" इति वाक्यविन्यास-मवलोक्य मन एवात्माऽस्तीत्युच्यते।

परन्तु वस्तुतस्तु "अहमस्मि" इत्यनुभूतिमाधृत्य जीव एवात्माऽस्तीति मन्तव्यम् अन्यथा "मम इन्द्रियाणि, मच्छरीरम्, मम बुद्धिः, मदीयं मनः" एवं वक्ता कः ?

शरीराज्जीवस्य पार्थक्यज्ञानमेव भेदविज्ञानमुच्यते। मृत्योरनन्तरं शरीरम् अत्रैव दह्यते, भूमौ वा गुह्यते; परन्तु जीव आजीवनं शुभाशुभकार्यार्जितकर्मव्यूहेन साकं गच्छति परलोकमेकाकी। तत्र कर्मोदयानुसारं सुखदुःखानि अनुभवति। अतो जीवोऽन्यश्शरीरमन्यद् इति मन्तव्यम्।

# ७८. शरीरस्य सदुपयोगः

*जीवियं चेव रूवं च*
*विज्जुसंपाय चंचलं ॥*

*— उत्तराध्ययनसूत्रम् १८/१३*

जीवितमस्ति क्षणिकम् क्षणभङ्गुरम्। यः श्वासो मुच्यते स पुनरागमिष्यति न वेति ज्ञातुमसमर्था वयम्। जीवनमेतद् तडिद्वच्चञ्चलमस्ति। क्षणमात्रं स्वीयं रूपं दर्शयित्वा यथा विद्युल्लुप्ता भवति तथैव जीवनमपि कतिपयवर्षपर्यन्तम् स्वास्तित्वं दर्शयित्वा लुप्तं भवति। अतो यावज्जीवनमस्ति तावत्तस्य सदुपयोगः सत्कार्यैः करणीयः।

जीवितवद्रूपमपि भवति नश्वरम्, क्षणभङ्गुरम्। यावत्यवस्था व्यतीता भवति शनैः शनैः तावदेव शरीरं भवति वृद्धं जीर्णं शीर्णम्। यौवनालङ्कृते शरीरे यत् सौन्दर्यं दरीदृश्यते, तद् वार्धके श्लथं भवति। शरीरस्य मांसलता नश्यति। स्थाने स्थाने चर्म सङ्कुचितं संजायते। तत्र बहुसंख्याका वलयः समुद्भवन्ति। चक्षुषी अन्तः प्रविशतः। तयोज्योतिर्मन्दा भवति। केशाः शुक्लत्वं प्रकटीकुर्वन्ति। शरीरं निर्बलं, विविधरोगैराक्रान्तं च भवति।

अत एवोपदिश्यते महर्षिभिः मुनिभिः महात्मभिः साधुभिः ज्ञानिभिः हितैषिभिः प्रवचनकारैराचार्यैः यज्जीवितस्य रूपस्य च क्षणिकतां मनसि विचार्य तयोः धर्माराधनेन परोपकारेण सदुपयोगः करणीयः। सतां विभूतयः परोपकराय भवन्ति।

# ७९. नश्वरत्वम्

*वओ अच्चेति जोव्वणं च ॥*

*— आचाराङ्गसूत्रम् १/१/१*

यथा यथा कालो गच्छति तथा तथास्मदीयमायुरपि व्यत्येति। यस्मात् कालात् वयं जन्म गृहीतवन्तः, चक्षुषी उदघाटयाम् जगतः स्वरूपमपश्याम तस्मात्कालादेवस्मदीयावस्था प्रतिक्षणं न्यूनतरा सञ्जायमानास्ति।

भ्रमवशा लोका मन्यन्ते यद् वयम् गुरवो भवामः, परन्तु वस्तुतो वयम् क्रमश लघवो भवामः। यतो यावन्ति दिनानि गच्छन्ति तावन्ति दिनानि निर्धारितायुषि न्यूनानि भवन्ति। इत्थं क्षणे क्षणे आयुः क्षीणात् क्षीणतरं भवति।

यदाऽऽयुर्न्यूनतरं भवति तदा यौवनं अपि क्रमशो नश्यति। वृद्धावस्थाया आगमनं भवति। शरीरं शक्तिहीनं संजायते। स्वल्पादपि श्रमात्कम्पते। कौटुम्बिका अपि वृद्धस्यादरं न कुर्वन्ति।

ज्ञानिन वृद्धावस्थाजन्यकरुणदशां पूर्वमेव ज्ञात्वा गच्छतः प्रत्येकक्षणस्य सदुपयोगं कुर्वन्ति। तेषांकालो धर्माचरणे, वैयावृत्त्ये, स्वाध्याये, ध्याने, परोपकारे, सत्सङ्गतौ, तीर्थयात्रायाम्, प्रभुगुणगणस्मरणे, शास्त्रचर्चायाम्, धर्मकथायाः प्रवचनस्य वा श्रवणे व्यत्येति। स्वजीवनं सर्वथा सफलं कर्तुं ते यतन्ते। अधर्माचरणात्ते लज्जन्ते। विषयेभ्यस्ते विरक्ता भवन्ति, सद्गुणेषु च रक्ता भवन्ति।

# ८०. अप्रमादः

*उट्ठिए नो पमायए ॥*

*—आचाराङ्गसूत्रम् १/५/२*

प्रस्तुप्तः प्रथमं जागृतो भवेत् । जागृतो उत्थितो भवेत् अर्थात् प्रावरणं दूरीकृत्य शय्यायामुपविशेत् । उत्थितः प्रमादं न कुर्यात् अर्थात् स्वशय्यामोहं व्यक्त्वा कार्यस्थलं व्रजेत् । तत्र च कार्यारूढो भवेत् । यतः कार्यारोहणादेव साफल्यं लभन्ते साधकाः । सिद्धिं प्राप्य सिद्धा भवन्ति निश्चयेन ते ।

प्रमादः साधनायां भित्तिवद् बाधको भवति। यथा गच्छन् पुरुषो भित्तिं पुरतो दृष्ट्वा तत्रैव तिष्ठति, अग्रे च गन्तुं समर्थो न भवति, तथैव साधकोऽपि प्रमादस्य प्रभावात्साधनापथे अग्रे गन्तुं असमर्थो भवति ।

प्रमाद एवास्ति सः, यः प्रसुप्तानां जागरणे, जागृतानाम् उत्थाने, उत्थितानां च कार्यस्थलान्तं गमने, तत्रस्थानां च कार्यारोहणे, कार्यारूढानां च उत्साहेऽतीव बाधको भवति । प्रमादः प्रसुप्तानां जागरणं निष्फलं करोति। प्रमादो जागृतानामुत्थानं मिथ्याकरोति । स एव उत्थितानां कार्यस्थले गमनं व्यर्थं करोति । स एव कार्यस्थलगतानां कार्यारम्भं वृथा करोति । स एव कार्यारूढानामुत्साहं नाशयति ।

अतः साधनायां सफलताया उपायमुपदिशन्तोऽनुभविनो ज्ञानिनः कथयन्ति यदुत्थितैः प्रमादो नैव कदापि कार्यः ।

## ८१. दातरि कोपो न कार्यः

*थोवं लद्धुं न खिंसए॥*

*- दशवैकालिकसूत्रम् ८/२९*

''किञ्चित्प्राप्तं वरम् अथवा किञ्चिन्न प्राप्तम् ?'' इति प्रश्ने कृते ''किञ्चित् प्राप्तमेव वरम्'' इत्युत्तरं लभामहे; किन्तु सन्ति कतिपये जना एवंविधा ये खण्डशः प्राप्तं वस्तु नाभिलषन्ति। पूर्णं प्राप्तं वस्तु रोचते तेभ्यः। अतस्ते स्वल्पवस्तु प्राप्य सन्तुष्टा न भवन्ति।

असन्तुष्टांस्तान् मनुष्यान् प्रतिबोधयितुं एषा सूक्तिः सन्नद्धा अस्ति।

आंग्लशासकाः यदा (१९४७ ईशवीये वर्षे) भारतं द्विखण्डं कृत्वा स्वतन्त्रतामयच्छंस्तदा'' अखण्डं भारतम् ''इच्छन्तो देशभक्ताः सज्जनो असन्तुष्टा अभूवन्, किन्तु तेषामसन्तोषमुपेक्ष्य खण्डितभारतस्य स्वतन्त्रतायाः स्वीकारं नाकरिष्याम चेत्किमद्यावधि भारतं परतन्त्रतापाशबद्धं एव नाऽभविष्यत् ?

अत अस्माभिरेषा नीतिनिर्धारणीया यद् यावदंशस्य प्राप्तिर्भवेत् तावदंशं स्वीकार्य अग्रिमांशस्य लाभार्थं प्रयतेमहि। इत्थं शनैः शनैः सम्पूर्णे वस्तुन्यधिकारस्य प्राप्तिर्भवितुम् अर्हति।

सन्तोषः परमं धनमिति कथ्यते। उपादेयः सद्गुणः सः। गोचरीं कर्तुं गतेभ्यः साधुसाध्वीभ्यः यत् किञ्चिदपि खाद्यवस्तु दीयेत, तेनैव सन्तोषः कार्यः। स्वल्पवस्तुनः प्राप्तावपि दातरि कोपो न करणीयः।

## ८२. मिथ्याभाषी लुब्धः

*लोभपत्ते लोभी समावइज्जा मोसं वयणाए॥*

*— आचाराङ्गसूत्रम् २/३/१५/२*

मिथ्याभाषणस्य (असत्यवक्तव्यस्य) क्रोधादीनि नाना कारणानि सन्ति; किन्तु लोभस्तेषु महत्तमम् कारणमस्ति। धनस्य लोभी (अर्थलोलुपः) मानवः साधारणलाभार्थमपि मिथ्या वक्तुं तत्परो भवति। असत्यभाषणे लज्जानुभूतिं न करोति।

कतिपये जनास्तु उत्कोचम् (रिश्वत) आदाय मिथ्या साक्ष्यदानस्य व्यवसायं कुर्वन्ति। तेभ्य ऐश्वर्यमीश्वरादपि प्रियतरम्। अतस्त ऐश्वर्यलाभाय (धनप्राप्तये) परमेश्वरो मिथ्या शपथं गृह्णन्ति, गीतां गङ्गाजलं वोत्थापयितुं तत्परा भवन्ति।

लुब्धे मनुष्ये कदापि कोऽपि न करोति विश्वासम्। यतो लोभवशे पतितः स कदा विश्वासघातं कुर्याद् इति कथयितुं न पार्यते। लुब्धो मानवः तावदेव सदाचारपरायणो भवति यावत् किमपि प्रलोभनं तस्याग्रे न भवेत्।

सत्यममूल्यं भवति। तस्य मूल्यं दातुं कोऽपि नार्हति। लुब्धः सत्यस्य मूल्यं न जानाति; अतः स तदितस्ततो विक्रीणाति। लुब्धस्य हृदयात् देव-गुरु-शास्त्र-तीर्थस्थलादीन् प्रति श्रद्धा नश्यति। अतः स्वार्थं साधयितुं स एतेषां मिथ्या शपथं गृहीत्वाऽपि न लज्जते।

# ८३. निर्भयता

*ण भाइयव्वं भीतं खुभया अइंति लहुयं ॥*

*— प्रश्नव्याकरणसूत्रम् २/२*

संसारेऽस्मिन् सर्वत्र दरीदृश्यते यत् पापात्मा, अपराधी, वधकर्त्ता, स्तेन:, मिथ्याभाषी, व्यभिचारी वा योऽस्ति स एव मनसि निरन्तरं बिभेति। ''दुष्कार्यं कुर्वाणं मां कोऽपि क्वापि मा पश्येत्'' इति विचार्य चिन्तातुरो भवति मानवः। ''उक्तं मदीयमसत्यं भविष्यत्काले केनापि स्रोतसा कदाचित्प्रकटी भवति चेत् कोऽपि मयि विश्वासं न कुर्यात्'' इति विचिन्त्य भयात् कम्पमानस्तिष्ठति मिथ्याभाषी। एतेषां सर्वेषामेषा भीतिः प्रशस्या; यतस्सा सर्वान् एतान् पापकार्येभ्यो (दुष्कृत्येभ्यः) दूरं नयति।

परन्तु ये सर्वथा प्रामाणिकाः, निष्पापाः, निरपराधाः, निर्दोषाः, सज्जनाः सन्ति तेऽपि भीता भवन्ति; मिथ्या निन्दया, अनिष्टाशङ्कया, दुर्जनकृतासत्यारोपैः, परीषहैः, निकटसङ्कटैर्वा ! तेषामेषा भीतिर्न प्रशस्या; यतस्सा निर्बलतां साहसहीनतां च द्योतयति ! कर्त्तव्यं प्रति जागरूकतां नाशयति, उत्साहं श्लथयति च।

अत एव ज्ञातव्यं यद् धैर्येण, सहिष्णुतया, सौजन्येन साकं निर्भयताऽप्येकोऽपेक्षित आवश्यक उपादेयः सद्गुणोऽस्ति। भीरून् जनान् अधिकं भाययन्ति लोकाः। भीतान् मनुष्यान् प्रत्यन्येऽपि भीतयः शीघ्रमुपागच्छन्ति। अतो न भेत्तव्यमस्माभिः स्वीकर्त्तव्या च सदा निर्भयता।

## ८४. पूजाभिलाषा

*नो पूयणं तवसा आवहेज्जा ॥*

— सूत्रकृताङ्गसूत्रम् १/७/२७

कुर्वन्तु कल्पनाम् । एकाऽस्ति नौका । कतिपये यात्रिणो नद्याः पारं गन्तुं तस्मिन् आरूढाः । तरन्ती नौका नद्या मध्यभागं गता ।

तस्मिन्नेव काले सहसा यात्रिणः पश्यन्ति यन्नौकायां शनैः शनैः जलं प्रविशति। तेन नौका नचिराज्जलमग्ना भवितेति सम्भावना जायते। तत्कालमेव तानि छिद्राणि तेऽन्विष्यन्ति यैर्जलस्य प्रवेशो भवति । ततो विविधोपायैस्तानि रुन्धन्ति । रुद्धैर्नौकायाश्छिद्रैर्जलमन्तर्नागच्छतीति दृष्ट्वा पूर्वप्रविष्टजलम् स्वीयाभ्यां द्वाभ्यामपि हस्ताभ्यां यात्रिणो बहिर्निस्सारयन्ति।

इत्थमेव आत्माऽपि आदौ आस्रवान् संवृत्य अनन्तरं सञ्चितं कर्मसमुदायं नाशयितुम्; शास्त्रीयशब्देषु कर्मणां निर्जरां कर्त्तुम् तपस्तनोति। यतः प्रभुणा महावीरस्वामिना प्रतिपादितमस्ति यत्तपसा भवकोटिसञ्चितकर्मसमूहस्य निर्जरा भवति । (भवकोडीसंचियं कम्मं तवसा निज्जरिज्जइ ॥ — आगमोपदेशः )

कर्मनिर्जरा एव तपसामुद्देश्यः। उद्देश्यस्यैतस्य पूर्त्तये साधकैस्तपसामनुष्ठानं कर्त्तव्यम्, नान्यथा । लोकैः प्रशंसा, कीर्त्तिः, प्रतिष्ठा, पूजा वा प्राप्ता भवेदित्याशया कृतं तपः सीमितमेव फलं ददाति, न निर्जरादिकं यथेष्टम्। अतः तपसा पूजां नाभिलषेत् ।

# ८५. जातिविशेषः

*सक्खं खु दीसइ तवो विसेसो*
*न दीसई जाइविसेस कोई॥*

*—उत्तराध्ययन सूत्रम् १२/३७*

अमुकः पुरुषः तपस्व्यस्ति न वेति सुगमतया ज्ञायते तस्य शरीरस्य कृशतां पीनतां वाऽवलोकनानन्तरम्।

तपसा तपस्विनः शरीरं कामम् भवेत् क्षीणम्, परन्तु मनस्तस्य न भवति क्षीणम्। तस्य मुखमण्डले चन्द्रवत् सौम्यता तेजस्विता प्रभावशीलता च विराजमाना दृश्यते। तपस्वी सदाचारी भवति, सद्गुणानां साधको भवति। इत्थं तपसः परिणामेन या विशेषता समुत्पन्ना भवति सा प्रत्यक्षं दृश्यते जनैः।

परन्तु मनुष्येष्वस्माभिः जातिभेदस्य मृषा कल्पना कृताऽस्ति। अहंकारस्य पोषणाय अथवा सामाजिकव्यवस्थायै विभिन्नकार्येषु आजीविकासु वाऽऽधृता या जातयो मान्यतां प्राप्ताः सन्ति ताः केष्वपि मानवेषु न दृश्यन्ते। यदि कोऽपि चाण्डालः, शूद्रः, हरिजनः, चर्मकारः, महत्तरः वा स्वच्छं सुन्दरं वेषम् धारयन् मस्तके दीर्घां शिखां ललाटे च तिलकं दधानः कथयेद् यद् ''अहं ब्राह्मणोऽस्मि'' इति तर्हि कः केन लक्षणेन तं प्रत्यभिज्ञातुमर्हेत् यत्स ब्राह्मणो नास्तीति? न कोऽपि। यतः मनुष्यमात्रस्यैकैवास्ति गतिः। मनुष्यगतौ जातिभेदाः कल्पिताः सन्ति। अतो मनुष्यशरीरे न दृश्यते जातिविशेषः।

# ८६. त्यागी

*अच्छंदा जे न भुंजंति*
*न से चाइत्ति वुच्चइ ॥*

*— दशवैकालिकसूत्रम् २/२*

कुर्वन्तु कल्पनाम् : द्वौ पुरुषौ स्तः । तयोः प्रत्येकस्य पार्श्वे रूप्यकाणां शतमस्ति। प्रथमः स्वीयरूप्यकेभ्यः पञ्चाशद् रूप्यकाणां दानं करोति। द्वितीयस्य पुरुषस्य पञ्चाशद् रूप्यकाणि केनचिच्चौरेणापहृतानि। साम्प्रतम् प्रत्येकस्य पुरुषस्य समीपे पञ्चाशत्पञ्चाशद् रूप्यकाणि अवशिष्टानि सन्ति तथापि प्रथमः पुरुष एव त्यागी न द्वितीयः। कथमेतत्? यतः प्रथमस्य त्यागः स्वेच्छयाऽभवत् । द्वितीयस्य त्यागस्तु विवशतयाऽभवत्।

अन्यमप्येकं दृष्टान्तं पश्यन्तु। एकस्य पुरुषस्य समीपे भोज्यसामग्रीं क्रेतुं नास्ति धनम्। द्वितीयस्य समीपे एतावद् धनमस्ति येन स मिष्टान्नं अपि क्रेतुं शक्नोति; किन्तु तेनानशनव्रतमनुष्ठितम् । द्वावपि पुरुषौ समानावेव क्षुधितौ स्तः, तथापि तयोः प्रथमो विवशतया द्वितीयश्च स्वेच्छया क्षुधितोऽस्ति, अतो द्वितीयः त्यागीति कथ्यते, न प्रथमः ।

द्वाभ्यामप्येताभ्यां दृष्टान्ताभ्याम् सिद्धं भवति यद् यो मनुष्यः स्वेच्छया कामभोगविषयान् त्यजति स एव वस्तुतस्त्यागीति कथयितुं शक्यते। अप्राप्तां भोगसामग्रीं यो न भुनक्ति, स कदापि त्यागीति विशेषणधारको भवितुं नार्हति।

# ८७. मा त्रासयन्तु

*न य वित्तासए परं॥*

*—उत्तराध्ययनसूत्रम् २/२०*

कष्टम्! अहो, कियदस्ति कुत्सितमेतद् वस्तु? नाम निशम्यापि मनसि महत्कष्टस्यानुभूतिर्भवति। एतत्कः कामयते? न कोऽपि। सर्वेषामपि प्राणिनां कृते कष्टमतीवानिष्टमस्ति।

किन्तु कदाचिदापतेत्कष्टं तर्हि किं स्यात्? दीना दुर्बलाः साहसविहीनास्तु रोदं रोदं तद् भुञ्जते; किन्तु ये वीराः सबलाः साहसिनः पुरुषाः सन्ति ते तन्निर्जरायाः कारणं मत्वा सोत्साहं सहन्ते।

तथापि निश्चितमेतद् यत्कोऽपि मनुष्यः कष्टानां कामनां न करोति। सर्वेऽपि प्राणिनः सुखमेवेच्छन्ति, न दुःखम्।

सन्तापः परीषहः, त्रासः, वेदना, दुःखम्, कष्टम् इति पर्यायवाचिनः शब्दाः सन्ति। अस्मभ्यं यथा कष्टं अनिष्टं, अप्रियं, अरोचकं, प्रतिकूलं च प्रतीयते तथैवान्येभ्योऽपि तदनिष्टं, अप्रियं, अरोचकं, प्रतिकूलं च प्रतीयते।

अत एव ये केवलज्ञानिनः वीतरागदेवाः तीर्थङ्कराः सर्वजीव-हितैषिणोऽर्हन्ता सन्ति तेषामेष, आदेशः, उपदेशः, सन्देशः, परामर्शश्चास्ति यत् संसारेऽस्मिन् निवसन्तं स्थितं कमपि जीवं मनसा वचसा कायेन वा कदापि क्वापि मा त्रासयन्तु।

# ८८. मा लिहन्तु निष्ठीवम्

*से मइमं परिन्नाय मा य हु लालं पच्चासी*

*- आचाराङ्गसूत्रम् १/२/५*

स्वचक्षुषी उद्‌घाट्य यदा साधको जगति पश्यति यद् जना विषयभोगं कुर्वाणा रुग्णा भवन्ति वैद्यानां चिकित्सकानां वा द्वाराणि खटखटायन्ते, पुनः पूर्ववत् स्वास्थ्यं प्राप्तुं चिकित्सायाम् प्रचुरधनव्ययं कुर्वन्ति, कृतेऽपि प्रचुरे धनव्यये पूर्णतया स्वस्था न भवन्ति।

शरीरं व्याधिमन्दिरमिति समीचीनमेवोच्यते। एकस्य पश्चादन्यो रोगः शरीरे प्रादुर्भवत्येव। रोगपरम्परामेनां दृष्ट्वा भोगेभ्यो विरक्तिर्भवति। अस्मिन्नन्तराले प्रव्रजितानामाचार्याणामुपदेशस्य श्रवणावसरः प्राप्तः भवेत् चेद् भोगानां त्यागं कृत्वा स विरक्तः श्रमणत्वमङ्गीकरोति।

परन्तु श्रमणजीवनस्य काठिन्यम्, सुविधाराहित्यम्, कष्टसमष्टिं चावलोक्य पूर्वभुक्तभोगान् स्मरति तथा पुनस्तान् प्रति आकृष्टो भवति। भोगानां रोगजनकतां विस्मृत्य स पुनस्तान् मनसा कामयते। भोगसामग्रीमितस्ततोऽन्विष्यन् स प्राप्त्यभावे भवति चिन्तातुरः शोकमग्नो विषण्णो हताशो निरुत्साहः। तं पुनः त्यागमार्गे स्थिरं कर्तुकामा आचार्या उपदिशन्ति यत्त्यक्तविषयभोगानां कामनां मा कुर्वन्तु, निष्ठीवं मा लिहन्तु।

# ८९. तृष्णात्यागः

*दुक्खं हयं जस्स न होई मोहो*
*मोहो हओ जस्स न होई तण्हा ॥*

*— उत्तराध्ययनसूत्रम् ३२/८*

तृष्णैका तरुणायते इति वर्णयन् कश्चित्कविः तृष्णाया महत्त्वं प्रत्यपादयत् । सा महापुरुषाणामपि धैर्यं नाशयति, चक्षुष्मन्तमपि चक्षुर्हीनम् (अन्धम्) करोति । कृष्णायां निशायां निकटस्थं वस्तु यथा चक्षुष्मन्तोऽपि द्रष्टुं न शक्नुवन्ति तथैव विस्तृतायां तृष्णायां मनुष्या निकटस्थं प्रचुरमपि धनं द्रष्टुं न शक्नुवन्ति । अतस्तेऽधिकाधिकं धनं लब्धुं प्रयतन्ते । यावज्जीवं तैलयन्त्रस्य बलीवर्दवत्ते श्रमं कुर्वन्ति ।

तृष्णाया उपस्थितेः कारणात् प्राप्तेषु वस्तुषु ममताऽपि शनैः शनैः विस्तृता भवति । ममताया मोहस्य वा बन्धनेन ते एव मुक्ता भवितुमर्हन्ति येषां तृष्णा मूलत एवनष्टा ।

मोहस्य बन्धनमेव दुःखस्यैकं महत्कारणमस्तीति जानन्ति सुज्ञाः। अत एव ते तद्बन्धनं मोचयितुम् उपदिशन्ति सर्वान् जनान् ।

मोहपाशबद्धाः संसारिणो जीवाः चतुरशीतिलक्षयोनौ जन्म ग्राहं ग्राहं परिभ्रमन्ति ।

कथनस्य तात्पर्यमेतदेवास्ति यद् दुःखादात्मानं रक्षितुं मोहपाशः त्याज्यः तथा मोहपाशादात्मानं रक्षितुं तृष्णा त्याज्या । एषा नीतिरस्मत्कृते श्रेयस्करी ।

# ९०. दुःखमविभाज्यम्

*अन्नस्स दुःखं अन्नो न परियाइयति ।*

*— सूत्रकृताङ्गसूत्रम् २/१/१३*

प्रमादवशात् त्रुटीः कुर्वन् मानवो दुःखान्यनुभवति । दुःखं त्रुटेरनिवार्यं फलम् । त्रुटिकर्त्ता दुःखफलादात्मानं रक्षितुमक्षमो भवति ।

यथा वयं मुद्रा उपयुक्तवस्तुनि च कुटुम्बिषु मित्रेषु वा विभाजयितुं समर्थाः तथा दुःखं तेषु विभाजयितुं न समर्थाः । न तु स्वीयं दुःखं अन्येषु वितरितुमर्हामि न त्वन्यदीयं दुःखं स्वयं गृहीतुमर्हामिः ।

यदि वयं शास्त्राणाम् अध्ययनं कुर्मः तर्हि वयमेव विद्वांसो भवितुमर्हामिः। अन्ये पुरुषा अस्माकमध्ययनेन विद्वांसो भवितुं नार्हन्ति । तथैवान्येषां पुरुषाणां शास्त्राध्ययनेन वयं विद्वांसो भवितुं नार्हामिः ।

एवमेव अन्येषां दुःखं वयं भोक्तुम् अस्मदीयं दुःखं चान्ये भोक्तुं असमर्थाः।

यो जलं पिबति तस्यैव पिपासा शाम्यति । यः खाद्यवस्तूनि भुङ्क्ते, तस्यैव क्षुधा शाम्यति । अन्यैः पुरुषैः गृहीतेन भोजनेन, पीतेन जलेन नाऽस्मदीया क्षुधा पिपासा च शान्ता भवेत् ।

इत्थमेव यः त्रुटिं करोति स एव तस्या दुःखरूपं दुष्फलं प्राप्नोति। अन्येन प्राप्तं दुःखमन्यो मनुष्यो नाऽनुभवितुमर्हति । स्वीयं स्वीयं दुःखमेव सर्वे जीवाः स्वयमनुभवन्ति ।

# ९१. दुःखं स्वकृतमेव

*अत्तकडे दुक्खे नो परकडे ॥*

*— भगवतीसूत्रम् १७/५*

सर्वे प्राणिनः स्वीयं स्वीयं कृतकर्मफलं भुञ्जते। कोऽप्यन्यो जीवः कमप्यन्यं जीवं सुखदुःखानुभूतिं कारयितुं नार्हति। एष राद्धान्तोऽस्मान् स्वकार्याणां कृते उत्तरदायिनः कुरुते।

यदा वयं ज्ञास्यामो यदस्मत्सुखमस्मासु निर्भरमस्ति, तदा शुभ-कार्याणि कृत्वा वयं सुखाप्राप्तिप्रयासं कथं न करिष्यामः ?

इत्थमेव यदि वयं विश्वसिमो यद् अस्मद्दुःखमस्मासु निर्भरमस्ति तर्हि वयं दुष्कार्यपरिवर्जनस्य प्रयासं कस्माद् न करिष्यामः ? अवश्यमेव करिष्यामः।

ये जना अनियमितं भोजनं गृह्णन्ति, गरिष्ठभोज्यपदार्थानदन्ति, स्वादलोलुपत्वादधिकाधिकवस्तूनि भक्षयन्ति, ते विविधरोगान् स्वशरीरेषु निवासार्थं निमन्त्रयन्ति— इति कथयितुं शक्यते।

अपथ्यसेवनेन यदा ते रुग्णा भवन्ति तदा सुचिरकालाय पर्यङ्केषु शेरते। नाना कष्टानि चानुभवन्ति। ते यदि चिन्तयेयुस्तर्हि स्वयं जानीयुर्यत् स्वदोष एवं मूलं सर्वकष्टानाम्। यदा ते एतज्ज्ञानीयस्तदा न पतेयुः कदापि स्वादलोभजाले। एवमेव तत्तत्कष्टकारणं स्वदोषं विज्ञाय तस्य पुनरावृत्तिं न कुर्युः।

इत्थमेतद् वदन्ति शास्त्रकारा यदात्मकृतं दुःखं नो परकृतम्— इति सदा मन्तव्यम्।

# ९२. दुःखदायकता

*सव्वे कामा दुहावहा ॥*

*— उत्तराध्ययनसूत्रम् १३/१६*

मनुष्याः भवन्ति पञ्चेन्द्रियाः,पञ्चेन्द्रियाणां धारकाः। स्पर्शेन्द्रियम्, रसनेन्द्रियम्, घ्राणेन्द्रियम्, चक्षुरिन्द्रियम्, श्रोत्रेन्द्रियम् इति नामानि सन्ति पञ्चानामिन्द्रियाणाम्। प्रथमेन्द्रियेण सुकोमलस्पर्शवन्ति वस्तूनि, द्वितीयेन्द्रियेण सुस्वादूनि वस्तूनि, तृतीयेन्द्रियेण सुगन्धयुतानि वस्तूनि, चक्षुर्थेन्द्रियेण सुन्दररूपवन्ति वस्तूनि तथा पञ्चमेन्द्रियेण मधुरस्वरोत्पादकानि वाद्यानि कामयन्ते जनाः।

कस्यापि वस्तुनः कामना मनस्यशान्तिं जनयति। यावत्कामनायाः पूर्त्तिर्न भवति तावत्सा मानसं दहन्ती शान्तिं सन्तोषं सुखञ्च भस्मीत्करोति।

कामनायाः पूर्त्या भवति तृप्तिरपि; किन्तु सा स्थायिनी न भवतीति जानन्ति जनाः।

कामनायाः पूर्त्तेः प्रयासे, यावान् कालः श्रमश्च व्यतीतौ भवतः, तयोरनुपाते न अनुभूयमानं सुखमतीव स्वल्पं भवति।

स्वल्पस्य क्षणिकस्य सुखस्य कृते प्रचुरश्रमस्य विशालकालस्य च नाशो न स्याद् बुद्धिमत्तापूर्णः।

अत एव मनीषिभिरनुभविभिः ज्ञानिभिर्महात्मभिरेवमुपदिष्टम्, एवं प्रतिपादितम्, एवममुद्घोषितम् यत्सर्वेऽपि कामा दुःखदायकाः सन्ति।

## १३. दुरुक्तम्

*वाया दुरुत्ताणि दुरुद्धराणि*
*वेराणुबंधीणि महब्भयाणि ॥*

*— दशवैकालिकसूत्रम् ९/३/७*

अस्माकं मुखान्निस्सृतानि वचनानि भवन्ति द्विविधानि। कानिचित् सूक्तानि सुभाषितानि वा जीवनशुद्धिप्रेरकाणि भवन्ति। विपरीतमस्माद् दुरुक्तानि कुभाषितानि वा क्षोभजनकानि कलहकारीणि च सिद्धयन्ति।

अस्माँल्लक्ष्यीकृत्य कथितं निन्दावाक्यं, कृतं लज्जास्पदं गालिदानं वा यथाऽस्मभ्यं न रोचते तथा तदन्येभ्योऽपि नैव रोचते। अतः कस्मैचिद्पि न प्रयोक्तव्यानि कदापि दुर्वचनानि।

दुरुक्तं कीदृशं भवतीति चिन्तयद्भिः शास्त्रकारैस्तस्य तिस्रो विशेषताः प्रकटीकृताः। इमास्ताः —

१. दुरुद्धरत्वम्। शरीरस्याङ्गे लग्नो बाणः सरलतया निष्कासयितुं शक्यते; परन्तु हृदि लग्नो वाग्बाणो भवति दुरुद्धरः। शरीरे कृतं व्रणं शनैश्शनैर्नश्यति, परन्तु दुरुक्तजन्यं हृद्व्रणं सुचिरं तिष्ठति। तस्य विनाशो दुस्साध्यः।

२. वैरजनकत्वम्। यं वयं निन्दामस्तस्य मनसि शत्रुता समुत्पन्ना भवति।

३. भयोत्पादकत्वम्। यं प्रति दुरुक्तानि प्रयुज्यन्ते स ह्यस्मासु दुस्सह्यसङ्कटानां वृष्टिं कर्तुमर्हति।

अतः कदापि कस्मैचिदपि न प्रयोक्तव्यम् दुरुक्तम्।

# १४. दुर्गतिः

*आसुरीयं दिसं बाला*
*गच्छन्ति अवसा तमं ॥*

*— उत्तराध्ययनसूत्रम् ७/१०*

येषु मनुष्येषु सम्यग्बोधः (हिताहितविवेकः) नास्ति ते विषयाणां परतन्त्रतामङ्गीकृत्य दुर्गतिमाप्नुवन्ति।

मनुष्यः शुभाशुभकर्माणि कर्त्तुं स्वतन्त्रः, परन्तु तेषां विपाके शुभाशुभफलानि भोक्तुं परतन्त्रोऽस्ति। यत्वज्जीवः स्वकृतसमस्तकर्मणां शुभाशुभफलानि न भुनक्ति, तावत्तस्य मुक्तिर्न भवति संसारात्।

मुक्तिं प्राप्तुं जीवस्य, अजीवस्य, पुण्यस्य, पापस्य, आस्रवस्य, संवरस्य, बन्धस्य, निर्जरायाः, मोक्षस्य चेत्थं नवानां तत्वानां सम्पूर्णं यथार्थं ज्ञानमावश्यकम्। योऽस्ति नवतत्त्वज्ञाता स एवावगच्छति यद् ''आत्मा'' सर्वोत्तमं तत्त्वमस्ति। तत्तत्त्वं चेतनामयं ज्ञानमयं भावनामयं चरित्रमयं स्वतन्त्रञ्चास्ति।

स एतदपि जानाति यत्कर्म जडं(निर्जीवम्) ज्ञानहीनं भावनाहीनं चारित्रहीनं चास्ति। आत्मनो ज्ञान-दर्शन-चारित्रसाधनायां बाधकञ्च भवति कर्म।

इत्थमात्मनश्चैतन्यस्य कर्मणां जडत्वस्य च ज्ञानं सद्गतिं प्रति प्रेरयति भव्यजीवान्। एतद्विपरीतमज्ञा जीवा दुर्गन्तिं प्रति प्रगतिपरायणा भवन्ति विवशतया।

# ९५. दुर्लभा श्रद्धा

*सद्धा परमदुल्लहा ॥*

*— उत्तराध्ययनसूत्रम् ३/९*

धर्मे श्रद्धा स्याच्चेत् स्वार्थस्य सङ्कुचितं विचारं अकृत्वाऽपि मनुष्यः स्वकर्त्तव्यारूढो भवितुमर्हति । परन्तु एषा श्रद्धा कथमुत्पन्ना स्यात् ? तस्या आधारः कः स्यात् ?

केचिज्जनाः परम्परायामाधृतां कुर्वन्ति श्रद्धाम् । कथयन्ति यद् अमुकं सिद्धान्तं शास्त्रेषु लिखितमस्ति अथवा पूर्वजैः स्वीकृतमस्तीति वयं मन्यामहे। परम्पराया एष आधारोऽनुचितः । अस्मिन् वञ्चना सम्भवेत् । मनुष्यःसत्येन वञ्चितः स्यात् ।

अन्ये जना विवेकाधृतां कुर्वन्ति श्रद्धाम् । किं शुभम् किं चाशुभम्? किं हितकरम् किञ्चाहितकरमस्ति? किमुपादेयं किमनुपादेयमस्ति अस्मभ्यम्? इति विचार एव विवेकः । एष एव सम्यग्ज्ञानमित्युच्यते । विवेकस्याधारेण या श्रद्धा स्थाप्यते सैवास्माकं हितकरी सिद्ध्यति । सैव श्रद्धा स्थायिनी यथार्था च ।

यावत्सम्यग्ज्ञानं न जायते तावत् कस्मिन्नपि सिद्धान्ते सुहृदि वा वयं न विश्वसिमः । धर्मस्य विषयेऽपि एवमेवावगन्तव्यम् । धर्मः सदाचारं सद्व्यवहारं सौजन्यं मानवतां मृदुतां परोपकरणं च सूचयति । धर्मो धारयति, समाजम् व्यवस्थापयति। धर्मस्वरूपस्य ज्ञानं विना तस्मिन् श्रद्धाऽतीव दुर्लभा।

# १६. दुष्करत्वम्

*इह लोए निप्पिवासस्स*
*नत्थि किंचिवि दुक्करं ॥*

*— उत्तराध्ययनसूत्रम् १९/४५*

अस्मिंल्लोके स्पृहा, आसक्तिः, वासना, इच्छा, कामना वा मोक्षमार्गपथिकस्य कृते प्रबलतमा बाधाऽस्ति। योऽनासक्तो नास्ति, स स्वकर्त्तव्यपालनं कर्त्तुं न शक्नोति। यस्मिन् मनसि स्वार्थ एव विलसति, स परमार्थ परोपकारं वा कर्त्तुं न शक्नोति।

अमुकानां मनोहरवस्तूनां प्राप्तिः, अर्थात् पञ्चेन्द्रियप्रिय-विषयसामग्रीसञ्चय एव यस्य लक्ष्यं भवति स मनोवाक्कायधनादिकं सर्वस्वं नियोजयति तल्लाभार्थम्। आत्मकल्याणस्यात्मोन्नतेर्वा मार्गं गन्तुं न चिन्तयति किञ्चिदपि सः। स्वार्थसाधनायां लीनः परमार्थसाधनां कर्त्तुं सन्नद्धः कदापि न भवति।

विपरीतमस्माद् निस्पृहाः, अनासक्ताः, वासनाविहीनाः, निरीहाः, निष्कामा वा पुरुषाः सर्वाणि कार्याणि कर्त्तुं सक्षमा भवन्ति।

निरीहः साधकः कस्मिन्नपि विषये आसक्तो न भवति, अतस्तस्य किमपि स्वार्थकार्यं न भवति, स सर्वथा निष्कामो भवति अथवा स्वपरकल्याणमतिरिच्य काञ्चिदपि अन्यां कामनां न करोति सः।

अत निष्कामस्य मनुष्यस्यो कृते सर्वं सुकरम्, नास्ति कुत्रापि दुष्करत्वम्।

# १७. दुष्करा तपस्या

*असिधारागमणं चेव*
*दुक्करं चरिउं तवो ॥*

— *उत्तराध्ययनसूत्रम् १९/३८*

तपस्या भवति द्विविधा— बाह्या प्रथमा, आभ्यन्तरा द्वितीया। बाह्यं तपः प्रत्यक्षं दृश्यतेऽत एव बाह्यतपस्वी शीघ्रं भवति विख्यातः, किन्तु आभ्यन्तरतपस्वी तादृशो न भवति।

षड्विधं भवति बाह्यं तपः— अनशनम्, ऊनोदरिता, वृत्तिसंक्षेपः, रसपरित्यागः, कायक्लेशः, प्रतिसंलीनता च।

एवमेवाभ्यन्तरं तपोऽपि भवति षड्विधम्— प्रायश्चित्तम्, विनयः, वैयावृत्यम्, स्वाध्यायः, ध्यानम्, कायोत्सर्गश्च।

इत्थं सम्भूय तपो द्वादशधा भवति। एषु तपस्सु प्रथमम् बाह्यतपोऽनशनं ये कुर्वन्ति ते एव सन्ति तपस्विन इति लोका अवगच्छन्ति अद्यत्वे। एषा तेषां भ्रान्तिः। यतस्तदतिरिक्तान्यपि एकादश तपांसि भवन्ति। तेषां कर्त्तारोऽपि महान्तस्तपस्विनः।

सूक्त्याऽनया प्रतिपादितं ज्ञानिभिः यत्प्रत्येकं तपोऽतिदुष्करं भवति।

असिधारा भवति कियती तीक्ष्णा ? अङ्गुल्याः स्पर्शमात्रेण तया चर्म छिन्नं भवति। तस्माद्रक्तं निस्सरति तूर्णमेव। असिधाराया उपरि विचरणं यावत् कठिनं दुष्करञ्चास्ति, तपश्चरणमपि तत्वदेव कठिनं दुष्करञ्च।

# १८. कुशीलस्थलवर्जनम्

*कुसीलवड्ढणं ठाणं*
*दूरओ परिवज्जए॥*

*— दशवैकालिकसूत्रम् ६/५९*

शीलम् स्वभावः । यस्य पुरुषस्य स्वभावः प्रशंसनीयः, स सुशीलः। योऽभिलषति यत्सर्वे तस्मिन् प्रेम कुर्युः तं प्रशंसेयुः, स सदा सुशीलतामङ्गीकरोति ।

शीलम् आचरणम् । एनमर्थमाश्रित्य यः सदाचारपरायणः स एव सुशील इत्युच्यते । कदाचारेण दुराचारेण वा स दूरं स्थातुं यतते ।

कुशीलाद् आत्मानं रक्षितुम् तानि कारणानि त्यक्तव्यानि सन्तीति मन्यते यैः कुशीलस्य वृद्धिर्भवति । दुष्टैः दुराचारिभिः दुर्जनैः साकं यो निवसति स दुष्टो भवति । निरन्तरं कुसंगत्या कोऽपि कुशीलो भवितुमर्हति । यतस्तस्य दुराचरणं क्रमशो वर्धते ।

द्वितीयं कारणम् किम् ? उच्यते दुष्टानाम्, चौराणाम्, अत्याचारिणाम् च ताः कथाः श्रूयन्ते चेत् यासु तेषां सुखस्य समृद्धेश्च सुविस्तृतं वर्णनं स्यात् तर्हि तेन दुराचारस्य प्रेरणा प्राप्यते ।

ज्ञानिनः शास्त्रकारा अस्मान् उपदिशन्ति यत्कुशीलवर्धकानि यान्यपि कारणानि स्युस्तानि सर्वाणि दूरत एव परिवर्जनीयानि, कदापि न सेवनीयानि।

## ९९. वित्तं न त्रायते

*वित्तेण ताणं न लभे पमत्ते*
*इमम्मि लोए अदुवा परत्था ॥*
*—उत्तराध्ययनसूत्रम् ४/५*

साहसं वीरता वाऽस्मान् रक्षति, न कायरता।

**नैके जना विचारयन्ति यद्** धनेनास्माकं रक्षा भवति; अतस्ते धनमेव रक्षन्ति। वित्तं रक्षति रक्षितमिति ते मन्वते। परन्तु ते कथमेवं न विचारयन्ति यद् यस्य धनस्य सुरक्षा अन्यैर्जनैः क्रियते तद् धनं स्वयं कथमन्यान् रक्षितुं समर्थो भवेत्?

धनार्जनमप्यतीव कष्टसाध्यम्। अर्जितधनस्य सुरक्षाऽपि कष्टकरी। सुरक्षितधनस्य व्ययोऽपि कष्टदायकः। चोरितं नष्टं वा धनं कष्टदम्। धनस्य सुरक्षायाश्चिन्ताऽपि निरन्तरं ददाति मानवेभ्यः कष्टम्। इत्थं धनस्य पूर्वं(आदौ) पश्चात् (अन्ते) च कष्टान्येव दरीदृश्यन्ते।

विवेकिनो मनुष्याः स्वीयं समुपार्जितं धनं परोपकारकार्येषु व्ययीकृत्य परलोकं सुधारयन्ति तथा अस्मिंल्लोकेऽपि प्रतिष्ठां प्राप्नुवन्ति।

परन्तु ये नराः प्रमादपराधीनाः सन्ति ते स्वोपार्जितधनस्य कामभोगेषु व्ययं कुर्वन्ति। अतस्तेषाम् धनस्योपयोगः परमार्थे न भवति, केवलं स्वार्थे भवति। तेषां धनं न अस्मिंल्लोके न च परलोके तान् रक्षितुं सक्षमं भवति।

# १००. धनेन किम् ?

*धणेण किं धम्मधुराहिगारे ?*

*—उत्तराध्ययनसूत्रम् १४/१७*

मनुष्या धनेन धर्मं कुर्वन्ति अर्थात् परोपकारकार्याणि कुर्वन्ति; परन्तु धर्मस्य कृते धनमनिवार्यम् नास्ति। साधवो मुनयः सन्न्यासिनो भवन्ति गृहत्यागिनः। तेषां सन्निधौ धनं न भवति, तथापि ते धर्मात्मानस्तु भवन्त्येव। न केवलमेतदपितु ते धर्मप्रचारका धर्मोपदेशका भवन्ति। समनोवाक्कायं जीवनं परेषामुपकाराय योजनमेव धर्मस्य कृतेऽनिवार्यमस्ति, न धनम्।

कदाचित्तु धनं धर्मे बाधकमपि स्यात्। महात्मना यीशुमसीहेन एकदोपदिष्टमासीद् यत्सूचिच्छेदतः क्रमेलको निस्सरितुं शक्नोति; परन्तु धनवान् स्वर्गद्वारतो निस्सरितुं नैव शक्नोति अर्थाद्धनवतः स्वर्गप्रवेशोऽसम्भवः। कथमेतत् ? उच्यते। धनं यथा यथा वर्धते तथा तथा मनुष्येषु अहङ्कारोऽपि प्रवर्धते। प्रवृद्धोऽहङ्कारः सर्वानपि सद्गुणान् नाशयति। नष्टेषु सद्गुणेषु कल्याणं कदापि न सम्भवेत्।

वस्तुतो धनं द्विधारयुतखड्गवत् धर्मस्य साधकं बाधकञ्चापि भवितुमर्हति। धर्मसाधना स्वपरकल्याणस्य सुविशुद्धायां मनोवृत्तौ निर्भराऽस्ति। सन्निधौ धनमस्तु वा न वा। विवेकयुक्ता मानवा धनस्य सदुपयोगं कुर्वन्ति; किन्तु धनस्य कृते धनस्य कृते स्वगौरवं न नाशयन्ति। धनं विनापि धर्मं साधयन्ति।

# १०१. धर्मस्थानम्

*सोही उज्जुअभूयस्स*
*धम्मो सुद्धस्स चिट्ठइ ॥*

*—उत्तराध्ययनसूत्रम्*

ऋजुभूतः सरलः। यस्मिन् मनुष्ये सरलता भवति, तस्यैवात्मा शुद्धः। विपरीतमस्माद् यस्य जीवने कुटिलता भवति, तस्यात्मशुद्धिर्न सम्भवेत्।

अकुटिलः सरलः सज्जनः केनापि सुगमतया वञ्च्यते, किन्तु स स्वयं न वञ्चयते कमपि। कुटिलो मनुष्यः केनापि सुगमतया न वञ्च्यते; परन्तु स्वयं स नैकान् मानवान् वञ्चयते।

सरलः सभ्यः शिष्टः सज्जनः कस्मैचिदपि न कुप्यति। कुपितोऽपि स न करोति कटुवचनप्रयोगम्। कृतेऽपि कटुवचनप्रयोगे स कस्मैचिद् अप्रियं अनिष्टं अहितं वा न चिन्तयति। चिन्तितेऽप्यनिष्टे स्वमुखान्न जल्पत्यनिष्टम्। जल्पितेऽनिष्टे तत्कालम् लज्जितो भवति स। यतस्तस्यात्मनि शुद्धिर्निर्मलता वा वसति।

यदि कोऽपि मानवः स्वजीवनं स्वात्मानं वा शुद्धं कर्त्तुमिच्छति तर्हि तेन सरलताया ऋजुताया वा साधना कार्या। कुटिलतायाः सम्पर्कः सर्वथा त्याज्यः। धर्मात्मा भवितुं शुद्धिरतीवापेक्षणीया। तदर्थं शुद्धेः सिद्धिः करणीया। शुद्धिमत्सु मनुष्येषु एव धर्मस्तिष्ठति, नाशुद्धिमत्सु।

अत आत्मनः सारल्यं सदा स्थिरं भवेद् इति ध्यातव्यम्।

# १०२. वन्दना

*जत्थेव धम्मायरियं पासेज्जा ।*
*तत्थेव वन्दिज्जा नमंसिज्जा ॥*

*— राजप्रश्नीयसूत्रम् ४/७६*

आचारस्य सदाचरणस्य वा प्रेरको भवत्याचार्यः ; प्रेरको भवति प्रेरितेभ्यः प्रणम्यः । धर्मस्य स्वकीयकर्त्तव्यस्य वा प्रेरणादाता धर्माचार्यः कथ्यते ।

सदाचारिण एव सदाचरणं प्रेरयन्ति, न दुराचारिण इति निश्चितम्। सदाचारिणो विदन्ति यत्सत्स्वाचरणेषु बहूनि सङ्कटानि आपतन्ति । ते धैर्येण सहिष्णुतया च सङ्कटानां पारं गन्तुमिच्छन्ति, प्रयतन्ते, गच्छन्ति च । एवं संयमसाधकानां मार्गदर्शनं कर्त्तुमर्हन्ति ।

यैर्मार्गदर्शनं प्राप्यते ते महान्तः पुरुषा अस्माकमुपकारिणः । तेषामुपकाराणां प्रत्युपकारं वयमाजीवनं सेवमाना (तेषां सेवां कुर्वाणाः) अपि कर्त्तुं न पारयामः । अतस्तेषां प्रति कृतज्ञता अस्मदीये मनसि सदैव निरन्तरं जागृता स्यादित्यावश्यकम् ।

सा कृतज्ञता स्वकार्येणापि प्रकटीकरणीया । एतदर्थं नियमस्यास्य पालनं निर्दिष्टमस्ति यद् यत्रापि स्वकीया धर्माचार्या दृष्टिपथम् आगच्छेयुस्तत्रैव तत्कालं ते वन्दनीया नमस्करणीयाः ।

# १०३. शुभाजीविका

*धम्मेणं चेव वित्तिं कप्पेमाणा विहरन्ति ॥*

*— सूत्रकृताङ्गसूत्रम् २/२/३९*

जीवितुम् अन्नस्य जलस्य चावश्यकताऽनुभूयते। कौटुम्बिक-सदस्यानां पोषणार्थं धनस्यावश्यकता प्रतीयते। मुनीन् विहाय मनुष्येषु ये गृहस्थाः सन्ति तेषां कृतेऽस्मिन् संसारे पदे पदे धनमावश्यकम् प्रतिभाति। समीचीनमेवैतदुच्यते यत् कस्यचित्साधोः समीपे यदि एकमपि रुप्यकमस्ति तर्हि तस्य जीवनं नगण्यम् तथा यदि कस्यचिद् गृहस्थस्य समीपे नास्ति रुप्यकमेकमपि तर्हि तस्य जीवनं नगण्यम्।

धनसञ्चयार्थं यत् किञ्चित् कार्यं क्रियते, या प्रवृत्तिः स्वीक्रियते सा वृत्ति (आजीविका) इत्युच्यते। आजीविकायाम् (वृत्तौ) हिंसा न स्यात्, असत्यं न स्यात् छलं न स्यात्, दुष्कृतं न स्यात्। एवंविधा या वृत्तिः सा धर्मानुकूलाऽस्तीत्युच्यते।

धर्मः, अर्थः, कामः, मोक्षश्चेति चत्वारः पुरुषार्थाः सन्ति। एतेषु प्रथमो धर्मोऽस्ति। तत्पश्चाद् द्वितीयोऽर्थः। अनेन किं ज्ञायते। अर्थः सदा न्यायोपार्जितः स्यात्। धर्मानुकूलोऽर्थ एव पवित्रम्। अतो या धर्मसम्मता वृत्तिर्भवेत्सैवोपादेया। सदागृहस्थैरेतत्स्मरणीयम् यत्कदापि स्वीयाऽऽजीविका धर्मप्रतिकूला न भवेत्।

# १०४. आशातनां करोतु मा

*नो अत्ताणं आसाएज्जा*
*नो परं आसाएज्जा ॥*

*— आचाराङ्गसूत्रम् १/६/५*

येषु मनुष्येषु हीनाया मनोवृत्तेर्निवासो भवति ते स्वीयं आत्मानमतीव तुच्छमवगच्छन्ति । तादृशा मनुष्या जगत्यस्मिन्नार्हन्ति प्रगतिपथेऽग्रेसरितुम्। स्वात्मन उन्नतेस्ते तेषु किञ्चिदपि साहसं न दृश्यते। यावज्जीवं स्वात्मानमक्षममवगच्छन्तस्ते सदाऽक्षमा एव तिष्ठन्ति ।

एतस्माद् विपरीतां मनोवृत्तिं धारयन्तो मानवाः स्वात्मनः स्तुलनायाम् अन्यांस्तुच्छानवगम्य तेषु स्थितान् सद्गुणानपि न पश्यन्ति। स्वीयाहङ्कारमदमत्ता भूत्वा निर्लज्जतया ते कुर्वन्त्यात्मश्लघाम् । स्वयं प्रख्यापितैर्गुणैरिन्द्रोऽपि लघुतां यातीति विस्मरन्ति ते ।

अन्यैर्जनैः कृतां स्वकीयां प्रशंसां श्रावं श्रावं मिथ्याहङ्कारसागरे मग्ना भवन्ति । कस्याप्यन्यस्य सद्गुणांस्ते न प्रशंसन्ति । तादृक्षी दृष्टिरेव न भवति तेषां ययाऽन्यमानवबन्धुषु स्थितान् सद्गुणान् प्रत्यभिज्ञाय तेषां सम्मानं कर्त्तुं सन्नद्धा भवेयुः ।

द्वाभ्यामप्येताभ्यां मनोवृत्तिभ्यां दूरं स्थातुं परामर्शं ददानैरनुभविभिर्मनषिभिरेवमुपदिष्टमस्ति यन्नैव स्वके तुच्छताम् पश्यन्तु न चान्येषु,न स्वीयामाशातनां कुर्वन्तु न चान्येषाम् ।

# १०५. न तृप्तिर्न तुष्टिः

*देवावि सइंदगा न तित्तिं न तुट्ठिं उवलभंति ॥*

*— प्रश्नव्याकरणम् १/५*

पञ्चेन्द्रियाणि सन्ति। तेषां पृथक् पृथक् विषयाः सन्ति। विषयभोगसामग्रीसञ्चयार्थं प्राणिनः श्रमं कुर्वन्ति, इतस्ततो धावन्ति।

पञ्चसु इन्द्रियेषु एकमपि इन्द्रियं स्वीयामनुकूलां प्रियां सामग्रीं लब्ध्वा भुक्त्वा चापि तृप्तिं तुष्टिं वा नाप्नोति। प्रत्येकस्येन्द्रियस्य कृते पृथक् पृथक् सामग्रीं कामयते मनः। तदाप्तुं मनसः प्रेरणया शरीरं धावद् दृश्यते। तत्तत् सामग्रीं भुक्त्वा यत्सुखं अनुभूयते तद् भवति क्षणिकम्, चिरस्थायिता न भवति तस्मिन्।

यस्य विनाशो न भवेत्तदेव सुखं भवति वास्तविकम्। तादृशं सुखं विषयभोगेन नाप्यते। तल्लाभाय तु विषयविरक्तेरावश्यकता भवति। भोगे रोगस्य, वित्ते नृपस्य, मौने दैन्यस्य, बले रिपोः, रूपे जरायाः, शास्त्रज्ञाने वादस्य, सद्गुणसाधने खलस्य, काये कृतान्तस्य(मृत्योः) भयमस्ति। यत्रापि भयं तत्र सुखं न सम्भवेत्। विरक्तिर्भयमुक्ता भवति, अतस्तत्र सुखस्य निवासः सम्भवति।

ज्ञानिनः कथयन्ति यदनायासलब्धां पञ्चेन्द्रियविषयसामग्रीं भुक्त्वा स्वर्गे देवा इन्द्राश्चापि तृप्तिं तुष्टिञ्चापि नानुभवन्ति। यदा देवानामप्येषा स्थितिरस्ति तदा का कथान्येषां प्राणिनाम्?

# १०६. समता

*सव्वं जगं तु समयाणुपेही*
*पियमप्पियं कस्सवि नो करेज्जा ॥*

*— सूत्रकृताङ्गसूत्रम् १/१०/६*

भावना ह्यस्माकं समस्तस्य कार्यकलापस्य प्रेरिकाऽस्ति। शुद्धया भावनया कृतानि कार्याणि शुद्धानि भवन्ति। तथैवाशुद्धया भावनया विहितानि कार्याण्यशुद्धानि भवन्ति।

भावनायाः शुद्धिं द्वौ दौषो नाशयतः। कौ तौ ? रागद्वेषौ। रागो मनसि ममतां मोहं वा जनयति। द्वेषो मनसि क्रूरतां क्रोधं वा जनयति। रागेण वस्तुषु प्रियत्वं द्वेषेण चाप्रियत्वं दृश्यते।

प्रियं प्रति सदैवानुचितः पक्षपातः क्रियतेऽप्रियं प्रति चानुचितो विद्वेषः। एकत्र पक्षपातोऽपरत्र विद्वेषः; द्वावप्येतौ त्याज्यौ दोषौ।

वीतरागदेवस्य उपासकाः श्रमणाः श्रमण्यश्च (साधवः साध्व्यश्च) रागद्वेषयोः परिहारस्य साधनां कुर्वाणाः सावधानं पालयन्ति श्रामण्यम् (श्रमणधर्मम्)।

स्वीयेऽन्तस्तले ते ममतायाः स्थाने समतां प्रतिष्ठितां कुर्वन्ति। अखिलं जगत् समभावदृशा पश्यतः समस्तान् तटस्थान् साधकान् मनीषिणो ज्ञानिन आचार्याः शास्त्रप्रणेतार एवमुपदिशन्तियत्कस्यापि प्राणिनः कदापि न प्रियं करणीयं न चाप्यप्रियम्। उभयमपि त्याज्यम्।

## १०७. कुशलः कः ?

*कुसले पुण नो बद्धे नो मुत्ते ॥*

*— आचारांगसूत्रम् १/२/६*

कुशलपुरुषस्य वर्णनमत्रालङ्कारिकभाषायाम् कृतमस्ति। यो बद्धः स मुक्तो भवितुं नार्हति। यो मुक्तः स बद्धो भवितुं नार्हति। जीवो बद्धो भवेदथवा मुक्तः। युगपत्स बद्धो मुक्तश्च भवितुं नार्हति।

अनेन ज्ञायते यद् यो बद्धो न स्यात् स मुक्तोऽवश्यं स्यात्। यश्च मुक्तो न स्यात्स बद्धोऽवश्यं स्यात्।

परन्तु अस्यां सूक्तौ विचित्रमेतदुक्तं यत्कुशलः (चतुरो दक्षो निपुणः प्रवीणो वा) पुरुषो न बद्धो भवति न मुक्तः। कश्चिज्जीवो न बद्धः स्यान्न मुक्त इति कथं सम्भवेत् ?

मनीषिणां मुखारविन्दात्कदाचिद् एतादृश्य उक्तयः प्रकटिता भवन्ति यत्र विरोधाभासो भवति, न विरोधः। विरोधाभासो ह्येकोऽलङ्कारः। यस्मिन्नापाततः दृश्यमानोऽपि विरोधः चिन्तानाद् दूरीकर्त्तुं शक्यते। अस्यामपि सूक्तौ विरोधाभासस्य सम्यक् प्रयोगः कृतः। कथमेतत् ?

उच्यते, यो मानवः कुशलः स कामभोगेष्वासक्तो न भवति; अत एव सोऽबद्धः (बन्धनमुक्तः); परन्तु स स्वकर्त्तव्यपालनाद् बद्धोऽपि भवति, अतोऽमुक्तः। इत्थं कुशलः पुरुषः युगपद् बद्धो मुक्तश्च (अबद्ध अमुक्तश्चेत्यपि) भवतीति सिद्धम्।

# १०८. कस्त्राता ?

*न चित्ता तायए भासा*
*कुओ विज्जाणुसासणं ॥*

*— उत्तराध्ययनसूत्रम् ६/११*

एकतो भाषाज्ञानम् अपरतः पाण्डित्यम— उभययोर्महदन्तरम्। कश्चित्पुरुष एकां भाषां ज्ञात्वाऽपि तस्या विपुलसाहित्यस्यानुशीलनेन विद्वान् भवितुमर्हेत्; किन्तु कश्चिदन्यः पुरुषो नाना भाषासु निपुणो भूत्वाऽपि मूर्खतायुक्तो भवेदिति सम्भवति।

केवलं भाषाज्ञानं कस्मिंश्चिदपि पुरुषे पाण्डित्यं नोत्पादयितुं शक्नोति। आंग्ली येषां मातृभाषाऽस्ति, तेषां पुत्राः पुत्र्यश्च शैशवावस्थात एव आंग्लीं सम्यगवगच्छन्ति, वार्त्तालापञ्च तस्यां कर्त्तुमर्हन्ति; किन्तु य आंग्लीं सर्वथा न जानाति तस्मादन्यभाषाभिज्ञाद्विदुषः ते पण्डिततराः सन्तीति वक्तुं न पार्यते।

अनेनैतत्स्पष्टं भवति ज्ञानवृद्धेः सम्बन्धः साहित्याध्ययने नास्ति न भाषया। येन यावत्साहित्यमधीयते तेन तावदेव ज्ञानं लभ्यते; किन्तु दुर्गतिः त्रातुं न भाषाभिज्ञता समर्थाऽस्ति न च विद्वत्ता।

दुर्गतौ प्रपतज्जन्तूद्धारणाद्धर्म उच्यते— इति धर्मस्यैका परिभाषा। अत एतद् वक्तुं शक्यते यद् धार्मिकता, सुशीलता, चरित्रपरायणता, परोपकारिता, सज्जनता, शिष्टता, सौम्यता, सभ्यता, मानवता वा दुर्गतितस्त्रातुं समर्था, न भाषाज्ञानं न च विद्यानुशासनम्।

# १०९. भवभ्रमणम्

*जो परिभवइ परं जणं*
*संसारे परिवत्तइ महं ॥*

— सूत्रकृताङ्गसूत्रम् १/२/२/१

सर्वे नराः काञ्चिद् विशेषतां धारयन्ति। केचिद् भाषणे कुशलाः केचिल्लेखने, केचित्काव्यरचनायाम्, केचिद्वार्त्तालापे, केचिदभिनये, केचिन्नेतृत्वे, केचिद् व्यापारे, केचिच्छासने, केचिच्छ्रमकार्ये विशिष्टा भवन्ति। अतः कमपि स्वस्मात् तुच्छं न मन्तव्यम्।

योऽन्यपुरुषेषु दोषान् पश्यति तस्मिन्नन्ये पुरुषा अपि दोषान् पश्यन्ति। योऽन्यांस्तुच्छानवगच्छति तमन्येऽपि तुच्छमवगच्छन्ति। योऽन्यबन्धूनामपमानं करोति तेऽपि तस्यापमानं कुर्वन्ति। योऽन्यान् निन्दति तं तेऽपि निन्दन्ति। अनेन व्यवहारेण न कश्चिदपि लाभः किन्तु हानिरधिकतरा भवति सर्वेषाम्।

यस्य दोषान् वयं दर्शयामः स तान् दूरीकृत्य पवित्रो भवति चेत् तस्य लाभः; किन्तु दोषदर्शकस्य अस्मात्को लाभः? तस्य त्वनेन हानिरेव भविता।

निन्दया निन्दकस्य जिह्वा तु दूषिता भवत्येव, तस्य जीवनमपि नश्यति। निन्दायां व्यतीतः कालः पुनर्नागच्छति। कालेऽमूल्यो भवत्यर्थात्कोऽपि तस्य मूल्यं दातुं नार्हति। अपरान् परिभूय निन्दकः सुविशालेऽस्मिंस्तमःपूर्णे संसारे पर्यटति, भवभ्रमणं करोति।

## ११०. मुनेर्मनः

*सारदसलिलं व सुद्धहियया, विहग इव विप्पमुक्का, वसुंधरा इव सव्वफास विसहा।*

—सूत्रकृताङ्गसूत्रम् २/२/३८

वर्षर्त्तौ नदीनां रक्तवर्णं कृष्णवर्णं वा मृदो मिश्रणेन यज्जलं कामरूपजावत् कफघ्नीवद्वा दृश्यतेऽस्माभिस्तद् जलं शरदृतौ निर्मलं भवति। मुनीनां मनोऽपि तथैव निर्मलं भवति । तस्मिन् विषय-कषायजन्य-कलुषतायाः सर्वथाभावो भवति।

पक्षिणो यथैकस्मिन् वृक्षे न तिष्ठन्तः स्वेच्छया विहरन्ति, तथैव मुनयोऽप्येकस्मिन् स्थाने न तिष्ठन्तः स्वेच्छया विहरन्ति । एकस्मिन् गृहे, ग्रामे, नगरे वा तेषां ममता न भवति । पक्षिणो यथैकस्माद् वृक्षादुड्डीयाअन्यं वृक्षं गच्छन्ति तथैव मुनयोऽप्येकस्मात् स्थलादन्यत्स्थलं विहरन्ति कतिपयदिवसानन्तरम् ।

पृथ्वी यथा सर्वमुपद्रवं सहते कामं कोऽपि तस्या उपरि चलेत्, नृत्येत्, कुद्दालेन तां दारयेत्, हलेन तस्या उदरं स्फोटयेत्; तथैव मुनयोऽपि प्राणिभिः ज्ञानेऽज्ञाने वा कृतान् उपद्रवान् असह्यान् परीषहान् समभावभावितात्मानः सहन्ते ।

इत्थं सहिष्णवः स्वेच्छया विहारिणो मुनयो निर्मलमनस्विनो भवन्ति।

# १११. निर्लिप्ताः स्वावलम्बिनः

*पोक्खरपत्तंव निरुपलेवे*
*आगासं चेव निरवलम्बे ॥*

*—प्रश्न व्याकरणम् २/५*

कमलम् भवति जलजम् । जले जायमानं तज्जल एव वसति, तथापि तस्य कस्मिन्नपि पत्रे न तिष्ठति(न शिलिष्यति) जलबिन्दुः । कमलस्य दलं यथा जल उषित्वाऽपि जलेन निर्लिप्तं भवति तथैव संसार उषित्वापि मुनिः संसारेण सर्वथा निर्लिप्तोऽनासक्तो भवति ।

आधारं विनाऽपि स्थितिमत्त्वाद् यथाऽऽकाशं निरवलम्बं भवति तथैव साधुः (साधको) अपि निरवलम्बो भवति, अन्येषाम् आश्रयं न गृह्णाति सः ; स्वकीयं सर्वं कार्यं स्वयमेव करोति, श्रमेणालङ्करोति निजशरीरमत एव श्रमण इत्युच्यते, स्वकीयकार्यस्य भारं स्वयं वहति, अन्येषां स्कन्धेषु तं न क्षिपति । इत्थं स परिपूर्णतया भवति स्वावलम्बी इति वक्तुं शक्यते ।

अत्र सूत्रकारैः वस्तुद्वयस्य(कमलदलस्य चाकाशस्य च) उपमानं दत्त्वा साधकजीवनस्य महत्ता प्रतिपादिता । साधूनां गुणद्वयस्य प्रभावशालिन्या शैल्या परिचयो दत्तः, येन नूतना मुनयः प्रेरिता भवेयुः। तेऽपि निर्लिप्ताः (निरुपलेपाः) स्वावलम्बिनः (निरवलम्बाः) च स्युः।

# ११२. निवृत्तिः प्रवृत्तिः

*असंजमे नियत्तिं च।*
*संजमे य पवत्तणं॥*

*—उत्तराध्ययनसूत्रम् ३१/२*

प्राणधारकः प्रत्येकं जीवो भवति सक्रियः। स प्रशस्तामप्रशस्तां शुभामशुभां शुद्धामशुद्धां शोभनामशोभनां वा प्रवृत्तिं करोत्येव।

शुभाशुभप्रवृत्तिभिस्तस्यात्मा शुभाशुभकर्मणामुपार्जनं करोत्येव। शुभाशुभप्रवृत्तिजन्यशुभाशुभकर्मणां भारवाही जीवश्चतुरशीति-लक्षयोनिषु परिभ्रमन् जन्मजरामरणचक्रे पतति।

अस्मिंश्चक्रे पतितो जीवः कदापि लभते सुखं कदापि च दुःखम् कदापि प्राप्नोत्यभीष्टं कदापि चानिष्टम्,कदापि स हसति कदापि च रोदिति। ज्ञानिनोऽनुभवन्ति यत्संसारे हसनस्यापेक्षया क्रन्दनस्याधिका अवसरा लभ्यन्ते। कणमात्रं सुखमनु तुलामात्रं दुःखमायाति।

सुखमिष्टं तु प्रतीयते, किन्तु तन्मधुबिन्दुलिप्तखड्गधारलेहनवद्-अतीव दुःखदं भयङ्करम् सिद्धयति।

अस्यां सर्वव्यापिन्यामवस्थायामस्माभिः किं कर्त्तव्यम् ? इत्येको विचारणीयः प्रश्नः समुपस्थितो भवति। प्रश्नस्यास्योत्तरं ददाना मनीषिण उपदिशन्ति यदसंयमतो निवृत्तिम् संयमे च प्रवृत्तिं कुर्वन्तु। एवमुभयतः स्वात्मकल्याणलक्ष्यं लभन्ताम्।

## ११३. अनर्था हिंसा

*अट्ठा हणंति अणट्ठा हणंति ॥*

*—प्रश्नव्याकरणम् १/१*

नैकेषां जनानामेष स्वभावो भवति यत्ते चलन्तो (गच्छन्तः) मार्गे स्थितान् पादपान् उत्पाटचेतस्ततः क्षिपन्ति, पुष्पं त्रोटयित्वा तन्मर्दयन्ति, वृक्षस्य प्रशाखां भंक्त्वा तां स्वहस्ते दधानाः किञ्चिद् दूरं क्षिपन्ति। नैका महिलाः तिष्ठन्त्यः स्वीयपादाङ्गुष्ठेन भूमिं विलिखन्ति। इत्थं वनस्पतिकायस्य पृथ्वीकायस्य च निष्प्रयोजना हिंसा भवति।

नाना बालकाः सरोवरतटोपविष्टा हस्तेन समीपस्थं प्रस्तरमुत्थाप्य जले क्षिपन्ति, तज्जन्या गोलाकारा उर्मीः दृष्ट्वा सुखानुभूतिं कुर्वन्ति, किन्तु ते विस्मरन्ति यत्तेषां प्रस्तरप्रहारेण तत्रस्थाः कियन्तो जलजन्तवो म्रियन्ते सव्रणा वा भवन्ति।

विपरीतमस्मात्केचन जनाः सप्रयोजनां हिंसां कुर्वन्ति। यथा ते दन्तघर्षणार्थं निम्बस्य बर्बूरस्य वा प्रशाखां त्रोटयन्ति। शरीरं मार्जनार्थं स्नानं कुर्वन्ति, मलिनवस्त्राणि च प्रक्षालयन्ति। जीवनार्थं श्वासोच्छ्वासं कुर्वन्ति। अत्र वनस्पतिकायस्य, अप्कायस्य, वायुकायस्य च सप्रयोजना हिंसा भवति। सप्रयोजना सार्था, निष्प्रयोजना अनर्था। उभयापि पापमूलम्, परन्तु सार्थाया हिंसाया अपेक्षानर्थायां हिंसायां पापस्याधिक्यम्।

# ११४. सत्कर्मफलम्

*इह लोगे सुचिण्णा कम्मा परलोगे*
*सुहफलविवागसंजुत्ता भवन्ति।*

*— स्थानांगसूत्रम् ४/२*

येषां सत्कार्याणां सुफलानि अस्मिन् लोके(भवे) न लभ्यन्ते, तान्यागामिनि लोके लभ्यन्ते।

नाना जना अस्मिंल्लोके यदैवम् पश्यन्ति यद् वञ्चकाः, लुण्टाकाः, खलाः, धूर्त्ताः, पाखण्डिनः, चौराः, मिथ्याभाषिणः, शस्त्रास्त्रधारिणः, घातुकाः, अत्याचारिणः सुखिनः सन्ति, अथ च सज्जनाः, शिष्टाः, सभ्याः, साधवः, प्रामाणिकाः, सदाचारिणः, सत्यभाषिणः, परोपकारिणः, धर्मात्मानः, दयालवो दुःखिनः सन्ति तदा तेषां विश्वासो धर्मादपसरति।

जनांस्तान् बोधयितुं ज्ञानिनः कथयन्ति यत् परोपकारस्य सदाचारस्य सदव्यवहारस्य सुफलं यदि कैश्चिद् अस्मिंल्लोके न लभ्यते तर्हि तैर्निराशैर्न भवितव्यम्, यतो धर्मः कदापि निष्फलो न भवति। अस्मिन् भवे यदि धर्मो न फलति तथापि स आगामिषु भवेष्ववश्यं फलिष्यति। ये दुष्टाः सुखं अनुभवन्ति तत्तेषां पूर्वभवोपार्जितपुण्यफलमस्तीति मन्तव्यम्। इह भवे कृतं सुकृतं (पुण्यं) परभवे शतगुणं सहस्रगुणं वा फलं दास्यति।

आत्मा ह्यमरोऽस्ति। व्यतीते चायुषि शरीरं विहाय सोऽन्यत्र जन्म गृह्णाति। तत्र तस्मै सुकर्माणि सुफलं (सुखं) अवश्यं दास्यन्ति।

# ११५. मा परिहसन्तु

*न याविपन्ने परिहास कुज्जा ॥*

— *सूत्रकृताङ्गसूत्रम्*

रोगस्य मूलं कास:, कलहस्य मूलं हास: ! इति समीचीनमेवोच्यते।

अन्धस्य पुत्रा अपि अन्धा एव भवन्तीति कटूक्तिप्रयोगं परिहसन्ती द्रौपदी यदि दुर्योधनाय नाकरिष्यत्तर्हि कदाचिन्महाभारताख्यं सुविख्यातो महायुद्धो नाभविष्यत् ।

वयमिह पश्यामो यत्परस्परं हासपरिहासे कदाप्यपमानस्याऽनुभूतिमकृत्वा घनिष्टे मित्रेऽपि तत्कालं शत्रू भवत: तथा मिथो हत्यां कर्त्तुं प्रवृत्तावपि सञ्जायेते । क्षणात्पूर्वं यत्र मनसि हितैषितासीत् तत्र तत्कालमेव दुर्भावनाया द्वेषस्य वा साम्राज्यम् उत्पन्नं भवति। एतत्कस्यास्ति दुष्परिणाम:? परिहासस्यैव केवलम् ।

ये प्राज्ञा: पुरुषा: सुधीमन्त: साधका: सन्ति ते दूरदर्शिनो भवन्ति; अत: कथनस्य पूर्वमेव तत्परिणाम: श्रोतरि क: स्यादिति चिन्तयन्ति । यत्र दुष्परिणामस्य सम्भावना भवेत्तत्र शब्दान् न निस्सारयन्ति निजाननात् । अनुभविनस्ते सम्यगेतज्जानन्ति यत् परिहासस्य सुपरिणामो न भवति क्वापि। अतस्तेऽपरेषां परिहासेन स्वजिह्वां न दूषयन्ति ।

शास्त्रकारैर्यथार्थमेतदुच्यते यत् प्राज्ञौ कदापि न कार्य: परिहास:।

# ११६. दया कदा

*पढमं नाणं तओ दया ॥*

*— दशवैकालिकसूत्रम् ४/१०*

दया यदि धर्मस्य जननी तर्हि ज्ञानं तस्य जनकः। ज्ञानदययोरेकत्र अवस्थानेन, मिथः समन्वयेन धर्मस्य जन्म सम्भवम्, नान्यथेति निश्चितम्।

ज्ञानदययोरेकतरस्य चयनाय वयमादिष्टाश्चेत् कस्य चयनं करिष्यामः? फलबीजयोरेकतरं चयनीयं चेत् किं चेष्यामः ?

नाना जनेभ्यः फलस्य चयनं रोचिष्यते, यतस्तेन तत्कालं क्षुधाशान्तिर्भवति, स्वादसुखमपि लभ्यते; किन्तु नास्त्यस्मिन् दूरदर्शिता। कामं बीजेऽद्य माऽस्तु क्षुधाशान्तियोग्यता रोचकता वा; किन्तु तस्मिन् यत्फलोत्पादनसामर्थ्यमस्ति तन्नास्ति केनाप्यस्वीकरणीयम्।

तद्वत् ज्ञानस्य सामर्थ्यमप्यस्त्यद्भुतम्। सम्यग् ज्ञानं केनापि मानवेन दयाधर्मस्य पालनं कारयितुं शक्नोति। ज्ञानप्रेरितो मानवः संसारेऽस्मिन् यावज्जीवनं दृढतापूर्वकं दयां पालयति।

क्रूराणां क्रुद्धानां दुष्टानां च मस्तिष्केषु परिवर्त्तनं कर्त्तुं शक्नोति सम्यग्ज्ञानम्। तेषु दयालुतायाः (दया धर्मस्य) सञ्चारो भवति ज्ञानेन। अतो दयाया अपेक्षा ज्ञानस्य महत्त्वमधिकमस्ति। अत्र दयायाः प्रथमं ज्ञानम् भवेदिति स्पष्टमुपदिष्टम्।

# ११८. मा करोतु पापम्

*पावं कम्मं नेव कुज्जा न कारवेज्जा ॥*

*— आचाराङ्गसूत्रम् १/२/६*

पुण्यकार्यस्य फलमस्ति सुखम्। पापकार्यस्य च फलमस्ति दुःखम्। सर्वे जनाः सुखं कामयमाना अपि पुण्यार्जने आलस्यं कुर्वन्ति।

विपरीतमस्माद् दुःखं कोऽपि न इच्छति, तथापि दुःखजनकानां पापानां सेवनं कुर्वन्ति सावधानं सर्वे जनाः। कियच्चित्रमेतत् ?

नाना जना एतादृशा भवन्ति, ये स्वयं तु पापाचरणं न कुर्वन्ति, परत्वन्यान् जनान् पापानि कर्त्तुं प्रेरयन्ति, प्रोत्साहयन्ति तान्।

तथैव बहवो जनाः स्वयं केनापि सह कलहं न कुर्वन्ति; परन्तु अन्यान् पुरुषान् कलहं कर्त्तुं प्रोत्साहयन्ति। प्रोत्साहिताः पुरुषा वराका यदा परस्परं कलहं कुर्वन्ति तदा दूरस्थिताः ते क्रीडावत्तत्पश्यन्ति। एषा कुत्सितास्ति मनोवृत्तिः।

येषु शोभना प्रशस्या निर्मला शुद्धा निर्दोषा मनोवृत्तिर्वसति ते न स्वयं युद्धयन्ति न च योधयन्ति, न कुप्यन्ति न च कोपयन्ति, न तुदन्ति न च तोदयन्ति, न त्रस्यन्ति न च त्रासयन्ति, न क्रन्दन्ति न च क्रन्दयन्ति, न क्षोभन्ते न च क्षोभयन्ति, न कम्पन्ते न च कम्पयन्ति, न खिद्यन्ते न च खेदयन्ति, न गर्हन्ते न च गर्हयन्ति, न च द्रुह्यन्ति, न द्रोहयन्ति, न पापं कुर्वन्ति न च कारयन्ति।

# ११८. पापश्रमणः

*मुच्चा पिच्चा सुहं सुवइ*
*पावसमणेत्ति वुच्चइ॥*

*—उत्तराध्ययनसूत्रम् १७/३*

शरीरस्य कृते भवति भोजनम्। शरीरे शक्तिं स्थिरीकर्त्तुं अन्नं भक्षयन्ति प्राणिनः; परन्तु जीवनस्य साफल्यं शक्तेः सदुपयोगेऽस्ति, न शक्तौ।

अत्याचारिणः, लुण्टाकाः, दुष्टोऽपि शक्तिशालिनो भवितुमर्हन्ति; किन्तु ये स्वशक्तिं परोपकारकार्येषु योजयन्ति, अन्येषां मानवबन्धूनां सहायतां कर्त्तुं स्वशक्तेरुपयोगं कुर्वन्ति, अत्याचारपीडितान् पुरुषान् रक्षन्ति, स्वशक्त्या दुःखितानां दुःखं दूरीकुर्वन्ति, पतितानाम् उत्थानं कुर्वन्ति, तेषामेव जीवनं सफलं भवति, प्रशस्यं भवति, यशस्वि भवति।

बहवो जना लुण्टाकवत् स्वशक्तेर्दुरुपयोगं तु न कुर्वन्ति, किन्तु तस्या अनुपयोगं कुर्वन्ति। ते अलसाः प्रमत्ता अकर्मठा अकर्त्तव्यपरायणा भवन्ति। एतादृशाः प्राणिनो जीवनार्थं भोजनं न स्वीकुर्वन्ति, किन्तु भोजनार्थं जीवन्ति। स्वादूनि खाद्यवस्तूनि सञ्चित्य तेषां ते उपभोगं कुर्वन्ति, खादन्ति, पिबन्ति तदनन्तरं सुखपूर्वकं शेरते। एतादृशा मानवाः केभ्यश्चिन्न रोचन्ते। ते स्वार्थपरायणाः कर्त्तव्यात् पलायन्ते।

ये श्रमं कुर्वन्ति ते श्रमणा उच्यन्ते। प्रमादवशवर्त्तिनो यदि ते अलसो भवन्ति तर्हि कर्त्तव्यपराङ्मुखास्ते ''पापश्रमणाः'' उच्यन्ते।

# ११९. पापिनः पीड्यन्ते

*सकम्मुणा किच्चइ पावकारी ॥*

*— उत्तराध्ययनसूत्रम् ४/३*

चौर्यं कुर्वाणश्चौरः कियान् सावधानो वर्त्तते ? सर्वतः पश्यन् शनैः शनैः पदानि धत्ते । कोऽप्यन्यो मां मा पश्यतु इति चिन्तया भयेन च कम्पमानो दृश्यते । प्रारम्भतो यावच्चौर्यं सम्पन्नं न भवति तावद् भयवेदनापीडितः तिष्ठति । चौर्यं कुर्वन् गृह्यते चेत्कारावासादिदण्डस्य भोगं कुरुते । तेन शारीरिकीं मानसिकीं च पीडामनुभवति ।

मृषावाद्यपि निरन्तरं बिभेति; यतः स चिन्तयति— ममासत्यं जना जानीयुश्चेत्कोऽपि मयि विश्वासं न करिष्यति । असत्योद्घाटनस्य भयात् कपटपटुर्वञ्चकोऽपि कम्पमानः तिष्ठति ।

क्रोधं कुर्वाणोऽपि हस्तयोः पादयोः वचनानां च प्रहारैरन्यान् पीडयति । तस्यामवस्थायामन्येऽपि मृन्निर्मितमाधववत्तूष्णीं न तिष्ठन्ति। तेऽपि क्रुद्धेभ्यः क्रुध्यन्ति । एवं पक्षद्वयेऽपि परस्परं वैरं क्रमशो वर्धते । तेन भवति सर्वत्राशान्तिः ।

क्रोधस्तु स्वयमपि नास्ति न्यूना वेदना । क्रोधितस्य क्रुद्धस्य वा भृकुटिः कुटिला भवति, चक्षुषो रक्तिमा जायते, शरीरात् स्वेदसलिलं गलति, नासापुटेवेपेते, अङ्गानि च कम्पन्ते ।

इत्थं सिद्धचति यत्पापी स्वयं स्वपापैः पीड्यते ।

# १२०. पैशुन्यत्यागः

*पिट्ठिमंसं न खाएज्जा ॥*

*— दशवैकालिकसूत्रम् ८/४७*

कस्यचित् पृष्ठे अर्थात्तस्यानुपस्थितावन्येषां समक्षं दोषप्रकटनम् कायरतायाः कार्यमस्ति। यदि दोषनाशोऽस्माकमुद्देशस्तर्हि दुष्टस्य समक्षं कृतेन दोषवर्णनेन साफल्यं सम्भवेत्; येन स विचार्य दोषत्यागं कुर्यात्।

कस्यचित्समक्षं तस्य दोषाणां वर्णनं निर्भयताया हितैषितायाः साहसस्य कार्यमस्ति; परन्तु दोषदर्शनकाले आवश्यकमस्ति रहः। यदि वयं अन्येषां जनानामुपस्थितौ कस्यापि दोषवर्णनं कुर्मस्तर्हि तत् क्षोभजनकं स्यात्। क्षोभे सति सुधारोऽसम्भवः। सुधारस्य हितैषितायाः स्थाने तत्रापमानकारिका निन्दा स्यात्। तत्र दोषवर्णनकर्त्तुरभिमानस्य पोषिका द्वेषपूर्णा मनोवृत्तिर्विराजते। कुत्सितास्ति सा।

रहसि मधुरशब्दैः दुष्टस्य दोषाणां तत्समक्षं वर्णनं तस्य सुधारार्थमुपयुक्तं स्यात्। अनेन स स्वदोषत्यागाय प्रेरितः स्यात्।

एवमेकान्ते दोषदर्शनमुपयुक्तम्, अन्येषां च समक्षं कृतं दोषदर्शनं अनुपयुक्तम्, किन्तु दुष्टस्यानुपस्थितौ कृतं दोषदर्शनं ''निन्दा'' इत्युच्यते। तस्यापरं नाम पैशुन्यम् पिशुनता वाऽस्ति। पृष्ठमांसभक्षणवत्तत्पापम् मन्यते। पापं त्याज्यमेव भवति। अतः सर्वैर्जनैः कार्यः पैशुन्यत्यागः।

# १२१. पूज्यः कः ?

*जो छन्दमाराहयई स पुज्जो ॥*

*— दशवैकालिकम् ९/३/१*

गुरुजनानां मनोगतामभिलाषां भाषया(शब्दैः) न,अपितु य इङ्गितैरेवावगम्य तदनुकूलं सेवाकार्यं करोति स शिष्यः प्रशंसनीयः, आदरणीयः, पूज्यः।

कस्मिन् काले गुरूणां काऽस्ति आवश्यकता कास्तीच्छा वेत्यवगम्य यः शिष्योऽनुक्तोऽनादिष्ट एव यथाकालं स्वकर्त्तव्यपालन-संलग्नो भवति स एवोत्तमः शिष्यो मन्यते।

आदिष्ट यः स्वकर्त्तव्यं पालयति, यावदुक्तं तावदेव करोति, न तु न्यूनाधिकं, सो मध्यमश्रेण्याः शिष्यः।

वारं वारमादिष्टोऽपि यो गुरूणामादेशं न पालयति, कथितोऽपि स्वकर्त्तव्यमुपेक्षते, सोऽधमः शिष्यः।

छन्दस्य हृद्गताकाङ्क्षाया य आराधनां करोति, अनुपालनं करोति, स शिष्यः पूज्योस्ति। अनेन सूक्तिवाक्येन न केवलम् आदेशपालनस्यापितूत्तमशिष्यताया अपि प्रेरणा दत्तास्ति शास्त्रकृद्भिः।

तां प्रेरणां गृहीत्वा यः शिष्य इङ्गिताकारसम्पन्नो भवति, अर्थाद् गुरुवर्य्याणामिङ्गितैराकृतिभिर्वा तेषामन्तस्तलस्थमभिप्रायं सम्यगवगम्य तदनुकूलमेव स्वकीयाचरणं करोति, स्वकर्त्तव्यमनुक्तोऽपि (अनादिष्टोऽपि) समये समये पालयति, स आदरणीयोऽनुकरणीयः शिष्यः पूज्यः।

# १२२. दत्तादानम्

*अणुन्नविय गेण्हियव्वं ॥*

*—प्रश्नव्याकरणम् २/३*

अधिकारिणं न पृष्ट्वा अधिकृतस्य वस्तुन आदानमुपयोगश्च चौर्यस्यैकः प्रकारः।

केचिज्जना मनोविनोदार्थं कस्यापि मित्रस्य वस्तु निगूहन्ति। तदनन्तरं यदा क्लिश्यता मित्रेण तदितस्ततोऽन्विष्यते तदा ते हसन्तस्तद्वस्तुनः कुर्वन्ति प्रतिदानम्।

परन्तु कतिचिज्जनानां मनोवृत्तिरेव कलुषिता भवति। विनोदस्य मिषेण ते वस्तु निगूहन्ति; निश्चिन्वन्ति च "यद वस्तु गृहीतञ्चेद् वदिष्यामो विनोदार्थमेवास्माभिस्तद्वस्तु निगूहितम् अथ चेन्न गृहीतं तद्वयमेव तस्याधिकारिणो भविष्यामः। धूर्त्ता एतादृशाः पुरुषा वस्तुतश्चौरा एव।

एषा तु गृहस्थानां चर्चा। साधवः(श्रमणाः) भवति सर्वस्व-त्यागिनः। यस्मिन् क्षणे ते प्रव्रज्यां गृह्णन्ति, तस्मात् क्षणादेव अकिञ्चना भवन्ति, कस्मिन्नपि वस्तुनि तेषामधिकारोऽस्तीति न मन्वते, अर्थात् भौतिक वस्तुजातं प्रति किञ्चिदपि ममत्वं तेषां मनसि न तिष्ठति।

अतस्तेषां कृते एतादृशं विशिष्टं शास्त्रीयं विधानमस्ति यत्प्रत्येकस्य वस्तुत उपयोगात्पूर्वं तद्वस्तुस्वामिनऽनुज्ञावश्यं गृहीतव्या। घासस्य एकं तृणमप्यदत्तं अनुमतिं विना न आदातव्यम्। अदत्तादाने पातकम् लगति। अतः कार्यम् दत्तादानम्।

# १३९. जरद्गवा:

*तत्थं मंदा विसीयन्ति*
*उज्जाणंसि जरग्गवा ॥*

*— सूत्रकृताङ्गसूत्रम् १/३/२/२१*

साधनाया मार्गोऽतीव दुर्गमो भवति, न सुगमः। तत्र धीरताया अवलम्बनं भवत्यावश्यकम्। धीरतामवलम्ब्य ये निरन्तरमग्रेसरन्ति, त एव गन्तव्य प्राप्नुवन्ति, नान्ये।

साधनामार्गे विकटसङ्कटानां काठिन्यानाम् बाधानां साम्मुख्यम् भवति। बुद्धिमन्तः साधका एतत् चिन्तयन्ति यद् आगन्तुकं सर्वमुपद्रवं सोढा वयं धैर्यस्य परीक्षां दद्मः। सोढैरुपद्रवैरेतत्प्रमाणीक्रियते यद् वयं धीराः स्मः। एतच्चिन्तनेन साधकानां हृदयेषु पर्याप्तमुत्साहं जागर्त्ति।

परन्तु मन्दानाम् (अज्ञानाम्) का दशा भवति मानवानाम् ?

सूत्रकाराः कथयन्ति यद् यथा वृद्धा बलीवर्दा अधित्यकारोहणस्य अवसरे विषण्णाः खिन्ना दुःखिन उद्विग्ना वा भवन्ति तथैव साधनामार्गे आगतान् उपद्रवान् अवलोक्य अल्पज्ञाः साधका विषण्णाः खिन्ना निराशा दुःखिनो भवन्ति। केचिद् अधीराः साधकास्तु इयन्तो व्याकुलो भवन्ति यद् विपरीतदिशायां गन्तुकामा भवन्ति। एतादृशाः साधकाः तरुणवृषभा इव न, किन्तु भवन्ति जरद्गवा(वृद्धवृषभा) इव।

# १४०. सुदुर्लभा बोधिः

*बहुकम्मलेवलित्ताणं*
*बोही होई सुदुल्लहा तेसिं ॥*

— *उत्तराध्ययनसूत्रम् ८/१५*

अष्टकर्मभिर्लिप्तोऽस्ति प्रत्येकं संसारी जीवः। कर्मणामेष लेपो यस्मिन् जीवे यावदधिको भवति, सो तावदधिकः सम्यग्ज्ञानाद् दूरे तिष्ठति।

अष्टस्तरीया वस्त्रपट्टिका यस्य नेत्रयोरुपरिबद्धा स्यात् स कदापि किञ्चिदपि वस्तु विलोकयितुं न शक्नोति। तथैव यस्य प्राणिन आत्मनि अष्टानां कर्मणां आवरणं संलग्नं स्यात् स सम्यग्दर्शनं कर्त्तुं न शक्नोति। यतो निरावृताभ्यामेव नयनाभ्यां वयं वस्तुजगत् द्रष्टुं सक्षमा भवामः। आत्मन उपरि कर्मणामावरणं यावद् दृढं प्रगाढं वा स्यात् तावदेव जीवं सम्यग्दर्शनाद् तद् वञ्चितं कुर्यात्।

कर्मणां फलस्य भुक्तिकाले जीवो दुःखान्यतितीव्रतयानुभवति, अनुभवन् रोदिति क्रन्दति च। तस्यां स्थितौ सदाचारस्य सम्यक्चारित्रस्य पालनं प्रति तस्य ध्यानमाकृष्टं न भवेदिति स्वाभाविकम्।

इत्थमष्टकर्मणां लेपो जीवं सम्यग्दर्शनात् सम्यग्ज्ञानात् सम्यक्-चारित्राच्च दूरं नयति। तस्य मोक्षगतौ अत्यन्तबाधको भवति बोधिरत्नप्राप्तिः तस्य कृतेऽतीव दुर्लभा स्यात्।

# १४१. कथं भाषेत ?

*नापुट्ठो वागरे किंचि*
*पुट्ठो वा नालियं वए ॥*

*— उत्तराध्ययनसूत्रम् १/१४*

अभिमानो ज्ञानस्याजीर्णमिव कथ्यते। येषु मानवेषु ज्ञानेन सह अभिमानोऽपि भवति ते ज्ञानस्य पाचनं न कृतवन्त इति मन्तव्यम्।

एतादृशा जना निरर्थकं वृथा भाषन्ते। अपृष्टा अपि ते भाषमाणा दृश्यन्ते। सुकीर्त्तिप्राप्तेराशां मनसि कृत्वा स्वकीयश्रुतज्ञानस्य शब्दाडम्बर-माध्यमेन प्रदर्शनं कुर्वन्ति स्थाने स्थाने।

सुधियः श्रोतारो वक्तुर्हृदयमेव पश्यन्ति, न तु शब्दाडम्बरमात्रम्। अनेन ते प्रत्यभिजानन्ति यत्को वक्ता स्वज्ञानस्य प्रदर्शनार्थं वक्ति तथा को वस्तुतोऽस्मान् धर्माचरणस्य प्रेरणां दातुं वक्ति। प्रत्यभिज्ञाय ते वक्तु-रुपेक्षां सन्मानं वा कुर्वन्ति। सम्यग् जानन्ति एतत्ते यद् अपृष्टा भाषमाणा जनाः प्रायः श्रुतज्ञानप्रदर्शनमेव कर्त्तुं यतन्ते। अतो यावत्कोऽपि प्रश्नं न करोति तावन्न वक्तव्यम्।

कृतेऽपि प्रश्नेऽलीकम् न वक्तव्यम्। अयथार्थवचनेन कस्यचिज् जिज्ञासाशान्तिरनुचिता। यतः पश्चाद् यदि केनचिदन्येन स्रोतसा स एव श्रोता यथार्थं ज्ञानं लभेत तर्हि तत्कालमेव वक्तारं प्रति उत्पन्नो विश्वासो नश्येत। अतः सूक्तेरनुसारमेवाचरणीयम्।

# १४२. सत्येश्वरः

*तं सच्चं भगवं ॥*

*— प्रश्नव्याकरणम् २/२*

भगवान्, ईशः, गॉड्, खुदा, रहीमः, करीमः, अल्लाह इत्यादयः परमेश्वरस्य विभिन्नानि नामानि सन्ति । सर्वोच्चस्थाने प्रतिष्ठितः परमात्मा कीदृशः ? तस्य स्वरूपं किम् ? इति प्रश्ने विभिन्नदार्शनिकानां विभिन्नमतानि श्रूयन्ते ।

कश्चित्तं साकारं मनुते, कश्चिन्निराकारम् ; कोऽपि तं सगुणं कथयति, कोऽपि निर्गुणम्; केनचित्सः जगन्नियन्ता मन्यते, केनचिज्जगतो निर्लिप्तः, केनापि स न्यायकर्त्ता दण्डदाता वा प्ररूप्यते, केनचिच्च तटस्थो वीतरागः ।

अनेकान्तवादिनो दृष्टौ सर्वाण्यपि परस्परविरुद्धान्येतानि मतानि सत्यांशयुतानि सन्ति; अतस्तस्य मतेन सत्यमेव भवभयमोचको भाग्यविधाता भगवान् ।

एकान्तवादी दुराग्रही भवति । तस्य दृष्टिरतीव सङ्कीर्णा भवति । कमपि सिद्धान्तं सोऽन्येषां दृष्टिकोणेनावगन्तुं न यतते । दुराग्रहग्रस्तः सोऽन्यदार्शनिकानां मतं श्रोतुमपि नेच्छति ।

विपरीतमस्माद् अनेकान्तवादी सहिष्णुरुदारः सम्यग्दर्शी च भवति। सर्वेषामपि दार्शनिकानां विभिन्नानि मतानि धैर्येण विवेकेन च श्रोतुमवगन्तुं च सन्नद्धो भवति । यतस्तस्य दृष्टौ सत्यमेव भगवान् सत्येश्वरो एवोपास्यः ।

# १४३. भगवती अहिंसा

*भगवती अहिंसा........ भीयाणंपि व सरणं॥*

*— प्रश्नव्याकरणम् २/१*

सङ्कटग्रस्तो भीत: कम्पमानो व्याकुलो मानव: कस्यचित्समर्थ-पुरुषस्य शरणमनुसन्धते। प्राप्ते शरणे शरणार्थी निर्भयो भवति, सन्तुष्टो भवति। एवमेव भगवतीमहिंसामाश्रित्य मानवो निर्भय: सन्तुष्टश्च भवति।

गृहमपि शरणपदस्यैकोऽर्थ:। यथा शीतौष्ण्यवृष्टयाद्युपद्रवेभ्य: स्वदेहरक्षणार्थं मनुष्यो गृहस्याश्रयं गृह्णाति तथैव दुष्टदत्तपीडाभिरात्मनो रक्षार्थम् भगवत्या अहिंसाया: शरणं गन्तव्यम्।

हिंसाया जायते पापम्। पापेभ्यो जायते दु:खम्। दु:खं भवत्यनिष्टम्। अनिष्टं कोऽपि नेच्छति।

दु:खानि निमन्त्रयितुं ये नाभिलषन्ति तै: स्वात्मा पापकार्येभ्यो रक्षणीय:। पापेभ्य आत्मानं रक्षितुकामैर्हिंसाया: त्याग: कर्त्तव्य:।

तैरेष सङ्कल्प: कार्य: यद्वयं मनसा वचसा कायेन च कस्यापि जीवस्य प्राणातिपातं न करिष्याम:, नान्यै: कारयिष्याम:, न च कुर्वतामनुमोदनं करिष्याम:(त्रिकरणेन त्रियोगेन चाहिंसाधर्मं पालयिष्याम:) एतादृक्सङ्कल्पकर्त्तार: श्रमणा एव भगवत्या अहिंसाया वास्तविकोपासका: सन्ति।

# १४४. भवतृष्णात्यागः

*भवतण्हा लया वुत्ता*
*भीमा भीमफलोदया॥*

*—उत्तराध्ययनसूत्रम् २३/४८*

भवस्य संसारस्य तृष्णा, आसक्तिः, भवतृष्णा इत्युच्यते। एतादृशी सा भयोत्पादिका लता याऽतीव भयङ्कराणि फलानि प्रसूते।

यथा वृक्षोपरि श्लिष्टा लता शोभना मनोहारिणी च भवति तथा भवतृष्णापि शोभना मनोहारिणी च भवति। सा यथा नश्वराणि पुष्पाणि जनयति तथैव तृष्णापि नश्वराणि सुखानि मानवेभ्यो ददाति।

लता यथा कस्यचिद् वृक्षस्यश्रयं प्राप्य तमारुह्य विस्तृता भवति तथैव तृष्णाऽपि मनुष्यस्याश्रयं प्राप्यं तस्यान्तस्तलमारुह्य विस्तृता भवति, शनैः शनैरात्मानमाच्छादयति।

यथा लता स्वीयमाश्रयं वृक्षमारूढा तस्य रसं चूषित्वा स्वयं पुष्यति तथैव मनुष्यमारूढा तृष्णाऽपि तस्य सुखं चूषित्वा स्वयं क्रमशः पुष्यति; अतो लतावत् तृष्णाऽपि हानिकारिणी भयङ्कारिणी च भवति।

लतायाः सङ्गत्या वृक्षस्य शोषणं भवति। उत्पन्नानि फलानि शोषणस्य प्रमाणानि सन्ति। वृक्षस्य विकासाय लतायास्त्याग आवश्यकः। एवमेव आत्मनः सम्यग् विकासाय भवतृष्णायास्त्याग आवश्यकः।

# १४५. त्रुटिशोधनम्

*तं परिण्णाय मेहावी, इयाणिं णो,*
*जमहं पुव्वमकासी पमाएणं ॥*

— *आचाराङ्गसूत्रम् १/१/१*

समीचीनमेवोच्यते यद् व्यक्तिः पदाघातेन शिक्षते । प्रत्येकं पदाघातो मानवाय शिक्षां ददाति, कामं स्यात् सा स्वल्पा ।

किन्तु प्राप्तायाः शिक्षायाः पालनं अर्थात् तदनुसृत्य जीवनव्यवहारे परिवर्त्तनम् मनुष्यस्य इच्छाया उपरि निर्भरमस्ति ।

ये मेधया सम्पन्ना अर्थात् बुद्धिमन्तः सन्ति तेष्वेवैतादृशीच्छा जायते, निवसति च । बुद्धिहीनेषु न सम्भवत्येतत् ।

मनुष्यमात्रं त्रुटीनाम् पात्रम् इति लोकोक्तिः गुर्जरप्रदेशे प्रसिद्धा । त्रुटयस्तु मनुष्यैर्भवन्त्येव । एतत् स्वाभाविकम् । मनसि जातः प्रमादः त्रुटीः कर्त्तुं प्रेरयति ।

किन्त्वेकदा या त्रुटिर्भूता सा पुनर्न भवेद् इति ध्यातव्यम् । यदि एकैव त्रुटिः पुनः पुनर्भवति तर्हि सा त्रुटिकर्त्तुर्मूर्खतां सूचयति । त्रुटिपूर्णं कार्यं तादृक्कुत्सितं न मन्यते यादृक्तत्पौनःपुन्येन करणम्।

क्रमशः त्रुटीनां शोधनात् सम्पूर्णजीवनशुद्धेर्ध्येयः प्राप्यते । अतो ये मेधाविनः (बुद्धिसम्पन्नाः) साधकाः सन्ति तैरेष निश्चयः करणीयो यदेका त्रुटिः पुनर्न स्यात् ।

## १४६. भोगवियोगः

*उविच्च भोगा पुरिसं चयन्ति*
*दुमं जहा खीणफलं व पक्खी ॥*

*— उत्तराध्ययनसूत्रम् १३/९३*

यावद् वृक्षे मधुराणि पक्वानि फलानि भवन्ति, तावद् सुदूरस्थलात् पक्षिणः तस्य शाखास्वागत्योपविशन्ति तथा फलानां उपभोगं कुर्वन्ति यथेच्छम्; परन्तु यदा समस्तफलजातं समाप्यते तथा ऋतुपरिवर्त्तनाद् नूतनफलोत्पत्तेः सम्भावना न भवति तदा सर्वेपक्षिणः तं वृक्षं त्यक्त्वान्यत्र गच्छन्ति ।

तथैव यावत्पुण्यस्योदयः प्रभावो वा भवति, तावत् प्राणिनां परितो विविधभोगसाधनानि तिष्ठन्ति, पञ्चेन्द्रियतृप्तिदायिका, विषयसुखा-नुभूतिकारिका प्रचुरा सामग्री लभ्यते; सम्पूर्णमावश्यकं सौविध्यं प्राप्यते; जंगलेऽपि तस्य कृते मङ्गलमयं वातावरणमुत्पद्यते; किन्तू यदा पुण्यानि क्षीणानि भवन्ति, तदा शनैः शनैः क्रमशः सर्वैषा भोगसामग्री समाप्यते, व्यक्तिं विहाय भोगा अन्यत्र गच्छन्ति । भोगस्वादस्य स्मृतिमात्रम् अवशिष्यते। तस्यामवस्थायाम् व्यक्तिर्दुःखान्यनुभवति ।

पुण्यजन्यभोगसामग्रीसुखमनुभवन्तो मानवाः प्रायः कर्त्तव्यपराङ्-मुखा भवन्ति । बुद्धिमन्तो न कुर्वन्ति तथा। ते तु पूर्व पुण्यप्रताप-प्राप्तभोगसामग्रीमपि परेषामुपकारे उपयुञ्जानाः स्वपरलोकं सुधारयन्ति।

# १४७. मनोविजय:

*इमेण चेव जुज्झाहि किं ते जुज्झेण बज्झओ ?*

*—आचारांगसूत्रम् १/५/३*

न मिलन्ति मोदका: समराङ्गणे— इति समीचीना प्रतीयते लोकोक्ति:। युद्धेन न भवति कश्चिल्लाभ इति तस्या: तात्पर्यम्। उभयोरपि पक्षयो: हानिरेव भवति न्यूनाधिका।

युद्धे "औनित्यं गमयति को विशेषकाम:" अथ च "शक्ति: सर्वत्र पूज्यते"—इति लोकोक्तिमनुसृत्य शक्तिशालिनो विजयो भवति; किन्तु "य: सशक्त: तस्य पक्षो न्याय्यो एवास्ति" इति नास्ति नियम:। योऽन्यायी, अत्याचारी वास्ति सोऽपि बलवत्तरत्वाद् युद्धे विजयं प्राप्तुं शक्नोति। बलवत्तर: क: ? इति निर्णयो युद्धेन भवति; किन्तु न्याय्यपक्षस्य निर्णयो न भवति।

अत एवाध्यात्मवादिना वारं वारमुपदिशन्ति यच्छस्त्रास्त्रै: क्रियमाणं बाह्यं युद्धं कदापि न करणीयम्। मनुष्ययोर्विवादस्य निर्णयो यथा न्यायालये क्रियते तथा राष्ट्रयोर्विवादस्य निर्णय: अन्तर्राष्ट्रीय-न्यायालये कर्त्तुं शक्यते।

मनुष्य: शान्तिमिच्छति। युद्ध: शान्तेर्विरुद्ध:। अत: शान्ति-प्रियैर्युद्धो न कार्य:। मनोवैज्ञानिका मन्वते यद् युद्धं मूलप्रवृत्तिरस्ति। अस्यामवस्थायां किं कर्त्तव्यम्? अध्यात्मवादिनोऽस्य प्रश्नस्योत्तरं ददाना: कथयन्ति यत् स्वमनोवशीकरणार्थम् मनसैव युद्धं करणीयम्।

# १४८. मनुष्यभवः

*जीवा सोहिमणुप्पत्ता*
*आययन्ति मणुस्सयं ॥*

*— उत्तराध्ययनसूत्रम् ३/७*

शुभाशुभकर्मप्रेरिता जीवा विभिन्नयोनिषु जन्म गृह्णन्ति। शास्त्रेषु योनिसंख्या चतुरशीतिलक्षमिताऽस्तीति प्ररूपितम्। मनुष्ययोनिस्तासु सर्वोत्तमा मन्यते यतः सिद्धपदं प्राप्तुं समर्थो भवति मनुष्य एव। मोक्ष-साधना मनुष्यगतौ एव कर्त्तुं शक्यते।

योनिष्वपि तरतमता भवति। जीवः शुभकर्मभिः क्रमश उन्नततरां योनिं प्राप्नोति। प्रमादवशाद् शुभकर्मोपार्जने कृते नीचयोनिष्वपि जन्म गृह्णाति जीवः। पर्वतारोहणकाले निरन्तरमुच्चस्थानमेव न प्राप्यते। क्वचित् क्वचिन्निम्नस्थलेऽप्यवतीर्यते। पतित्वोत्थानम् उत्थाय चलनम् चलित्वा लक्ष्य प्राप्तिः — इति क्रमः। विविधयोनिषु जन्मग्रहणेऽपि एतत्सत्यम्।

विवेकमाश्रित्य जीवा अशुभकर्मभिरात्मानं रक्षन्तो निरन्तरं शुभकर्मोपार्जनं कर्त्तुं प्रयत्नशीला भवन्ति चेत् क्रमश उन्नतयोनिषूत्पन्नाः भवन्ति। इत्थं प्रगतिं कुर्वन्त एकदा मनुष्यभवं प्राप्नुवन्ति।

मनुष्यभवं प्राप्यं जीवनस्य अन्तिमं लक्ष्यं मोक्षं प्राप्तुं साधनाम् कुर्वन्ति जीवाः। तस्यां सफलतां च लभन्ते। अतो मोक्षाभिलाषिणां कृतेऽतीव महत्त्वपूर्णो मनुष्यभवः।

# १४९. ममतात्यागः

*ममत्तं छिन्दए ताए*
*महानागोव्व कंचुयं ॥*

*—उत्तराध्ययनसूत्रम् १९/८७*

नागानां शरीरस्योपरि कञ्चुक उत्पद्यते । प्रतिवर्षं एकदा सो पतति। शनैः शनैः पुनर्नूतनः कञ्चुक उत्पन्नो भवति ।

कञ्चुके निवसन्नपि नागस्तस्मिन्नासक्तो न भवति । समाप्ते वर्षे तत्कालं शरीरोपरि स्थितं सूक्ष्मकञ्चुकं सहजरूपेण परित्यज्य कुत्राप्यन्यत्र व्रजति । कञ्चुकं प्रति तस्य मनसि किञ्चिदपि ममत्वं न भवति ।

तथैवात्मकल्याणस्य साधनां कुर्वाणः साधकोऽपि गृहं कुटुम्बं कुलं बहुमूल्यवस्त्रालङ्कारपुञ्जं प्रति ममत्वं त्यक्त्वाऽन्यत्र गच्छति, प्रव्रज्याम् अङ्गीकरोति ।

प्रव्रजितावस्थायामपि नाना वस्तुभिः तस्य सम्पर्को भवति । सम्पृक्तवस्तुजातं प्रति रागोत्पत्तिः सम्भवेत् । अबहुमूल्य-साधारण-वस्त्रयुगलं प्रति ममता सम्भवेत् । भिक्षार्थनिर्मितकाष्ठपात्रपुञ्जं प्रति ममत्वं सम्भवेत् । न केवलमेतदपितु, सम्बद्धस्त्रीपुरुषादीन् प्रत्यपि मोह उद्भवेत्। सम्बद्ध गुरुदेवं प्रति शिष्यगणं प्रति वा ममता सम्भवेत् । स्वशरीरं प्रति तु ममता प्रायः सर्वेषां मनसि भवत्येव । ममताया एतद् बन्धनं आत्मकल्याणसाधनायां बाधकत्वात् त्याज्यमस्ति ।

# १५०. संयती महर्षिः

*अणुन्नए नावणए महेसी*
*न यावि पूयं गरिहं च संजए॥*

*—उत्तराध्ययनसूत्रम् २१/२०*

महर्षिः कः ?

यस्मिन्नहङ्कारो दीनता चापि न स्याताम्।

संयतः कः ?

यस्मिन्निन्दायां प्रशंसायाञ्च समभावः स्यात्।

अहङ्कारो दोषोऽस्ति, यतो यः स्वकं महत्तमं मन्यते स उन्नतो भवितुं नार्हति। अहङ्कारो विकर्षको भवति। सर्वे जनोऽहङ्कारिणो दूरं गन्तुं इच्छति। अतोऽहङ्कारी केनापि सह मित्रतां कर्त्तुं कस्यापि मित्रतां प्राप्तुं च नार्हति।

दीनतापि दोषोऽस्ति। यतो यो स्वकं दीनं मनुते तस्य सुधारो विकासो वा बाधितो भवति। एतादृशो मानवः सदा निराशो हताश उत्साहविहीनो भवति।

स्वनिन्दां श्रुत्वा क्षोभो उद्भवति चेत्स दोषो गण्यते। यतो यथार्थया निन्दया आत्मसुधारस्य प्रेरणा लभ्यते, सा उपादेया। अयथार्था निन्दा भवत्युपेक्षणीया। अत एव निन्दाजन्यः क्षोभो दोषत्वात् त्याज्यः।

स्वप्रशंसां निशम्य मनसि कामं स्यात्प्रसन्नता, कित्वभिमानो न भवेदित्यवधातव्यम्। कृता प्रशंसा सद्गुणेषु आधृताऽस्ति चेत्सद्गुण-वर्धनार्थं प्रयतितव्यम्। मिथ्या प्रशंसा कृता चेत् तां प्रति तूपेक्षावृत्तिः स्वीकरणीया।

संयतो महर्षिर्भवेदेतादृशः।

# १५१. मार्गे गृहम्

*संसयं खलु सो कुणई*
*जो मग्गे कुणई घरं॥*

*—उत्तराध्ययनसूत्रम् ९/२६*

मोक्षोऽस्माकं चरमं लक्ष्यम् अन्तिमं गन्तव्यस्थलम् अस्ति। तस्य साधनापथः सदाचारः।

इत्थं गन्तव्यस्य मार्गस्य चैकदा निश्चितबोधे सञ्जाते साधकः स्वीयसाधनायां संलग्नो भवति। तावत् सो विश्रान्तेर्विचारं न करोति, यावत् स्वलक्ष्यं नाप्नोति।

तथापि भवन्ति कतिपये जनाः तादृशा ये गन्तव्यं प्रति पदं स्थापयन्ति, किन्तु पश्चात्काठिन्येन व्याकुलीभूय मार्गत्यागं कुर्वन्ति। ते भवन्त्यतीव चतुराः।

चातुर्येण ते चिन्तयन्ति यत् काठिन्यजन्यव्याकुलतया मार्गत्यागस्य तथ्यं यदि ज्ञास्यन्ति जनास्तर्हि तेऽस्मान् भीरून् कलयिष्यन्ति। तद् अपयशसाऽऽत्मानं रक्षितुं ते मार्गस्य विषये संशयं प्रकटनपरा भवन्ति।

ते कथयन्ति यत्प्रस्थानात्पूर्वम् मार्गस्य परीक्षणं न कृतमस्माभिर्यत् स सन्मार्गोऽस्ति कुमार्गो वा। प्रस्थानस्य पश्चादेवास्माभिर्ज्ञातम् यत्स कुमार्गोऽस्ति; अत एव वयं मार्ग त्यागं कर्त्तुं विवशाः स्मः, मार्गे एव गृहनिर्माणं कृत्वात्रैव स्थास्यामो वसामः, एकं पदमप्यग्रे न गच्छामः।

# १५२. मायामृषावादः

*सादियं न मुसं बूया ॥*

*—सूत्रकृताङ्गसूत्रम् १/८/१९*

मिथ्या भाषणं गर्हितम् पापमस्ति अनिष्टं मन्यते, तत्; किन्तु अनिष्टताया मात्राया निर्णयस्तावत्कर्त्तुं न शक्यते यावदेतन्न ज्ञायते यन्मिथ्याभाषणस्य कारणं प्रयोजनञ्चात्र किमस्ति।

केचिज्जनाः स्वीयमपराधं गूहितुं मृषा वदन्ति। सम्भाव्यदण्डस्य भयः तानेवं कर्त्तुं प्रेरयति, किन्त्वनेन अपराधकारिणी मनोवृत्तिर्न नश्यति। परिणामतो मिथ्यावादिनां पतनं क्रमश भवत्यधिकतरम्। तेषामुद्धारोऽसम्भवो भवति, तेषामुत्थानस्योन्नतेर्वाऽऽशा धूसरा संजायते।

केचिज्जना, अन्येषां प्राणिनाम् प्राणरक्षार्थं मृषा भाषन्ते। अहिंसायाः करुणाया भावनया प्रेरितोऽयं मृषावादः पवित्रः पुण्यप्रदो भवति।

कतिपये जनाः स्वीयमनुचितं स्वार्थं साधयितुं असत्यं वदन्ति। तेषां चेतसि कपटं विराजते। अन्यजनवञ्चनार्थं यदुच्यते तस्मिन् दूषिता भावना भवति। अतः तादृक् कथनं शास्त्रीयभाषायां मृषावादो मायामृषावादो वोच्यते। एतत्पापमस्ति महत्। अज्ञानस्याल्पज्ञानस्य वशाद् भाषितमसत्यमुपेक्षणीयं भवितुमर्हति; परन्तु ज्ञात्वापि धूर्त्ततावशाद् भाषितं असत्यं अक्षम्यम् अपराधकृत्यमस्ति।

# १५३. मित्रं शत्रुः

*अप्पा मित्तममित्तं च*
*सुप्पट्ठियदुप्पट्ठियो ॥*

*—उत्तराध्ययनसूत्रम् २०/३७*

सुप्रवृत्तः सदाचारनिरत आत्मा एवास्मदीयं मित्रम्। एवं दुष्प्रवृत्तो दुराचारनिरत आत्मा एवास्मदीयः शत्रुः।

सुष्ठु प्रवृत्तिरात्मानमुन्नतिपथे नयति। तेनात्मनः सद्गतिर्भवति। कुत्सिता प्रवृत्तिरात्मानमधः पातयति। तेनात्मनो दुर्गतिर्भवति।

शुभायाः प्रवृत्तेः सदाचरणस्य वा प्रेरणां ददाति सद्भावना। एवमेवाशुभायाः प्रवृत्तेर्दुराचरणस्य वा प्रेरणां ददाति दुर्भावना।

सद्भावदुर्भावयोर्जन्मस्थलं किम् ? मनः यदुच्यतेऽन्तःकरण-मन्तरात्मा वा।

विकारग्रस्तमन्तस्तलं दुर्भावैर्यदा जीवं दुर्गतिं नयति, तदा शत्रुः भवति। विपरीतमस्माद् सद्भावैर्यदा अन्तस्तलं जीवं सद्गतिं नयति, तदा मित्रम् भवति।

अन्यान् जनान् मनुष्यो रागवशाद् मित्राणि मनुते। एवमेव द्वेषवशादन्यान् जनान् स शत्रुन् मनुते।

किन्तु रागद्वेषवशीभूतो यो न भवति स सुप्रवृत्तमात्मानमेव मित्रम् तथा दुष्प्रवृत्तमात्मानमेव शत्रुम् मनुते।

# १५४. मित्रनाशिका

*माया मित्ताणि नासेइ ॥*

*—दशवैकालिकसूत्रम् ८/३८*

मायाशब्दः कपटं छलं वाऽत्र बोधयति। यथा क्रोधेन प्रीतिः प्रणश्यति, अभिमानेन विनयो नश्यति तथैव मायया मित्राणि नश्यन्ति।

मित्रताया आधारो विश्वासः; किन्तु मायाया आधारो विश्वासघातः। अतोऽनयोर्द्वयोरपि मनोवृत्त्योर्मिथो घोरविरोधः बलवती शत्रुता, षट्त्रिंशदङ्कवत्परस्परा पराङ्मुखता। एतयोरुपस्थितिरेकस्मिन् मनुष्ये युगपदसम्भवा। यदा मनसि मित्रतायाः पवित्रभावना विराजमाना भवेत् तदा तत्र मायासदृशगपवित्रा कुटिला मनोवृत्तिर्नसीना स्यात्। यस्मिन्काले च कस्यचिन्मनसि मायाया अन्धकारो व्याप्तः स्यात्तस्मिन् काले तत्र मैत्रीप्रकाशो नोपलब्धुं सम्भवेत्।

मायावी मिथ्याभाषणेनान्यान् वञ्चयित्वा स्वार्थं साधयति; किन्तु एतद् विस्मरति स यच्चूलिकाया (स्टोव्हस्य वा) उपरि काष्ठपात्रं एकदैव स्थापयितुं शक्यते, नान्यदा। यदा कस्यचित्कपटं प्रकटी भवति तदा तं प्रति विश्वासः समाप्तो भवति। यत्र न विश्वासः तत्र न मित्रता। यतो माया मित्राणि नाशयति।

# १५५. मुक्तः कः ?

*विमुत्ता हु ते जणा*
*जे जणा पारगामिणो ॥*

*—आचाराङ्गसूत्रम् १/२/२*

बन्धनम् ! कियान् कुत्सितः शब्द एषः ? कस्मैचिदपि न रोचते बन्धनम् । कः कामयतेऽस्मिन् संसारे पाशबद्धमात्मानमवलोकयितुम् ? न कोऽपि ।

एतस्य विपरीतार्थकपदमस्ति 'मुक्तिः' । मुक्तिं कामयन्ते सर्वे प्राणिनः । कस्मिंश्चित् पाशे ये बद्धाः सन्ति तेऽतितीव्रां मुक्तेरभिलाषां कुर्वन्ति । कारागारे स्थिता ये पुरुषाः सन्ति ते तस्माद् बहिरागन्तुमिच्छन्ति ।

ज्ञानिनो मनीषिणोऽस्मान् उपदिशन्ति यदेष संसारः, अस्मिन् जायमानं जन्म-जरा-मरण-चक्रमपि एकं बन्धनमस्ति । मनः कामनानां विषयवासनानां वा जटिले जाले पतितो मानवो मुक्तिसुखं लब्धुं न समर्थः । यो भवति कामनामुक्तः (निष्कामः) स एव यथार्थतो मुक्तः ।

कारागाराद् यो मानवः कथञ्चिन्मुक्तः सोऽपराधं विधाय पुनस्तत्र प्रविशति । कक्षाद् बहिर्भ्रमन् पुरुषः क्लान्तः सन् विश्रामार्थं पुनः कक्षं प्रविशति; किन्तु यः कश्चिदेकवारमपि संसारान्मुक्तो भवति स कदापि पुनः संसारं न प्रत्यागच्छति ।

अस्यां स्थितौ भवन्त एव सम्यग् विमृश्य कथयन्तु कोऽस्ति यथार्थतो मुक्तः ।

# १५८. मुखरतात्यागः

*मोहरिए सच्चवयणस्य पलिमन्थू ॥*

*— स्थानांगसूत्रम् ६/३*

ये बहुभाषिणो भवन्ति ते कामपि वार्त्तां निगूहितुं न शक्नुवन्ति। गोपनीयमपि रहस्यं सहसा प्रकटीकुर्वन्ति। अत एव मुखरता मन्यते त्यक्तव्या। मुखरतायास्त्याज्यत्वेऽन्यत्कारणमस्ति सत्यवचनविघातः।

वावदूकाः प्रायो भाषणं कृत्वैव तस्मिन् स्वकर्त्तव्यसमाप्तिं पश्यन्ति। स्वयमाचरणं न कुर्वन्ति। आचरणस्योत्तरदायित्वं नावगच्छन्ति।

यदा स्वकीयवचनस्य पालनमपि ते न कुर्वन्ति, तदा कथमेतद् वक्तुं युज्यते यत्तेषां कथनमस्ति सत्यमेव ?

एते जनाः स्थाने स्थाने महत्यो वार्त्ताः कुर्वन्ति। स्वहितैषितां प्रमाणीकर्त्तुं यतमाना आश्वासयन्ति जनान्। एवं जनैस्तात्कालिकीं प्रशंसां प्राप्नुवन्ति; परन्तु यदा ते दत्तान्याश्वासनानि न पूरयन्ति, स्वीयवचनानि च न पालयन्ति, तदा जनैः कृतां निन्दामपि लभन्ते।

इत्थं तैः प्राप्ता प्रशंसा स्थायिनी न भवति।

वरं तु तदा स्याद् यदा वयं स्वीयां शक्तिं योग्यताञ्च सम्यग् विज्ञाय यावत्कार्यं कर्त्तुं शक्नुयाम तावदेव वचनं ददीमहि। मिथ्याऽऽश्वासनदानाद् विरमाम। इत्थं सत्यवचनविघातुकाया मुखरतायाः स्वात्मानं रक्षितुं सक्षमाः भवाम।

# १५८. मूर्खसङ्गतिः

*अलं बालस्स संगेणं॥*

*—आचाराङ्गसूत्रम् १/२/५*

सहवासिनः परस्परं प्रभाविता भवन्ति —इत्येकमनुभूतमस्ति तथ्यम्। दुर्व्यसनग्रस्ते सति मित्रे वयमपि शनैः शनैर्दुर्व्यसनिनो भवामः। बुद्धिमता मित्रेण साकमुषित्वा वयमपि बुद्धिमन्तो भवामः। विदुषा मित्रेण सार्धमुषित्वा वयमपि विद्यार्जनाय प्रेरिताभूत्वा विद्वांसो भवामः।

विपरीतमस्मादज्ञे मूर्खे वा सति मित्रे तस्याज्ञता मूर्खता वाऽस्मासु संक्रमिता स्यात्।

कदाचित्तु मूर्खाणां मित्रता निर्दोषानप्यस्मान् सङ्कटेषु पातयति। स्पर्द्धापि विदुषा श्लाघ्या न श्लाघ्या मूर्खमित्रता। इति समीचीन मेवोच्यते। अनेन ज्ञायते यन्मूर्खमित्रस्यापेक्षा विद्वान् शत्रुः हानिरहितो भवति अतः प्रशंसनीयः।

उच्यते यत्सतां हि मैत्री साप्तपदीना। सप्तपदानि येन सह चलितानि तेन मित्रता भवति। अनेन सिद्ध्यति यन्मित्रता मंक्षु जायते शत्रुता तु शनैः शनैः।

मनीषिणः कथयन्ति— यद्यस्माभिरात्मकल्याणपथे प्रगतिः करणीया, आत्मोन्नतिरात्मविकासो वा कर्त्तव्यः तर्हि कदापि बालजनैः (अज्ञैः मूर्खैः वा) सहवासो न कार्यः। सत्सङ्गतिः सदा कार्या, न कार्या मूर्खसङ्गतिः।

# १५८. परिग्रहः कः ?

*मुच्छा परिग्गहो वुत्तो ॥*

*— दशवैकालिकम् ६/२१*

मूर्च्छा परिग्रह उक्तः । का मूर्च्छा ? आसक्तिः, ममता, मोहः, रागो वा ।

अस्माकं परितो या सामग्र्यस्ति सर्वापि सा परिग्रहपदवाच्या न भवति । यस्मिन् वस्तुनि अस्माकं ममता, आत्मीयता वा जागर्त्ति, तदेव वस्तु परिग्रहे गण्यते ।

निष्परिग्रहिणा प्रभुणा महावीरेण परिग्रहस्य त्रयो भेदा वर्णिता— उपकरणपरिग्रहः, कर्मपरिग्रहः, शरीरपरिग्रहश्च ।

परिग्रहविरमणव्रतं अङ्गीकृतवते साधकाय परिग्रहस्य सर्वथा त्याग आवश्यको नास्ति, न च स सम्भवः । केवलज्ञानिनोऽर्हतोऽपि चत्वारि कर्माणि भवन्ति शेषाणि । शरीरं तु अन्तिमश्वास पर्यन्तं तिष्ठति । अतः सर्वथा परिग्रहमुक्तः केवलं सिद्धदेव एवास्तीति वक्तुं शक्यते ।

तथापि श्रमणत्वं योऽङ्गीकरोति सो नूतनः साधकोऽपि ''सव्वाओ परिग्गहाओ वेरमणं'' इति सङ्कल्पं प्रतिज्ञां वा करोति । तस्य तात्पर्यमेतदस्ति यदुपकरणानि सीमितानि स्वल्पानि स्युः, चतुर्णां घातिकर्मणां त्यागः क्रियेत तथोपकरणेषु, कर्मसु, शरीरे च मूर्च्छा न भवेत्; यतो मूर्च्छा एव वस्तुतः परिग्रहोऽस्तीति उच्यते ।

## १५९. अमूर्त्तभावाः

*नो इन्दियग्गेज्झ अमुत्तभावा*
*अमुत्तभावा वि य होइ निच्चं ॥*

—उत्तराध्ययनसूत्रम् १४/१९

यथार्थतत्त्वानां ज्ञातारः सम्यग् जानन्ति यत् पदार्था द्विविधा भवन्ति— मूर्त्ताः अमूर्त्ताश्च । केचित् साकाराः केचिच्च निराकाराः । केचित् पदार्थाः प्रत्यक्षाः केचिदप्रत्यक्षाः परोक्षा वा भवन्ति ।

शब्द-रूप-गन्ध-रस-स्पर्शगुणसम्पन्नाः पदार्थाः क्रमशः कर्णाक्षिनासिकाजिह्वाचर्मभिरनुभूयन्ते। प्रत्यक्षं न केवलमक्षिभ्यामेव भवति, अपितु प्रत्येकेनेन्द्रियेण भवति; अत एव वयं वदामः ''श्रुत्वा पश्यन्तु, घ्रात्वा पश्यन्तु, जग्ध्वा पश्यन्तु, स्पृष्ट्वा पश्यन्तु'' इति ।

येऽपि पदार्था इन्द्रियैः प्रत्यक्षीक्रियन्ते ते सर्वे मूर्त्ताः कथ्यन्ते । ते सर्वे क्षणभङ्गुरा नश्वरा वा भवन्ति ।

एतेभ्यो विपरीताः पदार्थाः— आत्मा(जीवः), मोक्षः, परमात्मा, धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्तिकायः इत्यादयोऽमूर्त्ताः भवन्ति । इन्द्रियैरेतेषां प्रत्यक्षं कर्त्तुं न शक्यते । यद्यपि एतेषाम् अनुभवः क्रियते तथापि प्रत्यक्षं न क्रियते ।

एतादृशा सर्वेऽप्यमूर्त्ताः पदार्था नित्याः शाश्वता भवन्ति । अस्माभिस्त एवावलम्ब्याः ।

# १६०. मोहस्य नाशकता

*लुप्पन्ति बहुसो मूढा*
*संसारम्मि अणंतए॥*

*— उत्तराध्ययनसूत्रम् ६/१*

मोहग्रस्तो ''मूढ'' इत्युच्यते। येषां मनसि मोहस्य निवासो भवति ते जगत्यस्मिन् विविधदुःखभाजो भवन्ति।

यस्मिन् वस्तुनि ममतोत्पन्ना भवति, सा न लभ्यते चेत्तत्प्राप्तुं प्रयासः क्रियते निरन्तरम्। प्रयासे तस्मिन्नौचितेः नीतेर्वा ध्यानमपि न दीयते। इत्थं मूढो मानवो धर्मभ्रष्टस्तु भवत्येव तथा यावत्तदभीष्टवस्तुनः प्राप्तिर्न भवति तावदतीवाशान्तस्तिष्ठति।

अभीष्टस्य वस्तुनः प्राप्तेरनन्तरमपि मनसि पूर्णा शान्तिर्न जायते। यतः प्राप्तमभीष्टं तद्वस्तु न नश्येत्, चौरैःसुरक्षितम् स्यात् तत् (कोऽपिचौरः तन्न चोरयेत्) इति चिन्ता शिरस्यारूढा भवति।

यदा मित्राणि प्रतिवेशिनो वा समीपमागत्य तद्वस्तु याचन्ते तदा तद् दीयते चेत् तस्मिन् विकृतेराशङ्का भवति, न दीयते चेन्मित्राणि शत्रुषु परिवर्त्तन्ते। शतवारं याचिते सति दत्तं वस्तु यद्येकवारमेव न दीयते, तर्हि याचकोऽस्मासु कुपितो भवति। कियान् विचित्र एष मानवस्वभावः?

अस्यामवस्थायां यो वस्तुमोहोऽस्मान् संसारे विविधयोनिषु भ्रामयति, स एव यथाशक्ति शीघ्रं त्याज्यः।

# १६१. मृत्योरागमनम्

*णत्थि कालस्स णागमो ॥*

*— आचाराङ्गसूत्रम् १/२/३*

"मृत्युः !" कियान् भयङ्करोऽयं शब्दः ? कः प्राप्नुमिच्छत्येनम्? न कोऽपि ।

यदि गृहे कस्यापि पारिवारिकसदस्यस्य मृत्युः स्यात्तर्हि सर्वे कुटुम्बिनः शोकसागरे निमग्ना भवन्ति । पत्न्या मृत्यौ पतिर्विधुरो भवति तथा पतेर्मृत्यौ पत्नी विधवा भूत्वा दु:खाग्नौ ज्वलति ।

धर्माचार्याणां मरणे शिष्याः शोकसन्तप्ता भवन्ति तथा कस्याप्येकस्य शिष्यस्य मरणे गुरुवर्याणां हृदयं अतिव्याकुलं भवति ।

भूपतेर्मृत्यौ प्रजाजनेषु राष्ट्रपतेर्मृत्यौ देशवासिषु हाहाकारः श्रूयते।

इत्थमनिष्टो मृत्युः सर्वान् रोदयन्नप्यनिवार्यत्वात्सर्वैः सोढव्यः। यतो यस्य जन्म भवति तस्य मृतिरप्यवश्यम्भाविनी ।

तथापि संयमेन तपसाऽऽत्मानं पावयन्तः सर्वज्ञाः सर्वदर्शिनः मुक्तिधामप्राप्ता मृत्योः कष्टात्सर्वदा सुरक्षिता भवन्ति ।

मोक्षप्राप्तिर्मृत्युरोगस्यैकैवास्ति सफला अमोघा चिकित्सा ।

अत एव ये मुमुक्षव भव्याः सन्ति जनास्ते निरन्तरं धर्माचरणं कुर्वन्त आत्मकल्याणार्थं प्रयासनिरता भवन्ति। यत एतन्निश्चितं नास्ति यत्कदा भविष्यति जीवने मृत्योरागमनम् ।

## १६२. मार्दवम्

*माणं मद्दवया जिणे ॥*

*— दशवैकालिकसूत्रम् ८/३९*

तीव्रं प्रभञ्जनं महतस्तरूनुत्पाट्य भूमिशायिनः करोति; किन्तु भूमितले प्रसृतं प्रचुरमपि दूर्वादलं नोत्पाटयितुमर्हति । कथमेतत् ?

वृक्षा अहङ्कारेण उत्ताना भवन्ति; किन्तु दूर्वादले मृदुता नम्रता वा भवति । उत्तानतया वृक्षा उत्पाटयन्ते, किन्तु नम्रता दूर्वादलं रक्षति। तदहङ्कारिभ्यो मानवेभ्य उपदिशति यत्तैः कीदृशो व्यवहारः करणीयः।

अभिमानिनि विजयः प्राप्तव्यः, अभिमानेऽपि । उभयोरपि विजययोः प्राप्तये विनयोऽपेक्षितः । विनयेनैव सर्वत्र विजयः प्राप्यते । यत्र यत्र विनयस्तत्र तत्र विजय इति वक्तुं शक्यते ।

अभिमानिनः समक्षं स्वीयाभिमानस्य प्रदर्शनात् समस्या जटिलतरा भवितुमर्हति । विपरीतमस्माद् अभिमानिनः पुरतो विनयस्य प्रयोगः तस्याभिमानं न्यूनं करोति यतो विनीतस्य मृदुव्यवहारेणा-भिमानिनो मनः प्रभावितं भवति। तस्य मनस्यपि विनयाङ्कुराः प्रादुर्भवन्ति। तस्मिन्नपि दोषदंशः सम्भवति । अयमेवाभिमानिनि विनीतस्य विजयो न किम् ?

इत्थमेव स्वमनसि स्थितमभिमानं विजेतुं विनय आश्रयणीयः । अभिमानेन सद्गुणाः क्रमशः ह्रसन्ति, मार्दवेण क्रमशस्ते पुष्यन्ति वर्धन्ते च । अत एव कथ्यते— मानं मार्दवेन जयेत् ।

# १६३. मैत्री कार्या

*मेत्तिं भूएसु कप्पए॥*

*—उत्तराध्ययनसूत्रम् ६/२*

क्रोधः, अभिमानः, माया, लोभश्चैते चत्वारः कषायाः आत्मानम् उद्वेजयन्त्यशान्तं कुर्वन्ति । न केवलमेतत् किन्तु येषु ते प्रयुज्यन्ते तानप्युद्**वेजयन्ति, अशान्तान् कुर्वन्ति** ।

स्वकषायप्रदर्शनादुद्विग्ना अन्ये जना अस्माकं वैरिणो भवन्ति । तेऽस्मासु वैरं कुर्वन्ति । प्रतिक्रियायां वयमपि तेषु वैरं कुर्मः । इत्थं परस्परं वैरः प्रबलात्प्रबलतरो भवति ।

मित्रतायां निवसति सुखं, न वैरे । यदि वयमन्येषां समक्षं मित्रतायै हस्तं अग्रे कुर्मस्तर्हि अन्येऽप्येवं कुर्वन्ति । मित्रतायाः पश्चात् मित्रैः सार्धम् यदि वयं मैत्रीपूर्णम् व्यवहारं कुर्मः तर्हि तानि मित्राण्यपि तथैव कुर्वन्ति ।

इत्थं मैत्री परस्परं दिवसे द्विगुणा रात्रौ चन्द्रिकायां चतुर्गुणा वर्धतितराम्। यथा यथा मित्राणां संख्यायां वृद्धिर्भवति, तथा तथा मैत्री प्रगाढतरा भवति; परस्परं सहयोगे सुखे चापि वृद्धिर्भवत्येव ।

मित्ती मे सव्वभूएसु वेरं मज्झं न केणइ॥

इतिस्वीयं महत्सङ्कल्प प्रकटीकुर्वद्भिर्हितैषिभिर्मनस्विभि-र्महापुरुषैः वीतरागदेवैरादिष्टमेतदुपदिष्टमेतद् घोषितमेतद् यत्समस्त-प्राणिभिः साकं मैत्री कर्त्तव्या ।

# १६४. अहमेकाकी

*ए जे अहमंसि न मे अत्थि कोई*
*न याऽहमवि कस्सवि ॥*

*—आचाराङ्गसूत्रम् १/८/६*

एष संसारो महान् सरोवर इवास्ति, यस्मिन् तृणतुल्या मानवा इतस्तत आगच्छन्ति, मिलन्ति तथा कञ्चित् कालं सहवासस्य पश्चात् मृत्युरूपिणो वाताघातादितस्ततः पुनर्विकीर्णा भवन्ति।

यथा नद्याः परं पारं गन्तुं कतिचिद् यात्रिणः कस्मिंश्चिन्नौकायाम् आरुढा भवन्ति; किन्तु पारं गत्वा सर्वे विकीर्य स्वीयं स्वीयं गन्तव्य-स्थलमन्विष्यन्ति अथवा कस्मिंश्चिद् रेलयानप्रकोष्ठके यात्रिणो युगपदुपविशन्ति तथा स्वीये स्वीये स्थानकेऽवतीर्य स्वगृहं प्रति प्रस्थानं कुर्वन्ति, मोहवशीभूतास्ते स्वीयं आसनं, प्रकोष्ठकं, स्थानकं प्रति वा परिवर्त्य न पश्यन्ति तथैव संसारेऽप्यस्मिन् जीवा आगच्छन्ति, गृह-परिवार-मित्र-भोग्यसामग्री-धनादिना सम्पृक्ता भवन्ति, पुनर्वियुक्ता भवन्ति। संयोगे हर्षो वियोगे शोको मिथ्यामोहस्याज्ञानस्य च फलमस्ति।

स्वीयवैराग्यभावस्य पुष्ट्ये साधकैः(साधनारतैराध्यात्मिकैः श्रद्धालुभिः मानवैः) सदैवं चिन्तनीयम्— ''अहम् अस्म्येकाकी; कोऽपि मानवो किमपि च वस्तु वा मम नास्ति; अहमपि नास्म्यत्र कस्यचिदन्यस्य; ममता हि दुःखदायिका समता च सुखदायिका। अहमेकाकीति ज्ञानं मोहनाशकम्।''

# १६५. अहमन्य:

*अन्ने खलु कामभोगा अन्नो अहमंसि ॥*

*— सूत्रकृताङ्गसूत्रम् २/१/१३*

गीतं, वाद्यं, नृत्यं, सुन्दरं चित्रं, इत्रं, रम्या प्रकृतिः, पुष्पहारः, स्वर्णनिर्मितभूषणानि, मिष्टान्नानि, परिपक्वानि फलानि, कोमलशीतल-स्पर्शवन्ति वस्तूनीत्यादिविविधकामभोगविषयसामग्री जगत्यस्मिन् सर्वत्र विकीर्णा दृश्यते । कः प्राणी न भवति तां प्रति मोहितः ?

बहुसंख्यकाः प्राणिनः तां सामग्री प्राप्तुं भवन्ति प्रयासरताः। सफले प्रयासे तस्या उपभोगं कुर्वन्ति, तस्या क्षणभङगुरसुखस्यानुभूतिं कुर्वन्ति। आजीवनमेष क्रमश्चलति निरन्तरम् ।

साधवो मुनय आचार्या मार्गोपदेशकर्त्तारः स्थायिसुखप्राप्तये यमाध्यात्मिकं धार्मिकं वोपायं निर्दिशन्ति तं प्रति ते सर्वथोपेक्षामा-चरन्ति । सावधानेन मनसा तेषामुपदेशं न शृण्वन्ति ।

एतद्विस्मरन्ति ते यत्कामभोगानां सेवनं शरीरेण इन्द्रियैर्वा भवति; किन्तु आत्मा तेभ्यः स्वतन्त्रोऽस्ति ।

अचिरस्थायिसुखस्य प्राप्तिः लक्ष्यं नास्ति आत्मनः। शाश्वत-सुखस्यानुभूतिरेवात्मनश्चरमं पवित्रं लक्ष्यमस्ति । स्वलक्ष्यप्राप्तये कर्त्तव्यः प्रयासः सदा ।

प्रत्येकं मुमुक्षुरेवं मनसि चिन्तयेद् यद् अन्ये खलु कामभोगा अहम् चान्यः । अन्ये भौतिकपदार्था जीवोऽन्यः ।

# १६६. मोहग्रस्तता

*इत्थ मोहे पुणो पुणो सन्ना*
*नो हव्वाए नो पाराए ॥*

*— आचारांगसूत्रम् १/२/२*

अखिलः संसारः क्षणभङ्गुरः। अस्मिन् प्रत्येकं वस्तु अस्थिरमस्थायि च; अत लभ्यमाना वैषयिका सामग्र्यपि तथैवास्थिरा चिरस्थायिनी; यां प्रति मुग्धाः प्राणिनस्तां प्राप्तुमितस्ततो भ्रमन्ति।

इन्द्रियाणां प्रियविषयान् प्राप्तुं कृतेऽपि घोरे परिश्रमे वस्तुतः किम् लभन्ते प्राणिनः ?

इन्द्रियविषयैर्यत्सुखं लभ्यते, यद्यपि तत् क्षणिकं भवति तथापि तेषाम् प्राप्तये सुचिरं प्रयत्नः क्रियते।

अस्य क्षणिकवैषयिक सुखस्यानुभवं कारयित्र्यां सामग्र्यां मोहः कथं क्रियेत ? ज्ञानिनस्तु चिन्तयन्त्येवमेव। स्वयमपि ते मोहाद् दूरं वसन्ति अन्यानपि दूरे स्थातुं प्रेरयन्ति।

उच्यते यद्रजकस्य कुक्कुर इतो भ्रष्टस्ततो भ्रष्टो अर्थात् स नैव हि रजकस्य गृहे उपयोगी भवति, न च घट्टेऽपि उपयोगी भवति। मोहग्रस्तस्याप्यवस्था एतादृश्येव। स संसारसागरस्य न पारं गच्छति, न चावारं तिष्ठति। मध्येजलं निमग्नः स केवलं कष्टं प्राप्नोति। मोहस्तं निरन्तरं रोदयति, किन्तु तं त्यक्तुं नोत्सहते सः। कियती कष्टदायिकास्ति मानवेभ्य इयं मोहग्रस्तता।

# १६७. निर्वाणम्

*अगुणिस्स नत्थि मोक्खो*
*नत्थि अमोक्खस्स निव्वाणं ॥*

*— उत्तराध्ययनसूत्रम् २८/३०*

यदि कोऽपि मानवो अपराधं करोति तर्हि मन्तव्यं यत्तस्मिन् मनोविकारस्तथा सच्चरित्राभावश्चोभौ वसतः ।

अपराधी दण्डं प्राप्नोति राज्येन, समाजेन, आत्मनाऽपि। दण्डादात्मानं रक्षितुं अपराधो न कर्त्तव्यः। मानसिकं स्वास्थ्यमेवापराधमुक्तेरुपायः। मानसिकं स्वास्थ्यं सच्चरित्रे तथा सच्चरित्रञ्च सद्गुणेषु अवलम्बितमस्ति ।

यस्मिन् मानवे स सद्गुणानामभावोऽस्ति स मोक्षं प्राप्तुं न शक्नोति अर्थात् दुःखेभ्यः सो मुक्तो भवितुं नार्हति ।

यो दुःखैर्न मुक्तः स सदा चिन्ताग्रस्तो भवेद् अर्थाद् दुश्चिन्ताभिः स परिवृतस्तिष्ठेत् । निर्वाणं तु तस्मादतीव दूरे वसेत् ।

किं तन्निर्वाणम् ? उच्यते, आत्मनि परमायाः शान्तेरनुभूतिः निर्वाणपदेन सूच्यते । निर्वाणम् मोक्षार्थमत्यावश्यकं मन्यते, किन्तु वस्तुतो निर्वाणार्थमेव मोक्षस्यावश्यकता भवतीत्येषा सूक्तिः कथयति। अन्यत्किं कथयति ?

अन्यदेतत्कथयति यन्मोक्षं प्राप्तुं सद्गुणानामुपासना साधना च कर्त्तव्या। जीवने सद्गुणानां कृते स्थानं स्याद्यतोऽगुणिनो मोक्षोऽमुक्तस्य च निर्वाणं न भवेत् ।

# १६८. यथावादी तथाकारी

*करणसच्चे वट्टमाणे जीवे*
*जहावाई तहाकारी यावि भवइ ॥*

— उत्तराध्ययनसूत्रम् २९/५१

पापं कुत्सितं दुःखदमतस्त्याज्यम् । पापस्थाने पुण्यमुपार्जनीयम्।

यः कदापि स्वयं न करोति पापम्, नान्यैर्जनैः कारयति, न चाप्यन्यान् जनान् पापाचरणं कुर्वतोऽनुमोदयति, शास्त्रीयायां भाषायां सो ''करणसत्ये वर्त्तमानो जीव'' इति कथ्यते ।

एतादृक्षाणां सद्भावभरितानां सतां व्यवहारोऽतीव शुद्धो आदर्शश्च भवति; अतः सर्वेभ्यो मानवेभ्योऽनुकरणीयः । मनसि वचसि काये पुण्यपीयूषपूर्णाः एते सज्जनाः सम्पृक्तान् सर्वानपि जीवान् उपकारपरम्पराभिः प्रीणयन्तः सुखेन स्वकालं यापयन्ति । महात्मवत् तेषां मनस्येकता वचस्येकता कर्मण्यप्येकता भवति। दुरात्मवत्तेषां मनस्यन्यद् वचस्यन्यत्कर्मण्यन्यन्न भवति ।

दुर्जनस्य कार्याणि तस्य वाण्यनुगुणानि न भवन्ति । तस्य वाचाऽपि विचारानुरूपा न भवति । अन्यद् विचारयति सः, अन्यद् वदति तथा अन्यदेव करोति । कस्तस्मिन् मानवे विश्वसिति ? न कोऽपीति निश्चितम्।

विपरीतमस्मात्सज्जनः सर्वेषां विश्वासमर्जयति । यतः स यथा कथयति तथैव करोति । करणसत्ये वर्त्तमानः सोऽस्याः सूक्तेरनुसारं ''यथावादी तथाकारी'' भवति ।

## १६९. रसनाया उपर्यङ्कुशः

*अप्पपिण्डासि पाणासि*
*अप्पं भासेज्ज सुव्वए॥*

*—सूत्रकृताङ्गसूत्रम् १/८/२५*

रसना करोति कार्यद्वयम्— भोजनं भाषणञ्च। द्वयोरपि कार्ययोः संयमस्य महती भवत्यावश्यकता।

स्वादवशीभूता ये अशने पाने च संयता न भवन्ति, रोगवशीभूताः ते पश्चात्तपन्ति। रोगप्रभावात्तेषां शरीराणि दुर्बलानि(शक्तिहीनानि) भवन्ति। शक्तिहीने शरीरे रोगाः शीघ्रमाक्रामन्ति। परिणामत एकस्य अनन्तरमन्यो रोगः शरीरे उद्भवति। इत्थं ते सदैव रुग्णा दृश्यन्ते।

आजीवनमेतादृशा जनाः चिकित्साचक्रे पतित्वा वैद्येभ्यो डाक्टरेभ्यो हकीमेभ्यो वा धनं यच्छन्ति, किन्तु स्वरसनेन्द्रियवशीकरणस्य लघुतमोपायस्तैर्नोपादीयते।

एवमेव रसनेन्द्रियस्य द्वितीये कार्ये भाषणेऽपि संयमस्य महती आवश्यकताऽनुभूयते। बहुभाषिणो हृदये काऽपि वार्त्ता स्थिरा न भवति। यदा कदा रहस्यप्रकाशे महाननर्थः सम्भवेत्।

संयमिनः पुरुषाः सम्यग् विचार्य स्वमुखाच्छब्दानां प्रयोगं चिकीर्षन्ति, कुर्वन्ति च। इत्थं मिथ्याविवादेन कलहेन चात्मानं रक्षन्ति। संयतानां कृते रसनाया उपर्युङ्कुश आवश्यकः।

# १७०. रागद्वेषक्षयः

*रागस्स हेउं समणुन्नमाहू ।*
*दोसस्स हेउं अमणुन्नमाहू ॥*

*—उत्तराध्ययनसूत्रम् ३२/३६*

शब्दः, रूपः, रसः, गन्धः, स्पर्शश्च —एते पञ्च विषयो रागस्यापि हेतवो भवन्ति द्वेषस्य चापि ।

कोमलाः प्रशंसात्मकाः शब्दा अस्मभ्यं रोचन्ते, कठोरा निन्दात्मकाश्च शब्दा न रोचन्ते । सुन्दरं रूपं भवति चक्षुषोः प्रियं, असुन्दरञ्चाप्रियम् । जिह्वा स्वादु भोजनं प्राप्तुं भवति लालायिता, कटुकं पर्युषितं निःस्वादं भोजनं नेच्छति। सुगन्धिपुष्पैरित्रेण च नासिका प्रसीदति, दुर्गन्धिपुष्पैश्च नासिकाऽप्रसीदति। कोमलानि शीतलानि वस्तूनि चर्म स्प्रष्टुमिच्छति, कठोरेभ्य उष्णेभ्यो वस्तुभ्यो दूरे स्थातुमिच्छति ।

अयमाशयो यत्सुन्दरमधुरशब्दादिविषया यैः मानवैर्वस्तुभिर्वा-लभ्यन्ते तान् प्रति रागो मनसि जायते तथा अरोचकशब्दादिविषया यैर्लभ्यन्ते तान् प्रतिद्वेषो मनसि समुद्भवति ।

रागेण मानवः पक्षपाती भवति । तेन निष्पक्षो न्यायो भवितुं नार्हति । द्वेषेणातिक्रूरतां गच्छति । क्रूरतया अत्याचारी भवति । अत एतद् वारं वारमुपदिश्यते महात्मभिर्यद् आत्मकल्याणसाधकः संयतो रागद्वेषा उभावपि त्याज्यौ मनुते । तयोः क्षयः कर्त्तव्यः ।

# १७१. मोक्षसाधनम्

*रागस्स दोसस्स य संखएणं।*
*एगंतसोक्खं समुवेइ मोक्खं॥*

*—उत्तराध्ययनसूत्रम् ३२/२*

रागो रोदयति स्वकम्, द्वेषस्तु अन्यान् जनान्। इत्यनयोर्भेदः।

दुःखेन रोदनं कस्मै रोचते ? न कस्मायपि। अस्यां स्थितौ वयम् अन्यान् रोदयितुं कथं प्रयतेमहि ? जीवनस्य साफल्यं निहितमस्ति हसने हासने अर्थात् प्रसन्नतायाः स्वीकरणे वितरणे च।

जीवनसाफल्यस्यास्मिन् मार्गे रागद्वेषाख्यौ द्वौ प्रस्तरावायातौ । तौ पूर्वं दूरीकरणीयौ। कथम् ?

उच्यते, मनसि यावद् रागस्य साम्राज्यमस्ति तावद् अस्माभिः स्वीयदोषा न दृश्यन्ते। एवमेव मनसि यावद् द्वेषाः तिष्ठति तावदन्येषां गुणा न दृश्यन्ते। इत्थं रागकारणात् स्वकं सुधारयितुं न पारयामस्तथा द्वेषकारणाद् अन्येषां गुणान् शिक्षितुं न शक्नुमः।

अतो रागद्वेषयोरुभयोस्त्यागो यथाशक्ति शीघ्रं करणीयः। रागद्वेषयोः संक्षयेणैव स मोक्षं लब्धुं शक्यः, य एकान्तसुखस्वरूपोऽस्ति। मोक्षे शाश्वतं सुखं विराजते। किञ्चिदपि दुःखं तत्र न विद्यते। यस्मिन् सर्वत्रानन्तानन्दस्य साम्राज्यं वर्त्तते स मोक्षः सर्वेभ्यः काम्यः। रागद्वेषसंक्षयो मोक्षसाधनम्।

# १७२. लाभालाभौ

*लाभुत्ति न मज्जिज्जा*
*अलाभुत्ति न सोइज्जा ॥*

*—आचाराङ्गसूत्रम् १/२/५*

निरन्तरं वयं लक्ष्यप्राप्तये प्रयतामहे। प्रयत्नस्य परिणामौ द्वावेव भवतः— लाभोऽलाभश्च । लाभालाभयोरेकः परिणामोऽवश्यम्भावी । सफले प्रयत्ने भवति लाभः, विफले प्रयत्ने चालाभः ।

लाभेन को लाभः? उच्यते, लाभः प्रयत्नं प्रेरयति । एवमेवालाभः प्रयत्नं श्लथयति । इत्यलाभस्या हानिः ।

लाभेन का हानिः ? उच्यते, लाभेनाभिमानो उत्पन्नो भवति । अभिमानी स्वकं महत्तमं मनुते । अभिमानिनः प्रगतिरवरुध्यते । एषैव महती हानिः । एवमेवालाभः शोकमग्नं करोति मानवम् । शोकमग्नो मानवः स्वकं तुच्छमवगच्छति । हीनवृत्तिस्तस्य मनसि निवासं करोति, इत्यलाभस्य हानिः ।

इत्थं लाभालाभयोर्हानिलाभौ विचारणीयौ । लाभालाभजन्यौ यौ शोकाभिमानौ तौ मानवेभ्यः पुरुषार्थबाधकौ भवतः ।

शोकादभिमानाच्च यो दूरे तिष्ठति, स एव बुद्धिमान् साधकोऽस्तीति वक्तुं शक्यते । एतादृशः साधकः स्वीयमनोवृत्तिद्वयस्य वशवर्त्ती न भवति । कामं भवतु लाभोऽलाभो वा ।

# १७३. लाभलोभौ

*जहा लाहो तहा लोहो*
*लाहा लोहो पवड्ढइ ॥*

*— उत्तराध्ययनसूत्रम् ८/१७*

प्रत्येकं संसारीजीवः स्वार्थं साधयितुं प्रयत्नं करोति। प्रयत्नेऽस्मिन् कदापि स साफल्यं लभते, कदापि वैफल्यम्।

साफल्येनोत्साहो वर्धते वैफल्येन च नश्यन्ति। उत्साहसम्पन्नो मानवः तादृशमेव कार्यं करोति निरन्तरम्।

कोऽपि लुण्टाको यदा सफलतां लभते अर्थात् केनाप्यारक्षिणा स न गृहीतो भवति, अस्विन्नः स प्रचुरं धनमपि लभते तदा तेन प्रोत्साहितः स निरन्तरं तादृशं कार्यं कुर्वन् कुख्यातो महान् लुण्टाको भवति।

कथं भवेदेतत् ?

सम्यग् विचिन्त्य मनीषिणोऽस्य कारणमेवं वदन्ति यल्लाभस्य लोभस्य च घनिष्टः (प्रगाढः) सम्बन्धः। यत्र यत्र लाभस्तत्र तत्र लोभः प्रादुर्भवति। लाभस्य यावत्यो मात्रा भवन्ति तावत्यो मात्रा लोभस्यापि भवन्ति।

लोभोऽशान्तिजनकः। किम् किमस्ति अस्मत्समीपे इति लोभी द्रष्टुं न शक्नोति। अतो लोभः त्याज्योऽस्तीति मन्वते मानवाः। सन्तोष एव लोभनाशस्योपायः। कामं भवतु प्रयत्नपरिणामो लाभः, किन्तु लोभोऽनुपादेयः।

# १७४. अलीकोक्तिः

*लुद्धो लोलो भणेज्ज अलियं॥*

*—प्रश्नव्याकरणम् २/२*

यद् वस्तु यादृशमस्ति तस्य तादृशं वर्णनं यथार्थम्। तस्माद् विपरीतम् अयथार्थम्। अयथार्थमेव अलीकम् मिथ्या, मृषा, असत्यमिति नामान्तरैः विख्यातम्।

को वदति जगत्यलीकम्? दुःस्वार्थस्य लोभस्य तृष्णायाः पूर्त्यै मानवोऽलीकं भाषते। दुःस्वार्थस्य सम्पूर्णा सिद्धिः, लोभस्य पूर्त्तिः, तृष्णायाश्च तृप्तिर्न भवति कदापीति वास्तविकतास्ति, किन्त्वनया वास्तविकतया सर्वथाऽनभिज्ञो लोभी यावज्जीवमितस्ततो भ्रमति। तृष्णातृप्तेः प्रयासं कुर्वन्नपि स साफल्यं न लभते। तत्कृते कृतं मृषाभाषणं चापि वृथा गच्छति।

लुब्धादतिरिक्तं लोलः(चञ्चलः) पुरुषोऽप्यसत्यं वदति। चञ्चलमानवस्य विचारा अस्थिरा भवन्ति। भावनाया जले प्रवहन् स कदाप्येकं सङ्कल्पं करोति कदाप्यन्यम्; किन्तु चञ्चलत्वात्स कमपि सङ्कल्पं पूरयितुं समर्थो न भवति। अतस्तेन कृताः सर्वे सङ्कल्पा मिथ्या भवन्ति।

यो मानवः सत्यं विवदिषति, भगवतः सत्यस्योपासनां चिकीर्षति, जीवन व्यवहारे सत्यं अवतितारयिषति तेन लोभस्य त्यागः करणीयस्तथा चाञ्चल्यमपि वर्जनीयम्। अलीकभाषणं लोभचाञ्चल्ययोः प्रतीकम्।

# १७५. लोभस्त्याज्यः

*लोभमलोभेण दुगुंछमाणे*
*लद्धे कामे नाभिगाहइ ॥*

*—आचाराङ्गसूत्रम् १/२/२*

लोभ एकः कषायः। क्रोधादिकषायत्रयवदात्मानं कलुषितं करोति, आत्मसाधनायां बाधको भवति सः। यथा ह्यात्मशुद्धये अन्ये कषायाः त्याज्यो मन्यन्ते, तथैव लोभोऽपि त्याज्यः।

लोभः सर्वेषां पापानां जनकः। तस्य प्रेरणयैवान्यानि पापकार्याणि क्रियन्ते। शान्ते लोभेऽन्यपापानां प्रवृत्तिः स्वयमेव शान्ता भवति।

सम्प्रति विचारयाम एतद् यल्लोभः कथं शान्तः क्रियेत तस्मिन् विजयः कथं प्राप्येत।

विचिन्त्य सुविचारकाः कथयन्ति— अलोभेन(सन्तोषेण) लोभे विजयो लब्धव्यः। सन्तोषो लोभस्य विरोधी शत्रुर्वास्ति। सन्तोषस्योपस्थितौ लोभो शीघ्रं पलायते।

सन्तोषः परमं सुखमस्तीति प्रसिद्धम्। सन्तोषः शान्तिं जनयति तत्प्रत्यनीकं लोभो मनसि अशान्तिं जनयति।

तथापि जना लोभमुपादाय (लोभचक्रे पतित्वा) अशान्तिमङ्गीकुर्वन्ति। तेषां मनोऽशान्तं भवति। तेन ते दुःखमनुभवन्ति।

विपरीतमस्माल्लोभविजेतारः साधकाः प्राप्तानामपि कामानाम्-उपभोगं कर्त्तुं नोत्सहन्ते। का वार्त्ता खल्वप्राप्तानाम्? अतः शान्तिं कामयमानैर्लोभस्त्याज्यः।

# १७८. लोभः सर्वविनाशकः

*लोहो सव्वविणासणो ॥*

*—दशवैकालिकसूत्रम् ८/३८*

क्रोधः प्रीतिम् नाशयति, अभिमानो विनयं नाशयति, माया मित्राणि नाशयति। लोभश्चतुर्षु कषायेषु प्रबलतमत्वाद् एकाक्येव सर्वेषां सद्गुणानां नाशं कर्त्तुं समर्थः।

लुब्धः स्वार्थं विहाय किमप्यन्यद् द्रष्टुं न शक्नोति। आजीवनं स नवनवतिचक्रे पतित्वाऽऽयुर्नष्टं करोति।

किमस्ति तच्चक्रम्? वर्ण्यते। यस्य पार्श्वे नवतिपणका भवन्ति, स चिन्तयति यद् अतिरिक्तानां दशपणकानां संयोगे सति पूर्णं रूप्यकमेकं स्यात्। यस्य च निकटे नवनवतिरूप्यकाणि सन्ति स चिन्तयति यत् कुतोऽप्येकं रूप्यकमतिरिक्तं लभ्यते चेद् पूर्णं रूप्यकशतकं भवेत्। इत्थमेव शतपतिः सहस्रं, सहस्रपतिर्लक्षं, लक्षपतिश्च कोटिपतित्वं लब्धुं यतते। एतदेव उच्यते नवनवतिचक्रम्।

लोभाविष्टो मानवः समस्तपापानि कर्त्तुं तत्परो भवति। हिंसा मृषवादचौर्य-परिग्रह-व्यभिचार-क्रोध-द्वेषमायाऽभिमान-पैशुन्य-निन्दादीनि सर्वाणि पापानि लोभमूलानि सन्ति। अत एव ज्ञानिनः कथयन्ति — 'लोभः पापजनकः'।

पापप्रवृत्ता मानवाः सद्गुणान् प्रत्युपेक्षन्ते। ते न जानन्ति सद्गुणानां माहात्म्यम्। लोभस्तेषां विचारधारां परिवर्त्तयति। अत एव लोभः सर्वविनाशकः कथ्यते।

# १८८. प्रशस्या वाणी

*सच्चं च हियं च मियं च गाहणं च ॥*

*—प्रश्नव्याकरणम् २/२*

ये जना मूका न सन्ति ते व्यवहारार्थं, स्वमनोगतं ज्ञापयितुम्, परेषां मनोगतमवगन्तुम् प्रतिदिनम् न्यूनाधिकं वदन्त्येव ।

सज्जनानां वाण्यां ये चत्वारो गुणा भवन्ति तेषामुल्लेखाऽस्यां सूक्तौ कृतः।

तत्र सत्यताऽस्ति प्रथमो वाणीगुणः । यत्किञ्चिदपि वयं वदेम तद् यथार्थम् अकल्पितम् वास्तविकमस्तु ।

हितङ्करताऽस्ति द्वितीयो वाणीगुणः । यत्किञ्चिद्वयं वदेम तस्मिन् परोपकारस्य भावनाऽस्तु, न परापकारस्य ।

परिमितताऽस्ति तृतीयो वाणीगुणः । वयं अनावश्यकविस्तारं कृत्वा वक्तव्यम् दीर्घं न कुर्याम। न्यूनतमशब्देषु स्वविचाराभिव्यक्तिं कर्तुं प्रयतेमहि ।

ग्राह्यताऽस्ति चतुर्थोऽन्तिमश्च वाणीगुणः। अस्मदीया वाणी एवं-प्रकारकी सुगमशब्दसम्पन्ना स्याद् यां श्रोतारः श्रुत्वैव तत्कालम् अवगच्छेयुः । एनां ग्राह्यतामेव काव्यशास्त्रे 'प्रसादगुण' इत्युच्यते । प्रसाद-गुणमण्डितं काव्यं प्रशस्यं पठनीयमाकर्षकञ्च मन्यते ।

इत्थं ज्ञानिभिः सर्वेषां कृते सत्यं हितं मितं ग्राह्यं च वच आदर्शम् उपादेयञ्चास्तीति प्ररूपयद्भिरेवमुपदिष्टं यदेतादृशी प्रशस्या वाणी प्रयोक्तव्या।

# १७८. वाणीगुणाः

*मियं अदुट्ठं अणुवीइ भासए*
*सयाण मज्झे लहई पसंसणं ॥*

*—दशवैकालिकसूत्रम् ७/५५*

मुखमस्ति, वाक्शक्तिरप्यस्तीति वदन्ति सर्वे, किन्तु न जानन्ति किं कथं च वक्तव्यम् इति।

पृच्छामः। कथयन्तु सम्यग्विचार्य यत्ते जनाः कियन्तः सन्ति ये वक्तुं जानन्ति ? अङ्गुलीषु गणनीयास्ते भवेयुः कदाचित्।

किं भवन्तो वाणीगुणैरपरिचिताः सन्ति ? ओमिति ब्रुवन्ति चेद् एषा सूक्तिः भवतां कृते मार्गदर्शिनी। अस्यां सूक्तौ कथितमस्ति यद् वाण्यां त्रयो गुणा आवश्यकाः —

परिमितत्वम् प्रथमो गुणः। यत् किञ्चिद् वयं वदामः, तस्मिन् परिमिताः शब्दाः स्युः। संक्षिप्तं सारगर्भितं च वचः प्रशस्यम् मन्यते।

दोषरहितत्वं द्वितीयो गुणः। शब्दानामुच्चारणं शुद्धं भवेद् अर्थाद् ह्रस्वाक्षरस्योच्चारणं ह्रस्वं दीर्घाक्षरस्योच्चारणं दीर्घं स्यात्। व्याकरण-दृष्ट्यापि वाक्यरचना निर्दोषा भवेत्।

विचारकत्वमस्ति तृतीयो वाणीगुणः। आदौ सम्यग्विमृश्य तदनन्तरमेव किञ्चिद् वक्तव्यम्। योऽत्र विचार्य न वक्ति स पश्चात्तपति दुःखी च भवति।

यशः प्राप्तुकामैरस्माभि रुपादेया एते त्रयोऽपि वाणीगुणाः।

## १७९. भाषितव्यम्

*भासियव्वं हियं सच्चं ॥*

*—उत्तराध्ययनसूत्रम् १९/२७*

यत्किञ्चिदपि वयं वदामस्तेन स्वपरहितं भवितव्यम्, अन्यथा-स्माभिः प्रयुक्ता वाणी विफला सञ्जाताऽस्तीत्यवगन्तव्यम् ।

कक्षायां प्रविश्योपविष्टेषु छात्रेषु यैः पूर्वाध्यापितपाठस्याध्ययनं न कृतं तेषां शरीरे दण्डप्रहारः क्रियते चेत् ते धृष्टा भूत्वा चिन्तयिष्यन्ति— ''अद्यापि अध्ययनं नाभवत् तथापि माऽस्तु कापि चिन्ता । गुरुवर्या द्वित्रान् दण्डप्रहारान् कुर्वन्तु कामं, सहेमहि तान् धैर्येण ।'' इत्थं तेषु या धृष्टतोद्भवति सा ह्यध्ययनवृत्तिं प्रोत्साहयितुं असमर्था सञ्जायते । अस्य स्थाने प्रेम्णा यदि तेऽवगच्छेयुर्यदधीतपाठस्य तस्मिन्नेव दिवसे स्मरणं मननं न कृतञ्चेत्काः का हानयो भवेयुः तर्हि ते नियमिताध्ययनाय प्रेरिताः स्युः ।

इत्थमेव कृतस्यापराधस्य निन्दां निशम्यापराधिनो भवन्ति क्रुद्धाः। ततः शुद्धा भवितुं नार्हन्ति । तस्य स्थाने यदि कथाया माध्यमेनैतच्छिक्ष्यते यत्केन ह्यमुकापराधं कृत्वा का हानिर्लब्धा तर्ह्यपराधिनः सुधारस्याशां कर्त्तुं शक्यते।

वाणी यथार्थापि स्यादन्यथैकवारमविश्वासो जातश्चेद्वाण्याः प्रभावो नश्येत् । अतो हितं सत्यं च भाषितव्यम् ।

# १८०. अवक्तव्या वाक्

*न य वुग्गहियं कहं कहिज्जा ॥*

*—दशवैकालिकसूत्रम् १०/१०*

नाना जनानामेष स्वभावो भवति यत्तेऽपूर्णं वार्त्तालापं श्रुत्वा श्रावयित्वा च मिथ: कलहमुत्पाद्य स्वयं दूरतो रौद्रसुखमनुभवन्ति। यदा कदा श्रुते वार्त्तालापे स्वकल्पनाया मिश्रणं कृत्वा तिलस्य तालं कुर्वन्ति, सर्षपकणं सुमेरौ परिणमयन्ति।

उभयो: पक्षयोर्मध्ये पृथग् पृथक् उत्तेजकं वच: श्रावयित्वा कलहं कारयन्ति। दूरस्था: तयो: कलहं क्रीडावत् पश्यन्ति। तैरुत्तेजिता जना यदा मिथ: कलहं कुर्वन्ति, निन्दन्ति, क्रन्दन्ति तदा ते प्रसीदन्ति।

अतीव गर्हणीय: स्वभाव एष यदि वयमन्यान् योधयामस्तर्हि तेऽप्यस्मान् योधयितुमर्हन्ति। क्लेशमुत्पाद्य यथा वयमन्यत्र पारिवारिकां शान्तिं नाशयामस्तथैव तेऽप्यस्मदीयां पारिवारिकां शान्तिं नाशयितुं शक्नुवन्ति।

परिणामतो विश्वस्मिन् विश्वेऽशान्तिर्विस्तृता भवेत्, सम्पूर्ण: संसार: कलहाग्नौ प्रविश्य दग्धुम् अर्हेत्।

एतदेव विचिन्त्य वीतरागा महाभागा: सर्वज्ञा: सर्वदर्शिनो हितैषिणो मनीषिण: कुस्वभावमेनं परित्यक्तुं उपदिशन्त: कथयन्ति यद् विग्रहकारिणी: (कलहोत्पादिनी:) कथा: (वार्त्ता:) न कथयेयु:।

# १८१. विचार्य वदेयुः

*अणुवीइभासी से निग्गंथे ॥*

*— आचाराङ्गसूत्रम् २/३/१५/२*

भाषणेन सम्भाषणेन वा ज्ञायते यत् कोऽस्ति मूर्खः को विद्वान् ? किम् अन्तरमस्त्युभयोरनयोर्मूर्खविदुषोः ? उच्यते, मूर्ख आदौ वदति ततश्च विचारयति; किन्तु विद्वान् आदौ विचारयति ततो वदति।

योऽस्ति निर्ग्रन्थः,रागद्वेषरूपाभ्यां ग्रन्थिभ्यां रहितो मुनिः स मुखोद्घाटनात्पूर्वं कञ्चित्कालपर्यन्तं मौनं विधाय चिन्तयति, यत्किञ्चिदपि वदिष्यामि, तस्य श्रोतुहृदये कः प्रभावो भविष्यति। स्वमुखान्निर्गतवाण्याः निश्चितं भविता सुप्रभाव इति विश्वासे जाते स वदति, अन्यथा तूष्णीं तिष्ठति।

यो ग्रन्थान् अधीत्य तेषु तेषु ग्रन्थेषु यद्यल्लिखितं मुद्रितं वाऽस्ति तत्तदेव भाषते, न तु न्यूनाधिकं स ग्रन्थदासः। निर्ग्रन्थो न भवति ग्रन्थदासः। यतः स ग्रन्थवाक्येष्वपि चिन्तनं कृत्वा भाषते।

एषा सूक्तिर्महत्त्वपूर्णमितत्तथ्यं प्रकटीकरोति यद् गृहद्वारं विहाय परिवारं परित्यज्य परिव्रज्याया(दीक्षायाः) अङ्गीकरणात्, साधुवेषस्य धारणादेव कोऽपि मानवो ''निर्ग्रन्थो'' भवितुं नार्हति यदि यथेच्छं (स्वच्छन्दं) भाषते। केवलं ते एव भवन्ति निर्ग्रन्था ये सम्यग् विचार्य वदेयुः।

# १८२. रुचिभिन्नता

*पुढो छंदा इह माणवा ॥*

*—आचारांगसूत्रम् १/५/२*

जगत्यस्मिन् मनुष्याणां स्वभावेषु रुचिषु विचारेषु च परस्परं भिन्नतां पश्यामः। न केवलमेतदेव, अपित्वेकस्य मानवस्य विचारेष्वपि परस्परं पार्थक्यं भवति समये समये।

किमस्ति कारणमस्य ? ब्रूमः। स्वभावा विचारा रुचयश्च परिस्थितौ निर्भरा भवन्ति। परिस्थितेरनुसारं मनोवृत्तिषु परिवर्त्तनं भवति। परिस्थितीनामेकः क्रीडनकोऽस्ति प्रत्येकोऽपि मानवः। युद्धस्यावसरे वीररसपरिपूर्णम् काव्यम् यथा रोचते न तथा तद्विवाहावसरे। एवमेव विवाहावसरे शृङ्गाररसपूर्णानि यानि गीतानि गीयन्ते न तानि मरणावसरे गातुं शक्यन्ते।

सांसारिकेऽस्मिन् व्यवहारे यथा जना अतीव सावधाना भवन्ति, तथैव उपदेशकर्त्तारोऽपि भवेयुः। कस्मिन् प्रसङ्गे श्रोतारः किं चिन्तयन्ति? इति ज्ञानमुपदेशकेभ्योऽतीवावश्यकम्। इत्थं मनोवैज्ञानिकत्वमुपदेशकेषु भवेद् इत्यपेक्षितम्। को न जानाति यद् विवाहस्यापेक्षा मृत्योरवसरे प्रदत्तो वैराग्यभावोपदेशोऽधिकप्रभावोत्पादको भवति ? श्मशाने धर्मोपदेशः सफलो भवतितराम्।

वस्तुत उपदेशकैः परामर्शदातृभिरेवं मन्तव्यमवगन्तव्यम् यद् मनुष्ये मनुष्ये भवति रुचिभिन्नता।

# १८३. विद्याचरणे

*आहंसु विज्जाचरणं पमोक्खं ॥*

*— सूत्रकृताङ्गसूत्रम् १/१२/११*

गत्यर्थं यथा लोचने चरणे च उभयेऽप्यपेक्षिते तथैव मोक्षार्थं ज्ञानं क्रिया चोभयेमप्यपेक्षिते।

क्रियां विना ज्ञानं पङ्गुवत् ज्ञानं विना च क्रिया अन्धवद् अकिञ्चित्करं भवति। पङ्गु: द्रष्टुं शक्नोति, परन्तु चलनेऽसमर्थो भवति। विपरीतमस्माद् अन्धो द्रष्टुं न शक्नोति, परन्तु चलने समर्थो भवति। चलनसमर्थ: स कुदिशायां कुस्थाने गन्तुमर्हति।

अतो ज्ञानिन: कृते सदाचारस्य तावत्यावश्यकताऽस्ति यावती सदाचारिण: कृते ज्ञानस्य।

ज्ञानस्य फलमस्ति सदाचार:। यदा सन्मार्गस्य समुचितं ज्ञानं भवति, तदा तस्मिन् सुदृढो विश्वास उत्पन्नो भवति। उत्पन्ने विश्वासे तदनुसारम् शनै: शनै: आचरणमपि भवत्येव।

यदि ज्ञानस्यानन्तरमाचरणं न स्यात्तर्हि ज्ञानमज्ञानमिव व्यर्थमेव स्यात्। भगवता महावीरेण चरित्रहीन:(सदाचारविरहित:) ज्ञानी गर्दभेणोपमित:—''जहा खरो चंदणभारवाही'' यथा गर्दभ: स्वपृष्ठभागे स्थापितचन्दनकाष्ठपुञ्जस्य भारं वहति, तथैव आचरणहीनो ज्ञानी ज्ञानस्य भारं वहति।

मुमुक्षूणां कृते ज्ञानिभि: समुचितमेवोपदिष्टं यद् विद्या च आचरणं च द्वयमपि मोक्षसाधनम्।

# १८४. विनयः

*जो एगं णामे से बहुं णामे ॥*

*—आचाराङ्गसूत्रम् १/३/४*

अन्ये जना अस्माकं विनयं कुर्वन्तु इति— यदि वयं कामयामहे तर्हि अस्माभिरप्यन्येषां जनानां विनयः कर्त्तव्यः। अहङ्कारे विकर्षणं भवति विनये चाकर्षणम्। अतः शत्रुवर्धकमहङ्कारं परित्यज्य स्वीकर्त्तव्यः। अहङ्कारी कुतोऽपि सन्मानं प्राप्तुं न शक्नोति। विनीतस्तु सर्वत्र सन्मानं सुयशः प्राप्नोत्येव।

विनयोऽभिमानस्य विरोधी गुणः। षट्त्रिंशदङ्कवत् अनयोर्विरोधः प्रत्यक्षं दृश्यते। यत्र यत्र विनयस्तत्र तत्राभिमानस्याभावः। यत्र यत्राभिमानस्तत्र तत्र विनयस्याभावः। अभिमानस्त्याज्यः। उपादेयो विनय, विनयात्पात्रतोत्पन्ना भवति। विनीतः सर्वेषां सद्गुणानां सर्वत्र सुयशसश्च पात्रं भवति।

यः स्वयं नमति, स एवैकस्मिन् दिवसे स्वकीयसद्गुणगणेन सदाचरणेन च तन्महत्पदं प्राप्नोति यत् सर्वे जनास्तस्य समक्षं नतमस्तका भवन्ति, विनीता भवन्ति, नमन्ति।

अतएव वीतरागद्वेषा अर्हन्तः सर्वज्ञाः सर्वदर्शिनो ज्ञानमर्जितु-कामेभ्य एवमुपदिशन्ति यत् समेषामपि सद्गुणानां पूर्वं विनय उपादेयः। विनीतेभ्यः शिष्येभ्योऽन्येषां सद्गुणानां साधना सुकरा भवति।

## १८५. विनयनाशकः

*माणो विणयणासणो ॥*

*—दशवैकालिकसूत्रम् ८/३८*

मानपदस्यार्थोऽत्राभिमानोऽस्ति, न तु सन्मानम्। यथा प्रीतिक्रोधौ युगपदेशकत्र न वसतः तथैव विनयाभिमानौ युगपदेकत्र न वसतः ।

यदा मानवोऽहङ्कारी भवति तदा तस्य नम्रतादिकाः सर्वे सद्गुणा नश्यन्ति । स्वकं जगति स महत्तमं पुरुषं मनुते । स्वप्रशंसामेव सर्वैः स शुश्रूषते, स्वकीयां निन्दामालोचनां वा कुर्वाणं पुरुषं स शत्रुं मनुते; तं द्विषति, तस्य वधं कर्त्तुं यतते ।

अहङ्कारी मानवः सदा चाटुकारैः परिवृतो भवति । स्वार्थैक-सिद्धिनिरताः चाटुकाराः तस्य मिथ्या प्रशंसाम् कुर्वाणास्तस्मिन्नहङ्कार-मात्रां वर्धयन्ति । अहङ्कारपोषणाद्विकृतमस्तिष्कः स केवलं स्वकं पश्यति, नान्यम् ।

अभिमानी कदापि स्वीयामुन्नतिं कर्त्तुं न शक्नोति यतः पूर्णम्मन्यः स आत्मोन्नत्यै कथं प्रयतेत ? स आत्मविकासार्थं प्रयत्नशीलः कथं भवितुमर्हेत् ?

विकासस्तु विनयेनैव सम्भवेत् । योऽस्ति विनीतो सोऽहङ्कारी परभिमानी वा कदापि न भवेत् । विनीतं शिष्यं पुरतः स्थितमवलोक्य गुरुचरणास्तस्मै श्रुतज्ञानं दातुं सन्नद्धा भवन्ति । अविनीतं ते न शिक्षयन्ति। ते सम्यग् विदन्ति यदभिमानो विनयं नाशयति ।

# १८६. विनीती भूयात्

*विणये ठविज्ज अप्पाणं*
*इच्छं तो हियमप्पणो ॥*

*—उत्तराध्ययनसूत्रम् १/६*

कस्मिंश्चिच्छकटे रथे वाऽऽसीनः पुरुषः स्वकीयं शरीरं स्थिरं कर्तुं कामं करोतु कियन्तमपि प्रबलं प्रयासं सः विफल एव भवेत् । विपरीतमस्मात् भूमौ शिलायां वोपविष्टः पुरुषः स्वशरीरं स्थिरम् एवावलोकयति। अनेन ज्ञातुं शक्यते यद्वस्तुनः स्थिरत्वमस्थिरत्वं वाऽऽधार आश्रितम भवति ।

आत्मनो विषयेऽप्येतदवगन्तुं शक्यते। आत्मनोऽपि स्थिरताऽ-स्थिरता वा तस्याधारमवलम्बते। अस्थिरैव भवेदस्थिराधारस्थिता व्यक्तिः। एवमेव स्थिराधारस्थिता व्यक्तिः स्थिरैव भवेत् ।

यदि वयं चञ्चलेषु क्षणिकसुखदेषु विषयेषु कषायेषु दुर्व्यसनेषु दुर्मनोवृत्तिषु वात्मानं प्रतिष्ठितं कुर्मस्तर्हि निश्चितं सोऽस्थिरो भविष्यति।

विपरीतमस्माद् यदि वयमात्मानं शास्त्रेषु धर्मकथासु सद्गुणेषु सदुपदेशेषु सिद्धेष्वर्हत्सु वा प्रतिष्ठितं कुर्मस्तर्हि स स्थिरतां लप्स्यते ।

यथाभिमानः सर्वासां दुर्वृत्तीनां मूलमस्ति तथा विनयः सर्वासां सद्वृत्तीनां सद्गुणानां च मूलमस्ति । अत आत्महितैषिभिरात्मा विनये स्थापयितव्यः ।

# १८७. विषयविरक्तिः

*वंतमिच्छसि आवेउं*
*सेयं ते मरणं भवे ॥*

*—दशवैकालिकसूत्रम् २/७*

स्वकीयनिष्ठीवस्य लेहनं कस्मै रोचेत ? मुखान्निस्सृतं वमथुं कः पिपासेत्? न कोऽपि ।

निष्ठीवनं वान्तं वा वस्तु सर्वेषां घृणास्पदं भवति। तत्पुनः पीत्वा लीढ्वा वोदरसात्करणस्यापेक्षा मरणमेव वरं मन्यते जनैः ।

इत्थमेव प्रव्रज्यामङ्गीकृत्य यैर्विषयभोगानां परित्यागः कृतः ते यदि पूर्वमुक्तविषयभोगान् स्मारं स्मारं पुनस्तान् प्रत्याकृष्टा भवन्ति, तान् पुनः प्राप्तुमिच्छन्ति, तर्हि तेषामेषेच्छा निष्ठीवलिलिक्षावत् वान्तद्रवपिपासावद्वा घृण्या त्याज्या च। तादृश्या इच्छाया अपेक्षा मुमूर्षा मन्यते वरतरा ।

विषयो विषसन्निभाः —इति यदुच्यते तन्मिथ्या । यतो विषं तु यदोपभुज्यते तदोपभोक्तारं हन्ति; किन्तु विषयास्तु स्मरणेनैव केवलेन घ्नन्ति । इति विचारयतां मनसि विष-विषययोर्महदन्तरं प्रकटीभवति।

पूर्वभुक्तविषयभोगानां तुलना वान्तद्रवेण कृत्वा शास्त्रकारैः साधकानां मनसि घृणां अनासक्तिं उत्पाद्य पुनस्तान् विरक्तिभावे स्थिरान् कर्त्तुं प्रभावकः प्रशस्तः प्रयासः कृतः ।

# १८८. स्त्रीत्यागः

*तम्हा उ वज्जए इत्थी*
*विसलित्तं व कंटगं नच्चा ॥*

*—सूत्रकृताङ्गसूत्रम् १/४/१/११*

इत्थं प्रतीयते यत्प्रकृत्या स्त्रीः प्रति पक्षपातोऽधिकः कृतः। पुरुषाणां तुलनायां तासां स्वरो मधुरतरो भवति। कोकिलानां पञ्चमः स्वरः (काकलीत्याख्यातः) तासां कण्ठेषु स्थापितः। स्वकीयमधुरस्वरेण ते पुरुषाणां मनो वशीकुर्वन्ति।

शृङ्गारः, सौन्दर्यम्, श्मश्रुकूर्चयोरभावः, विविधाः चेष्टाः, हावभावाः इत्यादयो नाना गुणाः सन्ति तासु ये पुरुषाणां मन आकर्ष्टुमतीव सक्षमाः।

पाश्चात्येन केनचिद् विपश्चिता लिखितं यत् प्रकृत्या नारीभ्यः सा सुन्दरता प्रदत्ता ययाऽऽकृष्टाः पुरुषास्ता न त्यजेयुः तथा बुद्धेः काचिन्न्यूनता अपि प्रदत्ता यया ताः पुरुषान् न त्यजेयुः अस्तु।

पुरुषसाधकानां समक्षमात्मसाधनायां नारीणामेतत्सौन्दर्यम् बाधकतमम्। ये साधकाः तत्रासक्ता भवन्ति ते साधनां कर्तुं न प्रभवन्ति, कर्त्तव्यं विस्मरन्ति, पथभ्रष्टा भवन्ति, समाजस्तेषामादरं न करोति, तैरर्जितं सुयशोऽपि सर्वथा लुप्यति, तेषां जीवनं व्यर्थमेव नश्यति।

कामिनीष्वाकृष्टं मनो रोद्धुम् ज्ञानिभिरुपदिष्टम् यद् ब्रह्मचारिभिः विषलिप्तकण्टकवत् कर्त्तव्यः स्त्रीणां त्यागः।

## १८९. विरक्तः साधकः

*विरत्ता हु न लग्गन्ति*
*जहा से सुक्कगोलए॥*

*—उत्तराध्ययनसूत्रम् २५/४३*

मृत्तिकायाः क्लिन्नं किञ्चिद् गोलकं कस्याञ्चिद् भित्तौ क्षिप्येत चेत् तत्तत्र श्लिष्येत् यतो जलसम्पर्केण मृत्तिकायां श्लेषगुण उत्पन्नो भवति।

जीवोऽपि संसारे निवसंस्तत्र श्लिष्यति, यतो मोहवशात्तस्मिन् जीवे श्लेषगुणयुता मनोवृत्तिरुत्पन्ना भवति।

कदाचिच्छनैः शनैर्यदि मृत्तिकायां स्थितं जलं शुष्कं भवेत्तर्हि मृन्निर्मितस्य तद्गोलकस्य किं स्यात्? किं स गोलकः कस्यामपि भित्तौ क्षिप्तस्तत्र श्लिष्येत्? नो, नो, नैव।

तथैव जीवस्यापि यदा मोहो नष्टो भवेत्, अन्तस्तलस्थो रागः नश्येत्, आसक्तिर्लुप्येत् तदा जीवः किञ्चिदपि सांसारिकं वस्तुजातं प्रति आसक्तो न भवेत् श्लिष्टो न स्यात्।

संसारी जीवः संसारे निवासाय विवशो भवति, यतो यावदात्मनि कर्मणां भारोऽस्ति, तावत्स भवभ्रमणात् (जन्म-जरा-मरणरूपचक्रात्) स्वात्मानं रक्षितुं नार्हति। तथापि यावत्स, संसारे निवसति तावत् तेन मोहत्यागस्य, आसक्तिहीनताया अभ्यासोऽवश्यं करणीयः।

अम्भस्यम्भोजवन्निर्लिप्तो विरक्तः साधक एव स्वलक्ष्यं भेत्तुं स्वगन्तव्यं प्राप्तुं समर्थो भवति।

# १९०. विज्ञानयुतो धर्मः

*विन्नाणेण समागम्म*

*धम्मसाहणमिच्छिउं ॥*

*— उत्तराध्ययनसूत्रम् २३/३१*

धर्मस्य साधनानां विज्ञानेन तथा विज्ञानस्य साधनानां धर्मेण समन्वयः कर्त्तव्यः । उभयोर्मिथः सम्बन्धो योजनीयः । उभौ परस्परं पूरकौ(सहयोगिनौ) स्याताम्, न विरोधकौ । अस्य कार्यस्य दायित्वं यावद् वैज्ञानिकेष्वस्ति तावदेव धार्मिकिष्वपि ।

वैज्ञानिकास्तान्येव वस्तून्याविष्कुर्युः, यैर्मानवसमाजस्य सामूहिकरूपेण सुखवृद्धिर्भवेत् । घातकानां शास्त्रास्त्राणां निर्माणं अकृत्वा सुखदातृणां यन्त्राणामाविष्कारं कुर्युः । स्वकार्यं ते विश्वप्रेमभावनां मनसि कृत्वा कुर्युः ।

धार्मिकाणामपि कर्त्तव्यमस्ति यत् ते विज्ञानस्य सहयोगमाददीरन् । तत् मित्रमवगच्छेयुर्न शत्रुम् ।

नद्या जलवृद्ध्या कश्चिद् ग्रामः प्रावहच्चेत्, क्वापि ज्वालामुखः पर्वतोऽस्फुटच्चेत्, कस्मिंश्चित् क्षेत्रे अवृष्टिरतिवृष्टिर्वाभवच्चेत्, तर्हि तैरुपद्रवैः पीडितानां वृत्तानि वृत्तपत्रैः, आकाशवाण्या, दूरदर्शनेन च सम्पूर्णदिशे प्रसार्य, सहायता साधनानि एकत्रीकर्त्तुं शक्यन्ते । तदनन्तरं हेलीकाफ्टरैः वायुयानैर्वा तानि साधनानि तत्र तत्र प्रेष्यन्ते ।

इत्थं विज्ञानस्यावलम्बनेन परोपकारधर्मस्य पालनमाधिक्येन कर्त्तुं शक्नुमः ।

# १९१. वीर्याभिव्यक्तिः

*नो निन्हवेज्ज वीरियं ॥*

*— आचाराङ्गसूत्रम् १/५/३*

ये जनाः शक्तिशालिनः सन्ति, तैः पीडितजनानां रक्षार्थं स्वशक्ति-प्रयोगः करणीयः ।

ये जना बुद्धिमन्तः सन्ति, तैर्लोकानां कलहस्य शान्तये स्वबुद्धि-प्रयोगः करणीयः।

ये जनाः सन्ति कलाकाराः, तैरेन्येषां जनानामानन्दवर्धनाय निजकलाकृतीनामुपयोगः करणीयः ।

ये जनाः सन्ति धनवन्तस्तैर्निर्धनानां सहायतार्थं स्वकीय-धनस्योपयोगः करणीयः ।

ये श्रामिकाः सन्ति, तैराजीविकादातुर्यन्त्रालयस्य प्रतिष्ठारक्षार्थं प्रामाणिकतया स्वश्रमस्योपयोगः करणीयः ।

ये विधिपण्डिता वाक्कीला वा सन्ति तैः मिथ्यारोपपीडितजनानां रक्षार्थं स्वविधिज्ञानस्योपयोगः करणीयः ।

ये वीरा उत्साहिनः स्मितमुखो वा सन्ति तैरन्यजनान् साहसिनो विधातुं प्रयासः करणीयः ।

अयमाशयो यत्सर्वेजनाः परोपकारार्थमेव स्वशक्तेः, बुद्धेः, विद्यायाः, कलायाः, धनस्य, श्रमस्य, विधिज्ञानस्य, वीरताया वोपयोगं कुर्युः ।

## १९२. वृद्धावस्था

*से ण हासाए, ण किड्डाए*
*ण रतीए, ण विभूसाए॥*

*—आचारांगसूत्रम् १/२/१*

जन्मग्रहणानन्तरं प्रत्येकं मानवः शिशुः, बालकः, किशोरः, पोगण्डः, तरुणश्च भूत्वा क्रमशो वृद्धावस्थामाप्नोति। यदि कोऽपि पोगण्डो विचारयति यदहं तरुणो न भविष्यामि तर्हि नास्तीयं तस्य वशवर्त्तिनी वार्त्ता। यतः शैशवावस्थायाः प्राप्तेः पश्चात् क्रमशो बाल्यम्, कैशोरम्, पौगण्डम्, तारुण्यम् चानिवार्यमस्ति।

तथैव तारुण्यस्यानुपदमागच्छद् वार्धक्यमप्यनिवार्यमेवास्ति। किंतत् करोति ? श्रूयताम्।

वार्धक्यमागत्य मानवस्य शरीरस्य सुन्दरतां नाशयति, पञ्चापीन्द्रियाणि श्लथयति, शारीरिकं बलं क्षिणोति।

वृद्धावस्थायां मानवः क्रीडाकौतुकेषु सक्रियो न भवति। तदीया रतिशक्तिः क्षयति (सम्भोगस्य मैथुनस्य वा योग्यता नश्यति)। बहुमूल्या अलङ्काराः (स्वर्णभूषणादीनि) तस्मै न रोचन्ते।

तस्य श्लथं शरीरं वीक्ष्य रोगा अपि शीघ्रमाक्रामन्ति। निरन्तरं तस्य सेवाभिः क्लान्ताः कौटुम्बिका अपि कांक्षन्ति यत् तूर्णमेव भवेत् ''रामनाम सत्यम्'', येन विश्रान्तिम् लब्धुमर्हामो वयम्। एतादृशी भवत्य अवाञ्छनीया वृद्धावस्था।

# १९३. वेदाध्ययनम्

*वेया अहीया न भवन्ति ताणं ॥*

*—उत्तराध्ययनसूत्रम् १४/१२*

अमुकः वेदपाठी पुरुषो वेदानां पारायणम् अध्ययनं वा करोति; अतः स आदरणीयः, पवित्रः पूज्यश्चास्तीति मान्यता भ्रान्तिपूर्णा अस्ति। कथम् ? श्रूयताम्।

आदरणीयतायाः पवित्रतायाः पूज्यतायाश्चे सम्बन्धः सच्चरित्रेण, त्यागेन, परोपकारेण चास्ति न तु वेदाध्ययनेन।

वेदाध्ययनं तु लङ्काधिपतिना रावणेनापि कृतमासीत्, न केवलमेतद् अपितु स सुविस्तृतं वेदभाष्यमपि विरचितवान् किन्तु स्वदुराचरणपरायणतायाः कारणेन स सम्मानमाप्तुं नानर्ह। कोऽपि मानवः स्वपुत्रस्य नाम "रावणः" इति स्थापयितुं न कांक्षति।

रामलालः, रामचन्द्रः, रामसिंहः, रामनारायणः, सीतारामः, रामेश्वरः, रामप्रतापः, रामप्रसादः, रामदासः, रामभक्तः, रामदयालुः, रामेन्द्रः, रामानन्दः इति नामधारकाः पुरुषास्तु स्थाने स्थाने दृश्यन्ते एव; किन्तु रावणलालः, रावणचन्द्रः, रावणसिंहः, रावणदासः, रावणप्रतापः इत्यादीनां नाम्नां धारकः कोऽपि न मिलति क्वापि।

किं सिद्धं भवत्यनेन ? इदमेव यत्कृतं वेदाध्ययनं शास्त्राध्ययनं वा स्वकीययशोरक्षणाय नालम्। यावज्जीवनं पवित्रं सदाचारसम्पन्नं च न स्यात्तावद् व्यर्थं वेदाध्ययनम्।

## १९४. वैरत्यागः

*वेराइं कुव्वई वेरी*
*तओ वेरेहिं रज्जती ॥*

—*सूत्रकृतांगसूत्रम्* १/८/७

रक्तस्य कलङ्कः रक्तेन न क्षाल्यते, स तु क्षाल्यते जलेनैव। तथैव वैरं वैरेण न नश्यति, तत्तु नश्यति शान्त्या, क्षान्त्या, प्रेम्णा, सहिष्णुतया च।

किन्तु सन्ति कतिपये जना ये वैरं वैरेण नाशयितुमिच्छन्ति। एतादृशा जना वह्निं निर्वापयितुकामाः सन्ति पेट्रोलेन, न जलेन! कियती मूर्खताऽस्ति एषा ?

अस्या अपि भयङ्करतराऽस्ति वार्त्तेयं यत् कतिचिज्जनाः स्वभावाद् एव वैरिणो भवन्ति। तावत्तेषां भोजनं न जीर्यति यावत् प्रतिवेशेऽन्यत्र वा गत्वा कलहं न कुर्वन्ति। एवं तेऽवगच्छन्ति भ्रमवशा यद् कलहे विजयेनैव तेषां प्रतिष्ठा वर्धते, सम्मानं लभ्यते; किन्तु वास्तविकताऽस्ति एषा यत्कलहकारिभ्यो योद्धुकामेभ्यो मानवेभ्यो लोको दूरमेव स्थातुमिच्छन्ति। स्वार्थसाधनार्थं धूर्त्ताः चाटुकारा वा जनाः कामं कुर्वन्तु तेषां वीरतायाः प्रशंसाम्; परन्तु तान् प्रति ते हार्दिकं प्रेम कर्त्तुं न प्रभवन्ति।

वैरेण वैरं वर्धते। प्रेम्णा प्रेम भवति प्रगाढम्। प्रेमणः प्रेमिभिः प्रकृष्टं प्रेम प्राप्तुमर्हन्ति। वैरे रसानुभूतिं कर्त्तारो वैरिणः प्रेमप्राप्तिं कर्त्तुं कदापि समर्था न भवन्ति।

# १९५. मा कुरु वैरम्

*न विरुज्झेज्ज केणवि ॥*

*—सूत्रकृतांगसूत्रम् १/११/१२*

पूर्वजन्मनि समुपार्जितानि शुभाशुभकर्माण्यनुसृत्यैवास्मिन् जन्मनि अनुकूलाः प्रतिकूला वा परिस्थितयः प्राप्यन्ते । भ्रमवशीभूता मानवा एवमवगच्छन्ति यदमुकोऽस्मदीयः विरोधी वैरीवास्ति, तथास्माकं सर्वाणि **कष्टानि तेनैवोत्पादितानि सन्ति,** अर्थाद् अस्माकं प्रतिकूलायाः परिस्थितेर्निर्मातापि स एव ।

परन्तु एषो सिद्धान्तः यथार्थभिन्नः । यतोऽस्माकं सुख-दुःखानां कारणं वयं स्वयमेव स्मः, नान्यः । अस्माकं विपरीतपरिस्थितीनां कारणं पूर्वभवे समुपार्जितानि दुष्कर्माण्येव । कदापि शुभकर्मणां प्राबल्यं स्याच्चेद् अनुकूलपरिस्थितीनां निर्माणं भवेत् । कदाप्यशुभकर्मणां प्राबल्यं स्याच्चेद् अस्माकं परितः प्रतिकूलाः परिस्थितयः प्रादुर्भवेयुः ।

इत्थमस्मत्प्रतिकूलतायाः कष्टपूर्णदशाया दायित्वमस्मास्वेवास्ति नान्येषु मानवेषु । अस्यां स्थितौ कमपि वैरिणं दुष्टं विरोधिनं वावगम्य तेन सह कलहं कथमुचितं स्यात् ?

सदाचारस्य सन्तोषस्य च ये साधनां कुर्वन्ति तेभ्यो मार्गदर्शनं कुर्वन्तो मनीषिणः कथयन्ति— मैत्रीं कुरु सर्वैः सह; मा कुरु वैरम् कदापि।

# १९७. शस्त्रमशस्त्रम्

*अत्थि सत्थं परेण परं*
*नत्थि असत्थं परेण परं॥*

*—आचाराङ्गसूत्रम् १/३/४*

जगत्यस्मिन् हिंसाया नाना साधनानि सन्ति। घातकताया अपेक्षा तेष्वपि तारतम्यं भवति।

खड्गः, कुन्तः, बाणः, भुशुण्डी, शतघ्नी, आग्नेयास्त्रम्, परमाण्वस्त्रम् इत्यादीनि क्रमशः संहारकतराणि शास्त्रास्त्राणि सन्तीतिति जानन्ति सर्वे मानवाः।

यदि राष्ट्रनेतॄणां चक्षुष्षु लग्ना स्वार्थातृन्धताख्या पट्टिका न विलीना तर्हि भविष्यति काले(आगामिनि समये) भयङ्करतराणां शस्त्रास्त्राणां निर्मितिः सम्भावना स्यादिति वक्तुं शक्यते।

चतुर्दशोत्तरैकोनविंशतिशततमे(१९१४) ईशवीयाब्दे तथोनचत्वारिंशदुत्तरैकोनविंशतिशततमे(१९३९) ईशवीयाब्दे सञ्जातस्य विश्वयुद्धद्वयस्य भयङ्करो दुष्परिणामो जगता विलोकितः। तथापि तृतीयविश्वयुद्धाय सन्नद्धा भवन्ति राष्ट्राः। इयमस्ति कियती मूढता?

विपरीतमस्मादशस्त्रस्य अहिंसाया वा साधनमेकमेवास्ति दया। अस्मिन् क्षेत्रे साधनेषु तारतम्यं न दृश्यते। शस्त्रप्रयोगेऽशान्तिः कलहः क्रूरता चेति गुणा अवलोक्यन्ते; किन्त्वशस्त्रप्रयोगे शान्तिः, सहयोगो दयालुता चेति दृश्यन्ते। अनयोः कतर उपादेयः?

# १९८. शुद्धात्मा

*भावणाजोगसुद्धप्पा*
*जले णावाव आहिया ॥*
— *सूत्रकृताङ्गसूत्रम् १/१५/५*

लुण्टाकोऽपि छुरिकाया: प्रयोगं करोति, चिकित्सकोऽपि; किन्तु प्रथम: कस्यचिद् वधं विधाय धनस्यापहरणं चिकीर्षति, द्वितीयश्च शल्यक्रियां कृत्वा रुग्णाङ्गस्य कर्त्तनं चिकीर्षति ? येन रुग्णो स्वस्थ: स्यात् । अनयोरेक: पापी पुण्यात्मा अपर:; प्रथम: तक्षक: द्वितीयश्च रक्षक: ।

मार्जारी येन मुखेन मूषिकं गृह्णाति तेनैव मुखेन स्वशिशुमपि; किन्तु एकं सा बुभुक्षति, द्वितीयं च सा सुरक्षार्थं एकस्मात् स्थानादन्यत्स्थानं निनीषति। समानेऽपि क्रियाद्वये भावयो: कियद् अन्तरमस्ति ?

यं पुत्रं पिता प्रहरति तमेव तस्य मित्राण्यपि प्रहरन्ति, किन्तु पिता पुत्रस्य सुधारमिच्छति, मित्राणि तं रोदयित्वा हसितुमिच्छन्ति । यदि तस्य शरीरे अन्ये बालका: प्रहरन्ति तर्हि ते वैरनिर्यातनार्थं तथा कुर्वन्ति। अत्र समेष्वपि प्रहारेषु भावभिन्नतावशात् परिणामेषु भिन्नता भवति ।

सुज्ञा: कथयन्ति यद् भावानामेवाधिकं महत्त्वं भवति । अतो भावनायोगेन येषामन्त:करणं शुद्धं भवति, ते सलिले नौकावत्तरन्त: संसारसागरस्य पारं गच्छन्ति । ते एव ''शुद्धात्मान:'' कथ्यन्ते ।

# १९९. शूरम्मन्याः के?

*सूरं मण्णइ अप्पाणं*
*जाव जेयं न पस्सती॥*

*—सूत्रकृताङ्गसूत्रम् १/३/१/१*

अस्मिन् जगति एकस्मादन्येऽधिकतराः पुरुषाः चतसृषु दिक्षु भरिता दृश्यन्ते। कश्चिद् रूपे महत्तरः, कश्चिद् ज्ञाने, कश्चिद् धने महत्तरः कश्चिद् बले, कश्चिद् कलायां महत्तरः कश्चिद् सद्गुणे चरित्रे वा।

लक्षेभ्यः पुरुषेभ्यः शक्तौ यो महत्तमः स सहस्रेभ्योऽन्येभ्यः पुरुषेभ्यो लघुतमोऽपि भवितुमर्हति। यतः संसारोऽतिविशालोऽस्ति। प्रत्येकस्मात्कोऽपि क्वापि महत्तरः क्वापि लघुतरो भवत्येव।

अस्यां स्थितौ सहवासिभ्यो जनेभ्योऽधिकां योग्यतां लब्ध्वैव कोऽपि स्वकं जगति महत्तमं मन्यते चेदियं तस्य त्रुटिः। कस्मिंश्चिद् दिवसे कुत्रापि कोऽपि आत्मने महत्तरः पुरुषः मिलेच्चेत्तस्य सर्वोऽप्यहङ्कारो भस्मीभवेत्। अत एव सुज्ञा मानवाः स्वयोग्यतायाः स्वगुणानां वाहङ्कारं न कुर्वन्ति।

ये जना अहङ्कारं कुर्वन्ति ते अविवेकिन बुद्धिहीना अविनीतो अदूरदर्शिनोऽनभिज्ञा वा सन्तीति वक्तुं शक्यते। यावत्ते कमप्यन्यं गुणवत्तरं बुद्धिमत्तरं शक्तिमत्तरं धनवत्तरं रूपवत्तरं चरित्रवत्तरं विजेतारं पुरुषं न पश्यन्ति तावद् वीरम्मन्याः शूरम्मन्या वा विचरन्ति।

# २०१. न वक्तव्यम्

*जत्थ संका भवे तं तु*
*एवमेयन्ति नो वए॥*

*—दशवैकालिकसूत्रम् ७/९*

शङ्का सा मनोवृत्तिरस्ति या स्वीयाज्ञानस्याल्पज्ञानस्य वा बोधं कारयति। अल्पज्ञताया अनुभूतिरस्मान् लज्जयति। तेनाल्पज्ञताया बोधेन मनसि दुःखं जायते। शास्त्रज्ञानस्य लाभाय यदा वयं आचार्याणां गुरूणाम् वोपासनां कुर्मः तदा तेषां परुषाक्षराभिर्गीर्भिरपि चेतसि व्यथा भवति। विवशतया तत्सर्वं सहामहे।

समाधानार्थं यदा वयं गुरुपादानां समक्षं स्वजिज्ञासां प्रकटीकुर्मः तदापि सङ्कोचस्यानुभूतिर्भवति। यतस्तेन कार्येणास्मदीयोऽभिमान आहतो भवति। ''अहो! एष इयदपि न जानाति'' इति वादं वादं अस्मदीया वयस्या अपि(सहपाठिनोऽपि) मनसि चिन्तयन्तोऽस्मासु हसन्ति। अस्मदीयमल्पज्ञानं तेषां परिहासकारणं भवति। ज्ञानसाधनायै साधक एतत्सर्वं सहते विवशतया। अत एव अज्ञानमप्येकः परीषहोऽस्तीति मन्यते।

एकविंशतितमेऽस्मिन् परीषहे विजयं लब्ध्वा साधको गुरुचरणान् उपास्य प्रश्नमाध्यमेन शङ्कानां निवारणं विधायैवान्यान् जनान् उपदिशति। एतदेवोचितम्। कस्यापि विषयस्य यावत्पूर्णं ज्ञानं न स्यात् तावन्न वक्तव्यम्।

# २०२. कुर्वन्तु साधनाम्

*जाए सद्धाए निक्खंते तमेव अणुपालेज्जा*
*विजहित्ता विसोत्तियं ॥*

*— आचाराङ्गसूत्रम् १/१/३*

साधनापथे पुष्पाण्येव न भवन्ति सुतीक्ष्णानि कण्टकान्यपि तत्र लभ्यन्ते नियमेन। अतो नाना विपदां सङ्कटानां वा साम्मुख्यमनिवार्यं भवति साधकेभ्यः।

विपद्भिर्व्याकुलीभूय यदा कदा साधकः पथच्युतोऽपि भवति, पुनः पुनः प्राप्ताभिर्विफलताभिः कदाचित्स निराशोऽपि भवति।

निराशायाः कारणेन सन्मार्गं प्रति तस्य श्रद्धा न्यूना भवति। ततः तस्य मनस्येतादृशी शङ्कोत्पन्ना भवति यद् गमनाय मया स्वीकृतो मार्ग उत्तमोऽस्ति न वा ? एषा शङ्का तस्य प्रयत्नं श्लथयति। शङ्का मानसिको रोगोऽस्ति। अनेन रोगेण पीड़ितः कोऽपि मानवः साधनां कर्तुं किञ्चिदपि नोत्साहितो भवति। स्वजीवनं नाशयति सः।

साधनायाः सर्वोच्चशिखरं प्राप्ताः तीर्थङ्कराख्याः सर्वज्ञाः सर्वदर्शिनो महापुरुषाः शङ्काशीलेभ्यः साधकेभ्यः सत्परामर्शं ददाना उपदिशन्ति यत् ते मानसिकशङ्कारोगं परित्यज्य यया श्रद्धया गृहान्निष्क्रान्ताः तामेव श्रद्धामवलम्ब्य कुर्वन्तु साधनाम्।

# २०३. धर्मद्वयम्

*दुविहे धम्मे: सुयधम्मे चेवचरित्तधम्मे चेव॥*

*— स्थानाङ्गसूत्रम् २/१*

क्रन्दन्ती काचिदम्बा यदा कथयति यत्— ''अमुक: पुत्रो मदीयमुक्तं न शृणोति'' तदा सा किं तं बधिरतायुतं मनुते ? किं तस्या: पुत्रस्य कर्णौ न स्त: ? किं तस्या: पुत्रस्य कर्णयो: श्रवणशक्तिर्विलुप्ता ? नो, नो, नैव, सर्वं तदपेक्षितमस्त्येव; किन्तु मातु: तत्कथनस्याशयोऽयमस्ति यत् पुत्रो मदुक्तं न करोति, मयादिष्टं नानुसरति, मदाज्ञां न पालयति। यथाश्रुतं स न करोति अत एवमुच्यते यत्स न शृणोति ।

व्यवहारस्यैतत्तत्त्वं धार्मिकजीवनेऽपि दृश्यते । शास्त्राणां गुरूणां वोपदेशस्य श्रवणमपि एक: कर्त्तव्योऽस्ति। उपदेशस्य पालनमपि द्वितीय: कर्त्तव्य: । एवं धर्मस्य द्वौ भेदौस्त: प्रथम: श्रुतधर्मो द्वितीयश्चचारित्रधर्म: ।

मनस्तु सदा विषयान् प्रति(कामभोगान् प्रति) पलायते; अतो मनस: कथनं श्रुत्वास्माभि: सद्गुरूणामुपदेश: श्रवणीय: । एष श्रुतधर्मो भवेत्। तदनन्तरं यत्किञ्चिदस्माभिर्गुरुवर्याणां मुखारविन्दादुपदेशामृतं श्रवणचषकयुगलेन पीतं तदनुसारमाचरणं कर्त्तव्यम् एष चरित्रधर्म: स्यात्।

# २०५. किं श्रेयः ?

*जं सेयं तं समायरे ॥*

*—दशवैकालिकसूत्रम् ४/११*

अस्य चराचरजगतोऽधिकांशाः प्राणिनोऽदूरदर्शितायाः कारणेन सौन्दर्यस्य दासाः, माधुर्यस्य भक्ताः, परिग्रहस्य भृत्या, कामस्य किंकराः, विषयस्य वयस्याः सन्ति। दिवानिशं ते कामभोगानां सञ्चयार्थं वस्तूनां च चिन्तनं कुर्वन्ति। अस्तु वैषयिकं सुखं क्षणिकं तथापि तस्य प्राप्तये जीवनस्य बहुमूल्यमायुर्नाशयन्ति।

किम्पाकफलवद् आपातरमणीयो विषयपरिणामो विषयमिव दुःखदो भवेदिति ते विस्मरन्ति। तेषां सङ्कुचिता दृष्टिः वर्त्तमानमेव पश्यति, न भूतं न च भविष्यम्। अत एव ते सौन्दर्ये निहितमसौन्दर्यम्, माधुर्ये निहितां कटुतां च न जानन्ति।

विवेकिनो बुद्धिमन्तः सुज्ञा मानवा भूतकालीनानुभूतिभिर्लभान्विता भविष्यकालीनपरिणामं ध्यात्वा वर्त्तमानकालीनमाचरणं कुर्वन्ति, जीवनं सुधारयन्ति।

भविष्यकाले सुखदायकानि यानि वर्त्तमानकालीनानि कष्टानि सन्ति तानि ते स्मितमुखा हसन्तो वा हेलयैव सहन्ते। प्रेय श्रेयसोः ते प्रेयो विहाय श्रेय एवात्मार्थं (आत्मकल्याणार्थं) चिन्वन्ति तदनुसारमाचरन्ति च।

# २०६. सत्यज्ञानम्

*पुरिसा! सच्चमेव समभिजाणाहि ॥*

*—आचाराङ्गसूत्रम् १/३/३*

जगति ज्ञातव्याः सन्ति नाना विषयाः। नैके विषया ज्ञातुं योग्या मन्यन्ते। यथा— भूगोलः, खगोलः, गणितम्, इतिहासः, राजनीतिः, धर्मनीतिः, कोषो, व्याकरणम्, छन्दः, काव्यम्, अलङ्कारः, रसः, ललितकलाः, ज्योतिषम्, सामुद्रिकं, शकुनं, साहित्यम्, विभिन्नदशेषु प्रचलिता विविधा भाषाः, विविधा, लिपयः, न्याय-सांख्य-वेदान्त-मीमांसा-जैन-बौद्धादीनि दर्शनानि, समाजनीतिः, भूगर्भ-भौतिक-रसायन-अर्थ-सङ्गीत-नृत्य-वाद्य शास्त्राणि इत्यादयः शतशो विषयाः सन्ति।

एकैकविषयज्ञानमपि तादृग्विशालं विस्तृतं गभीरञ्चास्ति यद् व्यतीतेऽपि पूर्णे जीवने तत्परिपूर्णं ज्ञातुं न शक्यते। पल्लवग्राहिपाण्डित्यं न भवति सन्तोषप्रदम्। अतस्तेन मानसी न नश्यत्यशान्तिः।

सम्यग्ज्ञानिनो महापुरुषाः कथयन्ति यत्सर्वेषां विषयाणाम् ज्ञानस्यापेक्षाऽऽध्यात्मिकज्ञानस्य प्राप्तिः श्रेष्ठतरा। आध्यात्मिकेन ज्ञानेन सन्तोषः सुखं, शान्तिश्चैतानि शीघ्रमेव लभ्यन्ते।

आध्यात्मिकज्ञानमेव वास्तविकं ज्ञानम्। सन्तोषलाभार्थं आध्यात्मिकं ज्ञानं प्राप्तव्यम्। यत्सुखदं हितकरं चास्ति तदेव सत्यज्ञानम्।

## २०७. शिक्षायाः सार्थकता

*अट्ठजुत्ताणि सिक्खिज्जा।*
*निरट्ठाणि उ वज्जए॥*

—उत्तराध्ययनसूत्रम् १/८

केचिद्विचारका मन्यन्ते— कलाकलार्थमेव भवेत्, केचिच्चान्ये विचारका मन्यन्ते— कला भवेत् कल्याणार्थमेव।

"प्रथमाया मान्यतायाः— तर्क यदि कलायाः किमपि लक्ष्यं स्यात् तर्हि— कला मरिष्यति।

द्वितीयाया मान्यतायाः तर्कः— यदि कलायाः किमपि कल्याणकरं लक्ष्यं न स्यात्तर्हि कला अन्यान् जनान् हनिष्यति।

एवमेव शिक्षाऽपि कल्याणार्थम् भवेत्। निरर्थकशिक्षाग्रहणं तु समयनाशनम्। ये जनाः शिक्षायाः किमपि लक्ष्यं न स्वीकुर्वन्ति ते सर्वेषां विषयाणामध्ययने निरता भवन्ति। तेषां ध्यानं विविधविषयेषु विभाजितं भवेदतस्ते विषयविशेषनिष्णाता भवितुं नार्हन्ति। कस्मिंश्चिद्विषये विशेषज्ञतामर्जितुं न शक्नुवन्ति।

विपरीतमस्माद् ये जनाः शिक्षां आत्महितार्थं गृह्णान्ति ते तावतो विषयान् शिक्षितुं यतन्ते यावतः शिक्षणादुद्देश्यप्राप्तिः शीघ्रं भवेत्। इत्थं सीमितेषु विषयेषु निष्णाता भूत्वा स्वपरकल्याणकार्येषु जीवनमर्पयन्ति। तैः सम्यगवगता भवति शिक्षायाः सार्थकता।

# २०८. सत्यस्य आज्ञा

*सच्चस्स आणाए उवट्ठिए मेहावी मारं तरइ ॥*

*— आचाराङ्गसूत्रम् १/३/३*

जीवनेऽस्मिन् पदे पदेऽस्माभिरनुशासनस्यावश्यकताऽनुभूयते। अननुशासितोऽविनीतः स्वच्छन्दः पुरुषः स्वेषां परेषाञ्च कष्टानि वर्धयत्येव एव। स्थितावस्यां स्वपरकल्याणस्याशा तेन कथं कर्त्तुं शक्यते?

अनेन सिद्धयति यदनुशासनम् अतीवावश्यको एको गुणोऽस्ति। गुरुजनानामादेशस्य पालनेननुशासनस्य परिचयः प्राप्यते।

यः सेवकः स्वकीयस्वामिन आज्ञां सम्यग्रूपेण पालयति, तस्योपरिस्वामी प्रसन्नो भवति, तं पदोन्नतं(उन्नते पदे स्थापितं नियुक्तं वा) करोति, अस्मै पुरस्कारं यच्छति; परन्तु आध्यात्मिकक्षेत्रे गुणानामेव भवत्याधिपत्यम्। सर्वेषूत्तमो गुणः सत्यमस्ति; अतः सत्यमेव सर्वेषां स्वाम्यस्ति।

सत्येन परिपूर्णं कस्यापि गुरुवर्यस्यादेशं यः पालयति अर्थात् तस्याज्ञामनुसरति, स सत्यस्यैवादेशानुसारमाचरति। अनुशासितो विनीतः सेवकः शिष्यः स क्रमशः गुणस्थानेषु पदोन्नतिं लभते, आत्मशान्त्या पुरस्कृतोऽपि भवति। सत्यस्याज्ञापालनतत्परो मेधावी स मृत्युसागरमपि तरति।

# २०९. सत्यनिष्ठा

*सच्चम्मि धिइं कुव्वह ॥*

*—आचाराङ्गसूत्रम् १/३/२*

किमस्ति सत्यम् ? इति ज्ञातुं सत्पुरुष-जीवनी द्रष्टव्या । तेषां यदाचरणम्, तदस्माभिरप्याचरणीयम् । सत्पुरुषाणां मार्गः "सन्मार्ग" इत्युच्यते । अतो ये सन्मार्गे चरन्ति ते सत्पुरुषा उच्यन्ते । सत्पुरुषाणाम् आचरणमेव सदाचारः ।

यथा सत्पुरुषा रागद्वेषाभ्यां रहिता भवन्ति तथास्माभिरपि रागद्वेषयोस्त्यागस्य प्रयासः कार्यः । यथा सत्पुरुषाः करुणावरुणालयाः परोपकारपरायणाश्च भवन्ति तथैव अस्माभिरपि सदयः परोपकार धर्म उपादेयः। एवमेव तेषां सर्वेऽपि सद्गुणाः स्वीकरणीयाः ।

किन्तु सत्पुरुषवदाचरणं कर्त्तुमिच्छुकैः साधकैरेतत्कदापि न विस्मरणीयम् यत्कर्मफलं शीघ्रं न प्राप्यते। शुभकर्मणां शुभफलप्राप्ति-पर्यन्तं नाना बाधा आयान्ति। बाधासु विजयं स एव प्राप्नोति यो धैर्यमवलम्बते सहिष्णुतां, स्वीकरोति, क्षमाशीलतां धारयति, शान्तिमाश्रयति, सन्तोषमङ्गीकरोति ।

अत एव मनीषिणो भव्यजीवान् आत्मकल्याणमार्गे चरितुं प्रेरयन्तो उपदिशन्ति— सत्ये स्थितिं कुर्वन्तु । यतः सदाचाराणां सुफलं प्राप्तुम् अतीवावश्यकं मन्यते— सत्यगुणे धैर्यम् ।

# २१०. सद्गुणसाधना

*बाहाहिं सागरो चेव*
*तरियव्वो गुणोदही ॥*

— *उत्तराध्ययनसूत्रम् १९/३७*

पुरा नौकाभिः समुद्र यात्राः क्रियन्ते स्म । अधुना महाकायानि जलयानानि यात्रार्थं निर्मितानि सन्ति, येषूपविश्य यात्रिण एकस्माद् देशादन्यदेशं सुखेन गच्छन्ति।

वायुयानानि यदाऽऽविष्कृतानि तदा प्रभृति जलयानानां महत्त्वमपि न्यूनं सञ्जातम् । अधुना मध्येमार्गम् आपततः सुविशालान् समुद्रान् अप्युपेक्षमाणा यात्रिणः सुगमतया वायुयानान्यारुह्य परदेशं गन्तुं शक्नुवन्ति— गच्छन्तो दृश्यन्ते च।

परन्तु कोऽपि यात्री यदि नौकायाः, जलयानस्य वायुयानस्य वोपयोगमकुर्वाणः स्वभुजाभ्यामेव समुद्रं तितीर्षेत् तर्हि किमेतत् सम्भवेत्? आम्, वीरसावरकरवत्तरणकलाकुशलाय कदाचिदेतत् सम्भवेदपि तथापि गुणसमुद्रस्य पारं गमनम् अर्थात् समस्तसद्गुणानां आत्मसात्करणं तु कस्मैचिदपि मानवाय नैव सम्भवेद्। सर्वज्ञानां सर्वदर्शिनां तु वार्त्ताऽन्या। तैरतिरिक्ताः समस्ताः प्राणिनः 'छद्मस्था' इत्युच्यन्ते ।

कथनस्यायमेवाशयः प्रतीयते, यत्कस्मिंश्चिदेकस्मिन् पुरुषे समस्ताः सद्गुणा युगपन्न तिष्ठन्ति । गुणैः सहदोषा अप्यवलोक्यन्ते सर्वत्र ।

# २११. अमूढः सम्यग्दर्शी

*सम्मदिट्ठी सया अमूढे ॥*

*—दशवैकालिकसूत्रम् १०/७*

मिथ्या भवति यस्य दृष्टिः स मिथ्यादृष्टिरुच्यते। मिथ्यादृष्टिः मोहग्रस्तो(मूढः) भवति । सत्सङ्गतिप्रभावेण मूढता नश्यति । विपरीतमस्मात् सम्यगदृष्टिरमूढो भवति। तस्यामूढता कुसङ्गतावपि न नश्यति।

**चन्दनतरौ** यद्यपि विषधराः श्लिष्टा भवन्ति तथापि स विषेण अप्रभावितः तिष्ठति । तथैव दुर्जनैः परिवृतेऽपि सज्जने दुर्जनता न प्रविशति।

यस्य दृष्टौ सम्यक्त्वं भवति, स सर्वत्र सम्यक् पश्यति, सम्यक् एव सर्वतः स्वीकरोति। दुष्टेष्वपि स कञ्चिद् गुणमन्विष्य तमङ्गीकरोति। अस्यां स्थितौ सत्सङ्गप्रसङ्गस्य का वार्त्ता ?

पृष्टः कश्चित्सन्न्यासी सदैवैवं कथयति स्म यन्मया मूर्खैरेव सर्वं शिक्षितम्। ते एव मम गुरवः सन्ति। यतः तेषाम् दिनचर्याम् पश्यन्नेव यथा ते आचरन्ति तथा अहं न करोमि। स सन्न्यासी सम्यग्दृष्टिरासीत् अत एव मूर्खेभ्योऽपि शिक्षां गृहीतुं शशाक। अन्यथा स मिथ्यादृष्टिरभ-विष्यच्चेत् शिक्षितैर्ज्ञानिभिः सज्जनैरपि दुर्गुणानेवाशिक्षिष्यत।

सम्यग्दृष्टिः मनुष्यः कदापि न भवति किङ्कर्त्तव्यविमूढः । तस्य पुरतः कर्त्तव्यमार्गः सुस्पष्टो भवति। स सदाऽमूढो भवति।

# २१२. चारित्रमूलम्

*नादंसणिस्स नाणं*
*नाणेण विणा न होंति चरणगुणा ॥*
*—उत्तराध्ययनसूत्रम् २८/३०*

यावद् दृष्टिः सम्यङ् न स्यात् तावत् कोऽपि मानवः सम्यग्ज्ञानं प्राप्तुं न शक्नोति। यतो यावद् दृष्टिः सत्ये स्थिरा न स्यात्तावत्सत्यस्यान्वेषणं कर्त्तुं न शक्यते। सत्यान्वेषणतत्पराय साधकाय दृष्टौ सम्यक्त्व-मत्यावश्यकम् ।

सम्यग्ज्ञानात् पूर्वं सम्यग्दर्शनम् भवेत्। दर्शनं विना ज्ञानमसम्भवम्। जैनमन्दिरं गत्वा महावीरस्वामिनः तेजस्विनीं शान्तां सौम्यां मुद्रामव-लोक्यैवैतज्ज्ञातुं शक्यते यन्मनोविकारेषु विजयः कथं प्राप्यते। शिशुरपि प्रत्येकं वस्तु दृष्ट्वैव शिक्षते । दृष्ट्वा शिक्षेत(देखकर सीखो)— इति शिक्षाशास्त्रस्य सर्वसम्मतो राद्धान्तः ।

ज्ञानानन्तरं आचरणे शुद्धिः प्रविशति। यदाऽस्माकं मनसि विवेको जागर्त्ति यत्किं दुराचरणं किञ्च सदाचरणम्, तदा सदाचरणं जीवने धारयितुमनुकूला मनोवृत्तिरुत्पद्यते । वयं च सदाचारिणो भवामः । यावत्तादृशो न जागर्त्ति विवेकः तावत्सदाचारे रुचिर्न भवति। रुचेरभावे प्रवृत्तिरपि न भवति।

कथनस्यायं सारांशो यत्सम्यग्दर्शनेन सम्यग्ज्ञानम्, सम्यग्ज्ञानेन सम्यक्चारित्रं प्राप्यते। अतः चारित्रमूलं सम्यग्दर्शनमस्ति।

## २१३. जागृताः के ?

*सुत्ता अमुणी मुणिणो सया जागरन्ति ॥*

*— आचाराङ्गसूत्रम् १/३/१*

योऽमुनिः (असाधुः) अस्ति, यस्मिन् साधुताया साधकतायाः वा अभावोऽस्ति, स स्वपिति। यः सुप्तोऽस्ति तस्य चक्षुषी निमीलिते स्तः। अतः स किञ्चिदपि द्रष्टुं न शक्नोति। एवमेव योऽस्त्यसाधुस्तस्य विवेकलोचने निमीलिते स्तः; अतः तस्मिन् कर्त्तव्याकर्त्तव्यस्य बोधो नोदेति। स किङ्कर्त्तव्यविमूढ एव तिष्ठति।

विवरीतमस्माद् यः मुनिः, यतिः, साधुः, साधनापथपान्थः साधको वाऽस्ति स सदा जागृतः तिष्ठति,तस्य विवेकनेत्रेऽनिमीलिते स्तः, कोऽपि कर्त्तव्यः तस्य पुरतः स्थित एव भवति। कर्त्तव्यपालने स सुखानुभूतिं करोति। कर्त्तव्यस्य फलप्राप्तेः सुखं तु यथाकालं अनुभूयते एव; परन्तु कर्त्तव्यस्य पालनकाले यत्सुखं भवति तदतिरिक्तम्। अनेन अतिरिक्तसुखेनापि विवेकी साधकः सम्पन्नः तृप्तश्च भवति।

विवेकगुणालङ्कृतः साधको यदा एकं कर्त्तव्यं पूर्णं करोति तदा तत्कालमेव द्वितीयः कर्त्तव्यः पुरत उपस्थितो भवति। द्वितीयकर्त्तव्यस्य समाप्तौ तृतीयः, तृतीयस्य समाप्तौ चतुर्थ, एवं एकस्य पश्चादेकः कर्त्तव्यः समक्षमागत्य तं विवशं करोति पालनाय।

अत एवोक्तमस्ति यदमनुयः सदा सुप्ता मुनियश्च जागृताः सन्ति।

## २१४. निष्पापाः के ?

*सन्तोषिणो नो पकरेंति पावं ॥*

— सूत्रकृताङ्गसूत्रम् १/१२/१५

लोभः पापस्य मूलम् । यथा यथा मानवो लाभान्वितो भवति तथा तथा पापमार्गे प्रवृत्ततरो भवति । यथा लाभस्तथा लोभो लाभाल्लोभः प्रवर्धतितराम्। प्रवृद्धो लोभो व्यक्तिमनुचितकार्येषु अन्यायपूर्णकार्येषु वा प्रेरयति ।

वह्निवल्लोभः प्रत्येकं व्यक्तिहृदयं दहति । यथा क्षिप्तेभ्यः काष्ठेभ्यः वह्निर्न तृप्यति तथा सञ्चितेभ्यो वस्तुभ्यो लोभो न तृप्यति । नवरूप्यकधारक एकमुपार्ज्य दशरूप्यकाणि कर्तुमिच्छति, तथैव नवनवतिरूप्यकधारकोऽन्यदेकं रूप्यकमर्जयित्वा शतं रूप्यकाणां कर्तुं यतते । एवमेव शतधारी सहस्रं,सहस्रधारी लक्षं, लक्षधारी कोटिं, कोटिधारी अब्जमिच्छति। तृष्णाग्निरतृप्तं जीवं विविधकामनासाधन-सञ्चये तत्परं विधाय तमशान्तं करोति, संसारे इतस्ततः निरन्तरं भ्रामयति ।

सन्तोष एव लोभरोगस्यौषधिः । मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः? स एव भवति दरिद्रो यस्य तृष्णा विशाला ! इति समीचीनमेव कथयन्ति मनीषिणः ।

लोभविहीनो धर्मात्मा पुरुषः सन्तोषं मनसि धारयन् यत्किञ्चित् प्राप्तं सहजं प्रामाणिकतया परिश्रमेण च यत्प्राप्यते, तेनैव तृप्तिमनुभवति। सन्तोषः तं पापान्निवारयति ।

# २१५. सम्बोधिः

*सम्बुज्झह किं न बुज्झह*
*संबोही खलु पेच्च दुल्लहा ॥*
*— सूत्रकृतांगसूत्रम् १/२/१/१*

पूर्वभवेषूपार्जितानां शुभाशुभकर्मणां शुभाशुभफलानि भुञ्जाना जीवाः संसारे चतुरशीतिलक्षयोनिषु जन्म ग्राहं ग्राहं म्रियन्ते ।

मृत्वा मनुष्यः पुनर्मनुष्य एव भवतीति निश्चितं वक्तुं न शक्यते । यतः तस्याजीवनं कृतानि कर्माण्यनुसृत्य योनिर्निश्चिता भवति। ततः कृतकर्मदलफलभोगार्थं तस्यामेव योनौ जन्म गृहीतुं विवशा भवन्ति जीवा अनिच्छापूर्वकमपि ।

आयुषि पूर्णे मृत्वा मनुष्यः स्वशरीरं परित्यज्य हस्तिनः, सिंहस्य, उष्ट्रस्य, गर्दभस्य, बलीवर्दस्य, अजायाः, धेनोः कुक्कुरस्य, मयूरस्य, नकुलस्य, सर्पस्य, शुकस्य, काकस्य, कपोतस्य, पिपीलिकायाः, यूकायाः, मत्कुणस्य, षट्पदस्य वा शरीरं धारयितुं शक्नोति । यादृशं चिन्तनशीनलं मनः मस्तिष्कञ्च मानवशरीरेण सह जीवो लभते तथा पशुपक्षिणां योनौ लब्धुं न शक्नोति ।

आत्मकल्याणस्य मोक्षस्य वा साधना मानवभवे एव भवितुम् अर्हति । अतो मानवभवायुर्व्यर्थम् न व्यत्येतव्यम्। मानवधर्म रहस्य-मवगन्तुं या योग्यता प्राप्ताऽस्ति तस्या उपयोगेन सम्बोधिः प्राप्तव्या ।

# २१८. समयं जानन्तु

*अणभिक्कं तं च वयं संपेहाए खणं जाणाहि पंडिए ॥*

*—आचाराङ्गसूत्रम् १/२/१*

हीरकोऽप्यमूल्यः प्रस्तरोऽपि; किन्तूभयोरमूल्यतायां महदन्तरं विद्यते। हीरकस्य यथार्थं मूल्याङ्कनं भवितुं नार्हति; अतः सोऽमूल्यः कथ्यते; किन्तु प्रस्तरस्य किमपि मूल्यं नास्तिः, अतः सोऽमूल्य उच्यते।

समयस्यामूल्यता हीरकवद् भवति। एकदा व्यतीतः समयः पुनर्न प्रत्यागच्छति। रूप्यकाणां कोटिं लक्षशः स्वर्णमुद्रा वा दत्त्वाऽपि अत्र जीवः कदापि स्वायुषः क्षणलवमात्रमपि वर्धयितुं न शक्नोति। एषा एवास्ति समयस्यामूल्यता।

समयस्येमाममूल्यतामनवगम्य मनुष्यः स्वजीवनस्य यावदायुरद्यावाधि व्यतीतवान् तावत्तु पुनः प्राप्तं न भवेदेव; परन्तु यदवशिष्टं तस्य सदुपयोगः कर्त्तुं शक्यते। तदेवाशुकरणीयम्।

यः समयस्य मूल्यं सम्यग्ज्ञात्वा आत्मकल्याणसाधनायां-परोपकारादिधर्मकार्येषु च तस्योपयोगं करोति स एव विवेकसम्पन्नः, स एव पण्डितः, स एव धर्मपरायणः, स एव विनीतः,स एव सुशिष्यः।

शास्त्रकाराः समुपदिशन्त्यनया सूक्त्या यत्पण्डिताः (सुज्ञाः) समयं (समयस्य महत्त्वम्) जानन्तु।

# २१७. समयोचितम्

*काले कालं समायरे ॥*

*— उत्तराध्ययनसूत्रम् १/३१*

वयं क्षुधायां पानीयं न पिबामः। पिपासायां भोजनं न भक्षयामः। यतो ह्यनुचितमेतत्।

एवमेव क्रीडाकाले भोजनम्, भोजनकालेऽध्ययनम्, अध्ययन-काले च क्रीडनमनुचितम् मन्यते।

समयानुसारं कार्यमस्ति प्रकृतेर्नियमः। प्रकृतिः स्वनियमस्य पालनं पूर्णरूपेण करोति। सायङ्काले सूर्यस्योदयो न भवति प्रातः काले च सूर्योऽस्तं न गच्छति। वृद्धावस्थायाः पश्चाच्छैशवं नायाति, शैशवा-वस्थायाः पश्चात्तत्कालमेव वार्धक्यम् नागच्छति। मध्ये तारुण्यावस्थायाः पारङ्गमनमावश्यकम्।

यथा वर्षर्त्तविव वर्षति जलं सदा, न तथा शीतर्त्तौ न च ग्रीष्मर्त्तौ। प्रकृतेरस्य नियमस्यास्माभिरपि पालनं कर्त्तव्यम्। यदि वयं न तथा करिष्यामः तर्हि प्रकृतिरस्मान् तत्कालमेव दण्डयिष्यति। पुरीषवेगकाले यदि कोऽपि स्वादलोभेन भोजनं कर्त्तुं प्रवर्त्तते तर्हि किं स्यात्? एकतो मुखमार्गेण स उदरे किञ्चित् क्षिपति, अन्यतो गुदमार्गेण प्रकृतिस्तन्नि-ष्कासयति। निष्कासितपदार्थस्य दुर्गन्धेन भोजनसुखमपि प्रकृतिस्तत्कालं नाशयति।

अतोऽस्माभिः सदा तदेव कर्त्तव्यं यत् समयोचितम् स्यात्।

# २१८. विना प्रमादं करोतु कार्यम्

*जेहि काले परक्कं तं*
*न पच्छा परितप्पए॥*

—*सूत्रकृताङ्गसूत्रम् १/३/४/१५*

अलसा ये यथासमयं स्वकर्त्तव्यं न समाप्नुवन्ति ते पश्चातापं कुर्वन्त्यनन्तरम्; किन्तु को लाभस्तेन ?

शुष्यतः कस्यचित्पादपस्य पूर्वमेव जलेन सिञ्चनं न कृतञ्चेत् पश्चात्तापेन किं स कदापि हरितः स्यात् ?

निर्वाति दीपे तैलपूरणं सार्थकं भवति; किन्तु तैलाभावेन यो दीपो निरवात् पश्चात्तस्मिन् प्रचुरेणापि तैलदानेन किं स्यात् ? पश्चात्तापमात्रेण किं स दीपो वस्तूनि प्रकाशयितुं समर्थः ? नो।

परीक्षार्थी यः छात्रःसाम्प्रतम् परीक्षाकालेऽतीव दूरेऽस्ति, अन्तराऽस्ति द्वादशमासानां सुदीर्घोऽवधिः,दशमासीयः, अष्टमासीयः, पञ्चमासीयः, एकस्य मासस्य त्रिंशद्दिवसीयः, विंशतिदिवसीयः, दशदिवसीयः, पञ्चदिवसीयः, एकस्य दिवसस्य चतुर्विंशतिहोरात्मकः दीर्घः कालेऽवशिष्टोऽस्ति, काऽस्ति त्वरा ? करिष्यामि समस्तपाठ्य-पुस्तकानामध्ययनं हेलयैव— इति मनसि चिन्तयन् अध्ययनं प्रति ध्यानं न ददाति, सर्वं कालं क्रीडासु गल्पवार्त्तासु व्यर्थविवादेषु वा व्यत्येति, सोऽनुत्तीर्य पश्चात्तापं करोति चेत्तेन को लाभः ?

ज्ञानिनः कथयन्ति यदि भवान् निश्चितं साफल्यमीप्सति तर्हि विना प्रमादं करोतु कार्यम्।

# २१९. समताभावः

*जहा पुण्णस्स कत्थई*
*तहा तुच्छस्स कत्थई।*
*जहा तुच्छस्स कत्थई*
*तहा पुण्णस्स कत्थई॥*

*—आचाराङ्गसूत्रम् १/२/६*

निःस्वार्थो धर्मोपदेशको यथा पुण्यवन्तमुपदिशति तथैव पुण्यहीनमपि; यथा धनवन्तमुपदिशति तथा निर्धनमपि; तस्य मनसि निर्धनधनवतोर्भेदभावो न तिष्ठति; सर्वेभ्यः श्रोतृभ्यः स समानमेव धर्मप्रेरकानि प्रवचनानि यच्छति; पक्षपातं न करोति तत्र।

प्रत्येकस्य धर्मोपदेशकस्य मनसि समत्वभावनापेक्ष्यते। प्रवचनं न भवति क्रेयं विक्रेयं वा वस्तु, येन यत्राधिकधनलाभसम्भावना स्यात् तत्रोत्तमं प्रवचनं क्रियेत तथा यत्र स्यान्न्यूनधनलाभसम्भावना तत्र साधारणं प्रवचनं क्रियेत! अथवा यत्राधिकयशोलाभसम्भावना भवेत् तत्रैवोद्धारकस्तारक उपदेश दीयेत यत्र च न्यूनयशः प्राप्तिसम्भावना स्यात्तत्र सामान्योपदेशः दीयेत? यत्र च स्यात्सहस्रशः श्रोतॄणामुपस्थितिः तत्रैव मार्मिकम् धार्मिकम् व्याख्यानम् क्रियेत यत्र तु स्यात् सामान्योपस्थितिः तत्रातीव साधारणं व्याख्यानं क्रियेत।

मनीषिणो ज्ञानिनो हितैषिणः शास्त्रकारा एवमिच्छन्ति यत्सर्वेषु प्रवचनकारेषु व्याख्यातृषूपदेशकेषु वा स्थिरः समताभावः स्यात्।

# २२०. सम्यक्त्वम्

*नत्थि चरित्तं सम्मत्तविहूणं ॥*

*— उत्तराध्ययनसूत्रम् २८/२९*

यदस्ति सम्यक् तस्मिन् श्रद्धा एवोच्यते सम्यक्त्वम्। कः सदाचारः कश्च दुराचारः ? कीदृशं फलं लभ्यते सदाचारस्य कीदृशं च दुराचारस्य? कस्मिन् काले कः कीदृशानि कार्याणि कृतवान् तथा कस्मिन् काले कः तेषां कार्याणां कीदृशानि शुभाशुभफलानि लब्धवान् ? इति सविस्तरं प्रकाशयितुमेव हितैषिभिर्मनीषिभिः विभिन्नधर्म-शास्त्राणि रच्यन्ते, येन शास्त्रीयप्रवचनानां श्रोतारः शास्त्राणामध्येतारो वा दुराचारतो दूरे स्थित्वा सदाचारमुपादातुं प्रेरिता भवेयुः ।

शास्त्रद्वारेणानुभवद्वारेण वा यदा वयं सम्यक्तया ज्ञास्यामो यत्सुधर्मफलं सुखं कुधर्मफलं च दुःखं भवति तदा सुधर्मे विश्वास उत्पत्स्यते कुधर्मे चाविश्वासः।

सुधर्मे सदाचारे वा यो विश्वासो भवति स एव सम्यग्दर्शनम् सम्यक्त्वम् वा कथ्यते। सुदेवे (वीतरागे) सुगुरौ (धर्माचार्ये) चापि यो विश्वासो मनसि उत्पन्नो भवति सोऽपि सुज्ञैः सम्यक्त्वमुच्यते ।

आत्मशुद्धिमवलम्ब्य यः सिद्धिम् प्राप्तुमिच्छति सोऽवश्यमेवात्र सम्यग्दर्शनमुपादत्ते । यतः स सम्यग् जानाति यद् यावत्सम्यक्त्वं नोपादीयते तावत्सम्यक् चारित्रमपि न प्राप्यते ।

## २२१. सम्यक्त्वदर्शी न करोति पापम्

*सम्मत्तदंसी न करेइ पावं ॥*

*— आचाराङ्ग सूत्रम् १/३/२*

जीवः, अजीवः, पुण्यम्, पापम्, आस्रवः, संवरः, बन्धः, निर्जरा, मोक्षश्चैतानि सन्ति नव तत्त्वानि। एतेषां स्वरूप एवोर्थः। तत्त्वानामर्थे श्रद्धानं भवति सम्यग्दर्शनम्। यः साधको नवानामपि तत्त्वानां यथार्थं स्वरूपं सम्यगवगच्छति तस्य तेषां प्रति विश्वासः समुत्पन्नो भवति। समुत्पन्ने तत्त्वार्थश्रद्धाने मनुष्यः सम्यग्दर्शीत्युच्यते।

सामान्ये व्यवहारेऽप्येवं दृश्यते यज्जना ज्ञाते वस्तुन्येव विश्वसन्ति, नाज्ञाते। यदि किञ्चिदज्ञातं वस्तु अस्माभिः सम्पृक्तं भवति तर्हि तस्मिन् विश्वसनात् पूर्वम् तस्य विषये ज्ञातुं प्रयतामहे। यतो ज्ञानं विना कस्मिंश्चिद् विश्वसन्तो जना वञ्च्यन्ते।

यदा साधक एतत्सम्यगवगच्छति यज्जीवाजीवयोर्भेदोऽस्ति, अहं जीवोऽस्मि, किन्तु अन्ये समस्ता निर्जीवाः पदार्थाः पुद्गलाः सन्ति, एकत्रीकृतान् पुद्गलपदार्थान् अत्रैव विहाय जीव एकाक्येव मृत्वा परलोकं गच्छति। आजन्मनः संलग्नमेतत्प्रियतरं शरीरमप्यत्रैव त्यज्यते तदा क्षणिकं शारीरिकं सुखं प्राप्तं पापानि (दुष्कृतानि) तस्मै न रोचन्ते। अतः करोतु पुण्यानि धार्मिकाणि कार्याणि कामं कियन्त्यपि सः, किन्तु पापानि न करोति, सत्यग्दर्शित्वात्।

# २२२. दृष्टौ स्थैर्यम्

*से दिट्ठिमं दिट्ठि न लूसएज्जा ॥*

*—सूत्रकृताङ्गसूत्रम् १/१४/२५*

यस्य दृष्टौ सम्यक्त्वमस्ति तेन स्वीया दृष्टिः कदापि शिथिला न कार्या। एकदा यस्य यादृशो दृष्टिकोणो निर्मितो भवति स तादृशं एव सर्वं पश्यति। श्रावणमासे यश्चक्षुर्हीनो भवति स सर्वत्र हरीतिमामेव पश्यति (श्रावणमासे प्रकृतौ हरीतिमां पश्यन् योऽन्धो भवति दुर्घटनाग्रस्तः, सो द्वादशस्वपि मासेषु स्वकल्पनया हरीतिमां पश्यति ) किन्तु किं तस्य दृष्टिर्यथार्था ? नो।

सम्यग्दृष्टिसम्पन्न एवं जानाति यद् यस्मिन् काले यद् वस्तु यादृशं भवति तद् अन्यस्मिन् कालेऽपि तादृशमेव भवेदिति निश्चितं नास्ति। अन्यस्मिन् काले तद्वस्तु अन्यादृशमपि भवितुमर्हति। दशवर्षपूर्वं यस्य शिशोः मुखे दन्तपंक्तिर्नासीत्, जानुबले नापि योऽग्रे सरितुं न शशाक; स एवाद्य स्वकीयदन्तै रोटिकां चर्वति तथा धावन्नितस्ततो गच्छति; यतः सर्वत्रात्र परिवर्त्तनशीलता विलसति।

अत एव सम्यग्दृष्टिः साधकः कदापि दुराग्रही न भवति, एकान्तवादी न भवति, किन्तु सत्याग्रही चानेकान्तवादी च भवति। एकान्तवादिभिर्दुराग्रहीभिः स प्रभावितो न भवति। तस्य दृष्टिः सत्यमन्विष्यति। सत्यमन्विष्य स तदात्मसात्करोति। उदारस्य तस्य दृष्टौ स्थैर्यम् भवति।

# २२३. मायालोभौ

*मायामज्जवभावेण*
*लोहं संतोसओ जिणे॥*

*— दशवैकालिकसूत्रम् ८/३९*

सारल्यस्य विलोमशब्दः कौटिल्यम् अस्ति। सरलताख्यसद्गुणेन समृद्धे नरे लोका अखण्डं विश्वसन्ति। विपरीतमस्मात्कुटिलताख्यदुर्गुणेन सम्पन्ने जने न विश्वसन्ति लोकाः।

यत्रैव विश्वासस्य निवासस्तत्र प्रेम्णोऽपि यत्रैव प्रेम निवसति तत्र सुखमपि।

अस्माभिर्यदि कुटिलता माया वा विजेतव्याऽस्ति, तर्हि सरलता ऋजुता वोपादेया।

द्वितीयो दुर्गुणो लोभः। लुण्टाको लोभः जीवनस्य सर्वं सुखं लुण्टति। स एतादृशोऽग्निरस्ति यः प्रेम दग्ध्वा सर्वथा तद् भस्मीभूतं करोति। पिशाच इव स हार्दिक्याः शान्तेरपहरणं करोति। तस्य विनाशं कर्त्तुकामैरस्माभिः स्वजीवने सन्तोषः प्रतिष्ठापयितव्यः।

वीतरागैर्मनीषिभिः महापुरुषैः आत्मकल्याणपथपान्थेभ्य एतद् उपदिष्टमस्ति यद् यथा ऋजुताया अङ्कुशस्य प्रयोगेण मायामोहिनी वशीक्रियते तथैव सन्तोषाङ्कुशस्य प्रयोगेण लोभलुण्टाको गज इव वशी कर्त्तव्यः।

ऋजुतासन्तोषाभिधेयौ उभौ सद्गुणौ योऽङ्गीकुरुते स एव *मायालोभाख्यौ दुर्गुणौ विजेतुमर्हति।*

# २२४. सहिष्णुता

*पियमप्पियं सव्व तितिक्खएज्जा ॥*

*—उत्तराध्ययनसूत्रम् २१/१५*

सर्वदा प्रियवस्तुभिरेव संयोगो नो भवति, सर्वत्र प्रशंसैव प्राप्ता न भवति, सर्वे जना मृदु मधुरमेव वचनं न ब्रुवते। वयं पश्यामो यद् अनेकदा अस्माभिः अप्रियवस्तून्यपि प्राप्यन्ते, निन्दापि भवति अस्माकम्, कुत्रचित्कठोरं कटुकमपि वचनं श्रूयते। अस्यां स्थितावनुकूलं प्रतिकूलञ्च सर्वमस्माभिः समभावभावितात्मभिः सोढव्यम् ॥

सहिष्णुता वीरतायाः प्रतीकोऽस्ति। असहिष्णुता कायरतायाः प्रतीकोऽस्ति।

क्षुधा, पिपासा, शैत्यम्, औष्ण्यम्, दंशः, वस्त्राभावः, आक्रोशः, वधः, याचना(भिक्षा) इत्यादयो द्वाविंशतिः परीषहा भवन्ति। तान् ये श्रमणाः शान्तिपूर्वकं सहन्ते ते एव साधनायां साफल्यं लभन्ते।

गृहस्थानां जीवनेऽपि पदे पदे सहिष्णुताया आवश्यकता भवति। क्षुब्धता क्रुद्धता चातिसरलौ कार्यौ स्तः। यतः स्वमूर्खताया अदूरदर्शितायाः वा कारणात् कोऽपि मानवः क्षुब्धः क्रुद्धोऽशान्तो वा भवितुमर्हति।

परन्तु दूरदर्शिनः सुज्ञाः पुरुषा उपस्थितेष्वपि क्षोभकारणेषु न भवन्ति क्षुब्धाः। समत्वभावनां मनसि कृत्य व्यवहरन्ति ते संसारे। पदे पदे तेषां जीवने दृश्यते सहिष्णुता।

## २२५. शरीरम् कीदृशम् ?

*सरीरं सादियं सनिधणं ॥*

*—प्रश्नव्याकरणसूत्रम् १/२*

अस्मिन् जगति यावन्तोऽपि पदार्थाः सन्ति ते सर्वे चतुर्षु भङ्गेषु विभक्ताः भवन्ति—

| | | | |
|---|---|---|---|
| १. | अनाद्यनन्ताः | २. | अनादिसान्ताः |
| ३. | साद्यनन्ताः | ४. | सादिसान्ताः |

धर्मास्तिकायः, अधर्मास्तिकायः, जीव इत्यादयः पदार्थाः प्रथमे भङ्गे सन्ति, येषां न आदिरस्ति न चान्तः।

द्वितीये भङ्गेऽष्टकर्माणि गण्यन्ते, येऽनादिकालादात्मना साकं संश्लिष्टाः सन्ति, किन्तु निर्जरयाऽऽत्मनः पृथक् कर्त्तुं शक्यन्ते।

सर्वज्ञता, सर्वदर्शिता, मुक्तिरित्यादयः तृतीये भङ्गे भवन्ति, येषामादिरस्ति किन्तु अन्तः कदापि न भवति। एकदा यस्मिन् मानवे केवलज्ञानमुद्भवति स सर्वदा सर्वज्ञ इत्युच्यते, कदापि सोऽसर्वज्ञोऽकेवली वा न भवति। एकदा प्राप्ता मुक्तिरपि कदापि नष्टा न भवति। अतः सर्वज्ञत्वे, सर्वदर्शित्वे, मुक्तौ च साद्यनन्तत्वं वर्त्तते।

चतुर्थे भङ्गे शरीरं मन्यते। एतद् शैशवं, कैशोर्यं, तारुण्यं, वार्धक्यञ्चानुभूय म्रियते। आदौ जन्म गृहीत्वा अन्ते मरणं प्राप्य नश्यति। आत्मना पृथग्भूतं शरीरं नाश्यते (अग्निना भस्मीक्रियते) जनैः।

# २२६. मानवचक्षुः

*से हु चक्खु मणुस्साणं*
*जे कं खाए य अंतए॥*

*— सूत्रकृताङ्गसूत्रम् १/१५/१४*

येन स्वकामनाः वशीकृताः, इन्द्रियप्रियकामभोगेषु यः सर्वथा-नासक्तो विषयवस्तूनि यो विषवत्त्याज्यानि मनुते, स एव निरपेक्षो निःस्वार्थः निष्पक्षोऽस्तीति वक्तुं शक्यते।

स एवात्राध्यात्मिकीं साधनां ये कुर्वन्ति तेषां कृते पथप्रदर्शनं कर्त्तुं पूर्णाधिकारी भवति। मुमुक्षवः तस्य प्रदर्शितपथे प्रगतिं कर्त्तुमर्हन्ति। स्वगन्तव्यं च प्राप्तुमर्हन्ति।

एतादृशे मानवे न रागो भवति न द्वेषः, न माया भवति न ममता, न मानं भवति न दैन्यम्।

मनसः कायरतां क्रूरताञ्च दूरीकृत्य सदा पूर्णसमभावभावितात्मा स सदाचारपरायणो मितभाषी उपदेशकर्त्ता च भवति।

तस्यान्तःकरणं 'सर्वे भवन्तु सुखिन' इति पवित्रभावेन निरन्तरं परिपूर्णं भवति। यः सर्वेषां हितमिच्छति, प्रगतिमिच्छति, सुखमिच्छति, स परोपकारपरायणो भवति। आत्मकल्याणस्य मार्गे गमनशीलानां साधकानां समुचितं मार्गदर्शनं कर्त्तुं सक्षमत्वात्स महापुरुषः चक्षुरिव महत्त्वपूर्णो भवति। अतः संसारस्थसमस्तमानवहिताभिलाषी स ''मानवचक्षुः'' अस्ति।

# २२७. साधूनां प्रसन्नता

*महप्पसाया इसिणो हवन्ति ॥*

*—उत्तराध्ययनसूत्रम् १२/३१*

वयं विविधासु परिस्थितिषु जीवामः । काश्चित् तासु अनुकूलाः काश्चिच्च प्रतिकूला भवन्ति । प्रतिकूलासु परिस्थितिषु ये भवन्त्यधीरा अर्थात् येषां मानसिकं सन्तुलनं नश्यति, ते प्रसन्ना भवितुं नार्हन्ति ।

**विषयभोगसामग्री क्षणिकसुखदात्री**ति विज्ञायापि तामेकत्रीकरणे ये स्वमनो नियोजयन्ति, तेऽपि नित्यम् अशान्तास्तिष्ठन्ति । तृष्णाग्निरपि मनः शान्तिम् दग्ध्वा भस्मीकरोति ।

तृष्णया प्रेरितो लक्षाधिपतिः कोटिपतिः भवितुमिच्छति, कोटिपतिश्च अब्जपतिः भवितुमिच्छति, अब्जपतिः राष्ट्रपतिर्भवितुं यतते, राष्ट्रपतिः पुनः विश्वाधिपतिर्भवितुकामः प्रयत्नशीलो भवति । इत्थं तृष्णा मानवानां सुखानुभूतौ बाधां जनयति ।

सन्तः, ऋषयः, मुनयः, साधवः, सन्न्यासिनः, त्यागिनः, तपस्विनः प्रतिकूलायामपि परिस्थितौ कदापि अधीरा न भवन्ति, तेषां मानसिकं सन्तुलनमक्षुण्णं भवति, विषयसाधनानां एकत्रीकरणे मनो न नियोज्य ते सद्‌गुणानामेकत्रीकरणे तन्नियोजयन्ति ।

अतो वक्तुं शक्नुमो यत्तृष्णाया अभावमवलम्बते साधूनां प्रसन्नता।

# २२८. सत्सङ्गः

*कुज्जा साहूहिं संथवं*

*—दशवैकालिकसूत्रम् ८/५३*

'संस्तव' इति शब्दस्यार्थो भवति परिचयः, संसर्गः, सम्पर्कः, सङ्गतिः । सङ्गतिः सम्पूर्णं जीवनं प्रभावितं करोति । सा मानवेभ्यः प्रगतिद्वारमुद्घाटयति। अहो, कियान् साधारणो जीवो भवति कीटः ! किन्तु पुष्पसङ्गतिं प्राप्य प्रभोः प्रतिमाया मस्तकमारोहति । लघुतमा नद्यपि गङ्गां संगम्य रत्नाकरं प्राप्नोति ।

विपरीत मस्मात्कुसङ्गतिरवनतेर्द्वारमुद्घाटयति। दुष्टानां सङ्गत्या मानवो दुर्गुणान् उपादातुं यतते दुर्व्यसनेषु रमते; तेन तस्याधः पतनमारभते ।

यदि वयं दुष्टान् निन्दनीयान् मन्यामहे, तर्हि कथं तेभ्यो दूरं स्थातुं न यतामहे? यदि वयं शिष्टान् प्रशंसनीयान् मन्यामहे तर्हि कथं तेषां शुभसङ्गतिं न कुर्महे ?

सज्जनानां सङ्गत्या जीवनं सद्गुणमयं भवितुमर्हति, किन्तु साधूनाम् सङ्गत्या जीवनं परमशान्तं निःस्वार्थं वैराग्यमयञ्च भवितुमर्हति।

अतः सज्जनसङ्गतेरपि साधुसङ्गतिः श्रेष्ठतराऽस्तीति वक्तुं शक्यते।

यदि वयमुन्नतेश्वरम् शिखरमारोढुमुत्कण्ठिताः स्मः तर्हि सदास्माभिः कर्त्तव्यः सत्सङ्गः ।

# २२९. निर्भयता

*सीहोव सद्देण न संतसेज्जा॥*

*—उत्तराध्ययनसूत्रम् २१/१४*

अहो कियान्निर्भयो भवति सिंहः ? महागजस्य गर्जनां निशम्यापि स न बिभेति। यद्यपि गजस्य तुलनायां सिंहस्य शरीरमतीव लघु भवति, तथापि तस्य साहसिकता, वीरता, शक्तिश्च तस्मिन्निर्भयताया भावं जागरयति येन स गजस्य प्रबलामपि गर्जनां उपेक्षते।

इत्थं वीराः पुरुषा अपि शत्रूणां गर्जनं श्रुत्वा न बिभ्यति; ये बिभ्यति ते कायराः कथ्यन्ते, न वीराः।

वीरतायाः सम्बन्धो बलेन तावान् न भवति यावान् साहसेन। सिंहाद् गजो बलवत्तरो भवति, परन्तु साहसी सिंहः तमाक्रम्य पराजयते। यावान् सिंहः साहसी भवति तावान् बुद्धिमानपि भवति। बुद्धिमत्तया साहसिकतया च स गजराजेन सह युद्धं कृत्वा विजयी भवति।

कथनस्यैतत्तात्पर्यं नास्ति यत् स्वशक्तेर्विचारं अकृत्वा केनापि साकं युद्धार्थं कूर्देमहि। शक्तेर्महत्तापि नास्ति न्यूना तथापि शत्रुर्यदि पुरतः स्थितः स्यात् तथा तुलनात्मकदृशाऽस्मदीया शक्तिर्न्यूनतरा स्यात्तर्हि तावच्चातुर्यमस्मास्वपेक्ष्यते येन शक्तेर्न्यूनतायाः पूर्तिः बुद्धिबलेन कर्त्तुं शक्येत।

इत्थं वीरतया साहसिकतया च सहानिवार्यास्ति निर्भयता।

## २३०. दुःखदत्वम्

*खणमित्तसुक्खा बहुकालदुक्खा ॥*

*— उत्तराध्ययनसूत्रम् १४/१३*

दिवसस्य पश्चान्निशा, निशायाः पश्चाद्दिवस आगच्छति। अन्धकारस्य पश्चात्प्रकाशः, प्रकाशस्य पश्चादन्धकार आगच्छति। तथैवास्मिन् जगत्य अस्माकं जीवने सुखस्य पश्चाद् दुःखं दुःखस्य पश्चात्सुखमागच्छति। अनुकूलासु परिस्थितिषु जना हसन्ति, प्रतिकूलासु परिस्थितिषु च क्रन्दन्ति।

यत्सुखमागत्य गच्छति, तत्क्षणिकं सुखं विषयसामग्री भोगजन्यं भवति। विषयभोगाः क्षणमात्रमस्मान् सुखिनः कुर्वन्ति, तदनन्तरं चिरकालं यावद् दुःखिनः कुर्वन्ति ते।

ज्ञानिनः कथयन्ति यदन्यदप्येकं सुखं भवति, आध्यात्मिकं तदुच्यते। तस्य प्राप्तये विषयभोगसामग्री न काचिदपेक्ष्यते। तत्सुखं सुचिरस्थायि भवति; स्थिरं, शाश्वतं, नित्यञ्च भवति।

ये आत्मनः स्वरूपं सम्यगवगच्छन्ति, आत्मस्वरूपस्य चिन्तनं कुर्वन्ति, ते तच्छाश्वतं सुखं प्राप्नुवन्ति। प्रयतमानः प्रत्येकं मानवस्तत्प्राप्तुं शक्नोति।

यन्नश्वरं भवति तत्सुखमुच्यते। यत्सुखमविनश्वरं भवति, तस्य ''आनन्द'' इत्यभिधानम्। आनन्द एवास्माभिः प्राप्तव्यः, किन्तु तत्सुखं न प्राप्तव्यम् यस्मिन् क्षणिकसुखदत्वं बहुकालदुःखदत्वमस्ति।

# २३१. सुव्रताः

*भिक्खाए वा गिहत्थे वा*
*सुव्वए कम्मई दिवं ॥*

*—उत्तराध्ययनसूत्रम् ५/२२*

प्रत्येकं गृहस्थः सद्गतिं न प्राप्नुयात् प्रत्येकं अनगारः सद्गतिं प्राप्नुयादिति नास्ति नियमः। यतः सद्गतेर्दुर्गतिर्वा सम्बन्धो बाह्यक्रियाभिर्न भवति, किन्त्वान्तरिकक्रियाभिर्भावनाभिर्वा भवति। गृहस्थावस्थायामवस्थितस्यापि भावाः पवित्रा भवितुमर्हन्ति तथाऽनगारावस्थायामवस्थितस्यापि(साधुवेषधारिणोऽपि) भावेष्वपवित्रता भवितुमर्हति।

पवित्रया भावनया विहित गृहसम्पत्तेरांशिकः त्यागोऽपि भवेत् सफलो मङ्गलकारी च। तथा चापवित्रभावनया विहितः सम्पूर्णगृहस्य त्यागोऽपि विफलोऽमङ्गलकारी वा भवेदिति निश्चितम्।

पवित्रा भावा आचरणेऽपि पवित्रताम् आनयन्ति। पवित्राचरणशीलानां व्यवहारः शुद्धो भवति, आध्यात्मिकसाधनायां गतिरुत्पद्यते अङ्गीकृतानां व्रतानां सम्यक्पालनं भवितुमर्हति।

ये जना अङ्गीकृतव्रतानां सावधानेन मनसा सम्यक् परिपालनं कर्तुकामा निरन्तरं प्रयतन्ते ते "सुव्रता" (सदाचारिणः) उच्यन्ते। सुव्रता अवश्यमेव कालं कृत्वा सद्गतिं, स्वर्गं वा प्राप्नुवन्ति, कामं ते भिक्षुकाः (श्रमणाः) सन्तु गृहस्थाः (श्रावकाः) वा।

# २३२. सूक्ष्मशल्यम्

*सुहुमे सल्ले दुरुद्धरे॥*

*—सूत्रकृताङ्गसूत्रम् १/२/२/१२*

पादत्राणं परित्यज्य यो जनः पदयात्रां करोति, तस्य पदतले कण्टकानां प्रवेशः सम्भवति। पदतलप्रविष्टे सति कण्टके स किं करोति? द्वितीयेन कण्टकेन सूच्या वा तं बहिष्करोति। कण्टके बहिष्कृतेऽपि तत्र काचिद् वेदनाऽनुभूयते, या गच्छति काले शनैः शनैर्नश्यति। कतिपयदिवसानन्तरन्तु ततश्छिद्रमपि नश्यति। चर्मणा चर्म संयुज्यते।

एषा त्वस्ति स्थूल कण्टकस्य वार्त्ता; किन्तु रागद्वेषावन्यौ सूक्ष्म-कण्टकावपि भवतः; तौ मनसि विशतः; तयोर्निष्कासनं नास्ति सुकरम्। सर्वे प्राणिनस्तयोः कण्टकयोर्वेदनामनुभवन्ति। आजीवनं ताभ्यां क्लिश्यन्ते। तयोर्निष्कासनार्थं विरला एव जनाः प्रयासं कुर्वते। प्रयासं कुर्वत्सु जनेष्वपि विरला एव साफल्यमाप्नुवन्ति। ये साफल्यमाप्नुवन्ति ते सुखं सुचिरं लभन्ते।

पादलग्नः कण्टको यथा सूच्या निस्सार्यते तथैव मनसि लग्नौ रागद्वेषरूपिणौ सूक्ष्मकण्टकौ सूत्रैः (जिनागमैः) निस्सार्येते।

तदर्थं किं कर्त्तव्यम्? सूत्राणां शास्त्राणां जिनप्रणीतागमानां वा अध्ययनं मननं चिन्तनं कर्त्तव्यमिति मनसि निश्चेतव्यम्। तेनैव सूक्ष्म-शल्ययुगलोद्धारः सम्भवः।

# २३३. अन्तर्बहिर्ज्ञानम्

*जे अज्झत्थं जाणइ से बहिया जाणइ।*
*जे बहिया जाणइ से अज्झत्थं जाणइ॥*

*—आचाराङ्गसूत्रम् १/१/४*

यः स्वकीयं सुखं दुःखञ्चावगच्छति स एवात्र परकीयं सुखं दुःखञ्चावगन्तुमर्हति। येन क्षुधायाः पिपासाया वा वेदना कदापि नानुभूता स्यात् स कथमेतदवगन्तुमर्हेद् यत् क्षुधितः पिपासुर्वा कियत्कष्टं सोढुं विवशो भवति ? एतादृशो मानवः कस्यचिद् बुभुक्षितस्य पिपासितस्य वा कष्टं दूरीकर्त्तुं तस्मायन्नस्य जलस्य वा दानं कथं कुर्यात्?

एवमेव यः परकीयं सुखं दुःखञ्च सम्यगवगच्छति स एवात्र स्वकीयं सुखं दुःखञ्चावगन्तुमर्हति, अर्थात् परकीयसुखदुःखयुगलं स्वकीयसुखदुःखवदवगच्छति। तादृश एव मानवे दयालुता, सहानुभूतिः, सहयोगिताः, परोपकारपरायणता वा निवसति। परेषां सुखमवलोक्य स ईर्ष्याम् न कुरुते, अपितु तेषां सुखेन स्वयं सुखानुभूतिं कृत्वा प्रसीदति। एवमेव परकीयदुःखं स्वकीयदुःखमिव मनसि कृत्वा तद्दूरीकरणाय तत्कालं यतते। प्रतिवेशिनः कस्यचित्पादे लग्नं कण्टकमिति श्रुत्वा ज्ञात्वा वा तत्कालं तादृशो मानवः सूचीं गृहीत्वा तन्निस्सारयितुं धावंस्तत्र गच्छति, ध्रुवं स्वकीयपादतले एव कण्टकं लग्नं स्यात्!

# २३४. विमृश्य वदेत्

*अणुचिन्तिय वियागरे॥*

*—सूत्रकृताङ्गसूत्रम् १/९/२५*

अस्मिंश्चराचरे जगति मौनेन कार्यं न निर्वहति। व्यवहारार्थं किञ्चिदपि(न्यूनतरमपि) वक्तव्यमावश्यकं भवति। पशव: पक्षिणोऽपि वदन्ति, किन्तु तेशां भाषा पृथग् भवति, तेषां सङ्केता भिन्ना भवन्ति, येषां माध्यमेन ते स्वकीयान्तर्भावना: प्रकटीकुर्वन्ति।

मनुष्य: पशुपक्षिभ्यो बुद्धिमत्तर: प्राण्यस्ति; अत: स्वीयान्तस्तलस्था: सूक्ष्मभावना: प्रकाशितुकामेन तेन विकसिततराया भाषाया आविष्कार: कृत:। सुविशालं शब्दकोषं निर्माय तेन स्वीया सा भाषाऽतीव समृद्धापि कृता।

समृद्धशब्दकोषप्रेरितो मनुष्यो भाषतेतराम् नैका नूतना: समस्या उत्पादयति च। तासां जाले पतित्वा मनुष्य: स्वयमपि क्लिश्यतेऽन्यान् जनानपि क्लिश्नाति।

यद्यपि जीवनस्य सर्वेषु क्षेत्रेषु संयमस्यावश्यकता भवति; परन्तु वाण्या: क्षेत्रे तस्य सर्वाधिका भवत्यावश्यकता।

यदि वाणी संयता स्यात्, सन्तुलिता स्यात्, सम्यग्विमृश्य पश्चादुक्ता स्यात् तर्हि सा वक्तु: लोकप्रियतां वर्धयति। साधूनां कृते तु भाषासमिते: वचनगुप्ते: चावश्यकता प्ररूपिताऽस्ति। आदौ विचिन्त्य पश्चात्ते वदेयु:।

# २३५. वार्धक्यम्

*वण्णं जरा हरइ नरस्स रायं ॥*

—उत्तराध्ययनसूत्रम् १३/२६

शैशवावस्थायां मानवः कियान् सुन्दरो दृश्यते ? न कूर्चम्, न श्मश्रु, न चिन्ता, न शोकः, न क्रूरता, न भयम्, न कपटम्, नाहङ्कारः, सरलो व्यवहारः, स्मितपूर्णमाननम्, मांसलो देह एकस्मिन् क्षणे क्रन्दनम्, अन्यस्मिन् क्षणे रोदनम् अश्रुपातनम् तथा तत्कालमेव हसनम्।

ततो बाल्यावस्था, अनन्तरं किशोरावस्था, यत्र विविधाभिः क्रीडाभिः सह मनोरञ्जनमध्ययनञ्च क्रियेते।

उभयोस्तयोरवस्थयोः पश्चात् प्रविशति जीवने यौवनम्। यौवने शारीरिकसौन्दर्यस्य का कथा ? स्वकीये चरमसीम्नि भवति तत्। वार्त्तालापे शिष्टता, वाण्यां गम्भीरता, व्यवहारे नम्रता, आचरणे शुद्धता, कार्ये चातुर्य्यम्, सद्गुणानां साधनया जीवनोन्नतेः प्रयासः परोपकारे तत्परता, सुगठितः पुष्टः प्रभावकः सन्तुलिते नीरोगो देहः, प्रत्येकस्यां चेष्टायामाकर्षणम्, प्रत्येकस्मिन् कार्ये उल्लासः उत्साहश्च।

यौवनावस्थायाः पश्चाद् भवति वार्धक्यस्याकर्षणविहीन-मागमनम्। तत्र शरीरे शैथिल्यम् सञ्चरति, निर्बलता अनुभूयते, केशाः श्वेता भवन्ति, निमित्तमात्रेण क्रोध उद्भवति, स्वभावे असहिष्णुता, शोकग्रस्तता, चिन्ता च दृश्यन्ते। दुर्बलमालोक्य शरीरमाक्रामन्ति विविधा रोगाः। सर्वं सौन्दर्यमपहरति वार्धक्यम्।

# २३६. न सञ्चिनुयात्

*बहुंपि लद्धुं न निहे ॥*

*—आचाराङ्गसूत्रम् १/२/५*

एकत्र सञ्चितं यज्जलं यदा इतस्ततो गन्तुमवकाशं न लभते तदा तत्रस्थमेव तद् दुर्गन्धयुतं भवति । तथैव सञ्चितं धनमपि धनवति सुरक्षाचिन्तां जनयति, अशान्तेश्च कारणं भवति। कुटुम्बिनः, चौराः, लुण्टाकाः सर्वेऽपि धनवन्तमनुगच्छन्ति तस्य धनमपहर्तुं प्रयतन्ते च। तेषां दुःसङ्कल्पं विज्ञाय असुरक्षितमात्मानं मन्यमानो भीतः स चिन्तयति यद् धनेन सुखवृद्धिर्भवतीति धारणाऽस्ति मिथ्या खलु।''

स्वेषां परेषां च पिपासायाः शमनमेव पानीयस्य सदुपयोगः । एवमेव स्वेषां परेषाञ्चावश्यकतायाः पूर्तिरेव धनस्य सदुपयोगः ।

परेषामावश्यकतायाः पूरणार्थं धनस्य वितरणं दानमित्युच्यते । दानं शीलं तपो भाव इति धर्मचतुष्टये प्रथमं स्थानमस्ति दानस्य। दाने न भवति पुण्यप्राप्तिः । अभिमानं परित्यज्य परोपकारार्थं निःस्वार्थभावेन यद् धनं दीयते तेन धर्मलाभो भवति। पुण्येन स्वर्गस्य धर्मेण च मोक्षस्य प्राप्तिर्भवितुमर्हति ।

आवश्यकताया अपेक्षा यत्र अधिकं धनं एकत्रीभवेत् तत्र तस्य परोपकारमार्गे त्यागः करणीयः, न तु सञ्चयः— इत्युपदिशन्ति सर्वज्ञाः।

## २३७. कर्मक्षयः

*तुट्टंति पावकम्माणि नवं कम्ममकुव्वओ ॥*

*—सूत्रकृताङ्गसूत्रम् १/५/६*

यत्किञ्चिदपि वयमद्मस्तत्सर्वं मलद्वारेण न निस्सरति। किञ्चिद् विष्ठारूपमेण बहिर्भवति, किञ्चित्तु जठरान्तर्गतान्त्रजाले संश्लिष्यति। तत्र दुर्गन्धयुतं भूत्वा नाना रोगान् शरीरे जनयति।

आरोग्यसन्देशवाहकाः कथयन्ति यत्प्रति सप्ताहमस्माभिरेक-दिवसस्य उपवासं कृत्वा स्वोदराय विश्राम दातव्यः। नूतनभोजनं यदोदरे न गच्छति तदाऽऽन्त्रसंश्लिष्टं पूर्वं मलं बहिरागच्छति। तेन शरीरं स्वस्थं नीरोगं भवति।

आध्यात्मिक क्षेत्रेऽप्येतत्सत्यम्। यो मानवो नूतनकर्मणां बन्धनं न करोति, तादृशं सावधानतया व्यवहरति, तादृशमाचरति, तादृशीं दिनचर्यां स्वीकरोति यया नूतनकर्मणां बन्धनं न भवेत्, तस्य पूर्वभवेषू-पार्जितानि सञ्चितान्यपि कर्माणि फलानुभूतिं कारयित्वा क्षयं गच्छन्ति।

कर्मणां सुफलस्य च भुक्तिस्तु भवत्यनिवार्या। यथोक्तं प्रभुणा महावीरस्वामिना—

कडाण कम्माण न अत्थि मोक्खो।

यावत्फलानि नानुभूयन्ते, तावत् कृतकर्मभ्यो मुक्तिर्न भवेत्। पूर्वकर्मफलं भुञ्जाना ये जना नवानि कर्माणि नोपार्जयन्ति ते क्रमशः कर्मक्षयानन्तरं सर्वज्ञा भूत्वा मोक्षं प्राप्नुवन्ति।

# २३८. तपस्संयमौ

*संजमेण तवसा अप्पाणं भावेमाणे विहरइ ॥*

*—उपासकदशा १/७६*

रागद्वेषाभ्यां विषयकषायाभ्याञ्च कलुषित आत्मा शरीर-माश्रित्यास्मिन् सुविशाले संसारे परिभ्रमणं करोति। तस्यैतद् भवभ्रमणं तावन्न समाप्यते यावदात्मनः तत्कालुष्यं न नश्यति यद् भवभ्रमणाय तं विवशं करोति।

कालुष्यं नाशयितुं किंकर्त्तव्यम् ? शास्त्रकारा उपायद्वयमुपदिशन्ति तपः संयमश्च।

पूर्वोपार्जितकर्मणां तपसा निर्जरा भवति। संयमेन नूतनकर्मबन्धनं न भवति, कर्मनिर्जरा केवलज्ञानं जनयति, केवलज्ञानेन च मोक्षधाम-प्राप्तिर्निश्चिता भवति। तत आयुष्कर्मणि क्षीणे मोक्षं प्राप्नोत्यात्मा।

मुनिजनानां मनो भवत्यतिनिर्मलम्। संयमस्य तपसश्च विशिष्टा साधना एव तस्य कारणम्। अनया साधनया तेषामात्मा शनैः शनैः निष्कलुषा भवति।

मनसि वचसि काये च संयमेन यत्र तेऽङ्कुशं उपयुञ्जन्ति, आस्रवस्य द्वाराणि पिदधाति; तत्रैव बाह्याभ्यन्तरतपोभ्याम् पूर्वसञ्चितकर्मणां निर्जरां कुर्वन्ति।

इत्थं संयमेन तपसा चात्मानं भावयन्तः(पावित्रीकुर्वन्तः) मुनयः (साधवः श्रमणाः वा) ग्रामाद् ग्रामं विहरन्ति।

# २३९. सुखी भवति कः ?

*अप्पा दंतो सुही होइ*
*अस्सिं लोए परत्थ य ॥*

*—उत्तराध्ययनसूत्रम् १/१५*

संयमः सुखस्योद्गमः। स्वीयासु समस्तासु मनोवृत्तिष्वङ्कुशवद् भवति संयमः।

चञ्चलाः क्षणभङ्गुरा मनोवृत्ती र्वशीकर्तुं कः समर्थो भवति ?

प्रश्नस्यास्योत्तरमस्ति— विवेकः। सम्राड्वद् विवेकः मनोवृत्तिष्वङ्कुशं स्थापयति। यतोऽपि विवेकस्य साम्राज्यं नियन्त्रणं वा दूरीभवति, तत एव मनोवृत्तयो जीवान् नर्त्तयन्ति, जीवा अप्याजीवनं निरन्तरं नृत्यन्तोऽवलोक्यन्ते।

मनोवृत्तिवशीभूताः प्राणिनो दुःखिनो भवन्ति। ते नाऽस्मिंल्लोके सुखं च लभन्ते न परलोके।

विपरीतमस्माद् यस्य मनोवृत्तयः विवेकवशवर्त्तिन्यो भवन्ति, अर्थात् प्रत्येकं कार्यं यः सम्यग्विमृश्य करोति बुद्धया, न तु मानसतरङ्गेण, आदौ गन्तव्यं निश्चित्यैव यः पदं मार्गे धत्ते, स्वल्पमात्रेऽप्यावश्यके वस्तुनि प्राप्ते यो मनसि सन्तोषं धारयति, सदाचारी विनीतः परोपकारी दयालुश्च यो भवति, मनीषिणो निगदन्ति यदात्मनियन्ता ऐश्वर्यविहीनोऽपि स संयतो मानवः सुखी भवति न केवलमस्मिन्नेव लोकेऽपितु परस्मिंल्लोकेऽपि।

# २४०. वीतरागता

*वीयरागयाएणं नेहाणुबंधणाणि तण्हाणु*
*बंधणाणि य वोच्छिन्दइ॥*

—उत्तराध्ययनसूत्रम् २९/४५

द्वेषो एकोऽस्ति त्याज्यः दुर्गुणः। यद्यपि रागो द्वेषस्य विरोधी दुर्गुणोऽस्ति, तथापि स द्वेषवत् त्याज्यो मन्यते। कस्मिंश्चिद् वयं द्वेषं कथं कुर्मः? यतोऽस्माकं कस्मिंश्चिद् रागो भवति।

उदाहरणार्थं भोजनमेव पश्यन्तु। दुर्गन्धयुक्तं पर्युषितं भोजनं प्रति अस्माकं द्वेषः प्रकटीभवति कुतः? यतः सुगन्धयुक्ते सद्यः पक्वे भोजने अस्माकं रागो भवति।

प्रत्येकं मानवं प्रत्यथवा प्रत्येकं वस्तु प्रत्येतत्सत्यमस्तीति निश्चितं ज्ञातव्यम्।

येषु मानवेषु वस्तुषु वास्माकमधिकारो न भवति तेषु द्वेषो जायते येषु चाधिकारो भवति तेषु राग उत्पद्यते।

स्त्रीपुरुषान् प्रति रागाद् वयं मोहबन्धने पतामः, अथ च वस्तूनि प्रति रागाद् वयं तृष्णाबन्धने पतामः। बन्धनं कोऽपि नेच्छति। यतस्तत् स्वातन्त्र्यं नाशयति, पारतन्त्र्यम् द्रढयति, दुःखं वर्धयति, सुखं छिनत्ति।

ये वीतरागा भवन्त्यथवा वीतरागतायाः साधनां कुर्वन्ति, तेषां स्नेहस्य (मोहस्य) तृष्णायाः (लोभस्य) च बन्धनानि नश्यन्ति।

# २४१. समर्थः कः ?

*अलमप्पणो होंति अलं परेसिं॥*

*— सूत्रकृताङ्गसूत्रम् १/१२/१९*

प्रस्तरनिर्मिता नौका स्वयं तु जले मज्जत्येव, आश्रितान् (उपविष्टान्) यात्रिणोऽपि मज्जयति विपरीतमस्मात् काष्ठनिर्माता नौका जले स्वयमपि तरति, आश्रितान् यात्रिणोऽपि तारयति।

अज्ञसूज्ञयोरपि एतदेवान्तरम् दृश्यते। अज्ञः स्वयमपि संसारे परिभ्रमति तथान्यानप्याश्रितजनान् कुमार्गोपदेशं कृत्वा संसारे परिभ्रामयति। विपरीतमस्मात् सुज्ञाः संसारसरोवरे स्वयमपि तरन्ति (पारं गन्तुं प्रयतन्ते) अन्यानपि तारयन्ति, स्वयं बुद्धा भवन्ति अन्येषां बोधका अपि, स्वयं मुक्ता भवन्ति अन्येषां मोचका अपि।

एतादृशा ज्ञानिनो गुरुवर्या आचार्या मनीषिणः पथप्रदर्शिकाः सदा सर्वेषां प्राणिनाम् हितं चिन्तयन्ति, सर्वेषां हितं शृण्वन्ति, श्रावयन्ति च। सर्वेषां प्राणिनां हितात्कल्याणाद्वाऽन्यः कोऽपि तेषां ध्येयो न भवति।

दयालुतया तेषां हृदयं परिपूर्णं भवतिं सहानुभूत्या तेषां भावना भरिता भवति, सर्वेभ्यस्ते शुद्धं प्रेम वितरन्ति, प्राप्नुवन्ति च। तेषां पवित्रं सच्चरित्रं जीवनं सार्थकं भवति।

प्रभुणा महावीरेण प्रतिपादितम् प्ररूपितमेतत् यत्सम्यग्ज्ञानी साधकः कल्याणपथेऽग्रेसरन् स्वपरहितसाधने समर्थो भवति।

# २४२. स्वाध्यायः

*सज्झाएणं नाणावरणिज्जं कम्मं खवेइ ॥*

*—उत्तराध्ययनसूत्रम् २९/१८*

वीतरागदेवप्रणीतशास्त्राणामध्ययनं ''स्वाध्याय'' इत्युच्यते। एषा सामान्याः परिभाषा प्रसिद्धास्ति। शास्त्राध्ययनेन शास्त्रश्रवणेन वा श्रुतज्ञानं लभ्यते। अनेन तेषां कर्मणां क्षयो भवति, यैर्ज्ञानमावृतमस्ति। यथा यथास्माभिः शास्त्राणां अध्ययनं क्रियते तथा तथा ज्ञानावरण-कर्तॄणि कर्माणि क्षीयन्ते। क्षीणेषु कर्मसु प्राप्यतेऽस्माभिः सर्वज्ञत्वम्। प्राप्तेसर्वज्ञत्वे मोक्षमस्मत्कृते आरक्षितमिव वयं लभामहे।

स्वस्य(आत्मनः) अध्ययनम्(चिन्तनं मननं वा) ''स्वाध्याय'' इति विशिष्टाऽस्ति शब्दस्यास्य परिभाषा।

आत्मा कः ? कस्तस्य स्वभावः (किं तस्य स्वरूपम्) ? कानि कर्माणि ? कः स्वभावस्तेषाम् ? आत्मना सह कर्मणां संयोगः कथम् अभवत् ? कदाभवत् ? किमेष संयोगो भङ्क्तुं शक्यते ? संयोगभञ्जनं कथं क्रियते? क्षणिकशाश्वतसुखयोः किमन्तरम्? अनयोः कतरं सुखमुपादेयम् ? शाश्वतं सुखं कथं कदा कुतः कुत्र लभ्यते ? अस्मदीयजीवनस्यान्तिमं प्रयोजनं किम् ? इत्यादिप्रश्नेषु चिन्तनं कृत्वा सम्यगुत्तराणामन्वेषणं स्वाध्यायोऽस्ति, येन ज्ञानाबरणीयकर्मक्षयो भवति।

# २४३. जीवेषु समानत्वम्

*हत्थिस्सय कुन्थुस्सय समे चेव जीवे ॥*

*— भवगतीसूत्रम् ७/८*

जीवाजीवयोः जडचेतनयोः स्वपरयोः पार्थक्यम् भवति । एतौ परस्परमाश्रिता अपि परिवर्त्तितौ न भवतः । जीवः कथमप्यजीवो न भवेत्, एवमजीवोऽपि जीवो न भवेत् । जीवः सदा जीव एव तिष्ठति अजीवश्च सदा अजीव एव तिष्ठति । त्रिकाले त्रिलोके कदापि क्वापि कोऽपि जीवोऽजीवो नाभूत्, न भवति, न च भविष्यति । अतः सर्वेषु जीवेषु समानत्वमस्तीति वक्तुं शक्यते । अत्र कस्यापि विप्रतिपत्तिर्न स्यात्।

प्रश्नोऽयमुपतिष्ठते यत्सर्वे जीवाः समानाश्चेत् कुक्कुरस्य जीवो दर्दुरे, अश्वस्य जीवोऽजे, गजस्य जीवो मार्जारे कथं वसेत् ? जीवस्य निश्चितम् परिमापं कियत् ?

शास्त्रकारा मन्यन्ते यज्जीवस्य परिमाणं शरीरानुसारं भवति । यो जीवो यस्मिन् शरीरे निवसति, स तस्य परिमाणं स्वीकरोति । अतो मृतस्य कुक्कुरस्य जीवो दर्दुरे, अश्वस्य जीवोऽजे, गजस्य जीवो मार्जारे समाविशति । रात्रौ दीपकान्निस्सरन् यः प्रकाशः सम्पूर्णे गृहे विस्तृतं दृश्यते, स एवैकस्मिन् घटे समाविशति यदि स दीपको घटे न पिधीयते। अनेन ज्ञायते यत् मृतस्य हस्तिनो जीवः कुन्थुशरीरे प्रविश्य समाविशति वसति च ।

# २४४. हसन्न वदेत्

*न हासमाणोवि गिरं वएज्जा ॥*

*—दशवैकालिक सूत्रम् ७/५४*

हसतः भाषणम् भाषमाणस्य चं हसनमेकोऽस्ति दुर्गुणः, कुस्वभावः। मूर्खताया नाना लक्षणेषु लक्षणमेकमेतत्।

कथमेतत् मूर्खतालक्षणम्? ज्ञायते चिन्तनेन यत्रस्मिन्नवसरेऽन्यान् हासयितुं भाषणं क्रियते। हसन् यो भाषते स शब्दानां स्पष्टमुच्चारणं कर्त्तुं न शक्नोति। स्पष्टोच्चारणाभावे श्रोतारः किञ्चिदपि नावगच्छन्ति। वक्तुराशयस्यावगतेरभावेऽपि हसन्तं वक्तारमवलोक्य कामं हसन्तु ते किञ्चित्, किन्तु तेषां मुखाद् वास्तविकं हास्यं न प्रकटीभवति। इत्थं हासनस्य वक्तुरुद्देश्यमेव नश्यति।

अतः सुज्ञा मानवा एतादृशीं मूर्खतां न कुर्वन्ति एनामसभ्यतां मन्वानाः।

मन्यन्ताम्, अन्यजनान् हासयितुं वयं काञ्चिद्विनोदकथां हास्यरसपूर्णां कवितां वा श्रावयितुमिच्छामः। अस्य कृते आदौ हसित्वा पश्चाद् भाषेमहि अथवा आदौ भाषित्वा पश्चाद् हसेम; किन्तु कदापि हसन्तो न वदेम अथवा वदन्तो न हसेम।

अस्याः सूक्तेर्माध्यमेन शास्त्रकारैर्यदुपदिष्टमस्ति तदस्माभिराचरणीयमेव।

# २४५. हिंसकाः के ?

*कुद्धा हणंति, लुद्धा हणंति, मुद्धा हणंति ॥*

*—प्रश्नव्याकरणम् १/१*

प्रमादवशात् प्राणिनां प्राणेषु यदाघातः क्रियते तदेव ''हिंसा'' इति संज्ञां लभते। हिंसया सदान्येभ्यो दुःखं दीयते। मनुष्यः कथं दुःखं ददाति ? कथं हिंसां करोति ?

अस्मिन् विषये विचार्य ज्ञानिनः कारणत्रयं निर्दिशन्ति (१) क्रोधः (२) मोहः (३) लोभश्चेति। प्रत्येकस्य कारणस्य विषये पृथक् पृथगत्र किञ्चिच्चिन्तनं प्रस्तूयते।

क्रोध एको भयङ्कर आवेगोऽस्ति। अस्मिन्नावेगे मनुष्यः स्वकर्त्तव्यं विस्मरति, तस्य नेत्रयुगलं रक्तं भवति, भुजयुगं चलति, स दण्डादण्डि केशाकेशि मुष्टीमुष्टि कर्त्तुमुद्यते भवति।

मोह एकं मधुरं विषमस्ति। ममता मानवमन्धं कुरुते। यस्मिन् मानवस्य ममता जागर्त्ति तं सर्वथा सुखिनं कर्त्तुं स पक्षपातं करोति, अन्यान् प्रति अन्यायं करोति, परेष्वत्याचारं करोति, प्राणिनां प्राणव्यपरोपणं करोति।

लोभोऽप्यपरं मधुरं विषम्। लाभेन वर्धते लोभः। यत्र यत्रार्थप्राप्तेराशा भवेत् तत्र तत्र प्राणिनां हिंसायामपि सङ्कोचं न करोति मानवः।

# २४६. हिंसां न कुर्यात्

*सव्वेसिं जीवियं पियं*
*नाइवाएज्जं कंचणं ॥*

*—आचारांगसूत्रम् १/२/३*

एतादृशः कः प्राणी, यो जीवितुं न वाञ्छति ? स्वीयं जीवनं सर्वेभ्यो रोचते।

मनुष्यस्य जीवनं कियन्मूल्यवदस्ति इति तदैव ज्ञायते यदा तस्य समक्षमेकत्र स्वर्णमुद्राणां कोटयो मृत्युना सह तथापरत्र साधारणमन्नं जलञ्च जीवनेन सह स्थापयित्वोभयोरेकस्य चयनार्थम् आदिश्यते। कोटिश स्वर्णमुद्रा उपेक्ष्य मनुष्ये जीवनेन सह साधारणमन्नं जलमेव निश्चयेन चेष्यति खलु।

यदा जीवनमीदृशममूल्यमस्ति तदा तुच्छधनादिकवस्तूनां कृते पापाचरणं कथं क्रियेत ? कथं क्रोधेनात्मनि कालुष्यमारोप्येत ? लोभेन मनसः कृते कथमशान्तिः क्रियते ? कथमभिमानेन सर्वत्र शत्रवः सृज्येरन्? कथं छलेन जनाः प्रतार्येरन् ? बलेन कथमन्ये मानवा व्यर्थं तुद्येरन् ?

इति चिन्तयन्तो विशेषज्ञा वीतरागाः सर्वदर्शिनः सत्पुरुषो महात्मानो महानुभावा उपदिशन्ति यज्जीवनं सर्वेषां कृते प्रियमस्तीति मत्वा कस्यापि प्राणिनो हिंसा न कर्त्तव्या।

## २४७. क्षान्तिः कथं जायते ?

*कोहविजएणं खंतिं जणयइ ॥*

—उत्तराध्ययनसूत्रम् २१/६७

काङ्क्षति प्रत्येकोऽपराधी यद्यदि स क्षम्यते जनैस्तर्हि कियत्सुखदं कार्यं स्यात् ? कोऽपि पापी पश्चात्तापं करोति चेत्, कृतानां स्वीयपापानां कृते लज्जानुभूतिं करोति चेत्, अवश्यं स क्षन्तव्यः।

कृतो हार्दिकः पश्चात्तापो मानवं अपराधान्निवारयति। तेनापराधी शुद्धो भवति। परिवर्त्तमानः पापी पुण्यात्मा सञ्जायते, दुराचारी च सदाचारिणि परिणमति। अस्य सम्पूर्णम् श्रेयः क्षमावीरं गच्छति।

क्षमा वीरस्य भूषणम्, वीरताया लक्षणम्, निर्भयतायाश्चिह्नम्। यस्य पाणौ क्षमाशस्त्रं विराजते, क्रोध शत्रुं स विजयते। क्रोधी क्षमाशीलं पीडयितुं न समर्थः।

क्षमा विषधरं शोभयति, न विषविहीनं भीरुम्। शक्तिशालिनं अलङ्करोति क्षमा, न तु शक्तिहीनम् कातरम्।

अस्य क्षमागुणस्य जन्म कदा भवति ? यदा प्राणी स्वात्मनः क्रोधस्योपरि विजयं लभते। यावदन्तःकरणे क्रोधस्य साम्राज्यं वर्त्तति तावत्तत्र न भवति क्षमाया जन्म।

क्षमाक्रोधौ परस्परं विरुद्धौ, यत्र क्षमा तत्र न क्रोधः, यत्र च क्रोधः तत्र न क्षमा। क्रोधगजस्योपरि स्थापिते विवेकाङ्कुशे क्षान्तिः स्वयमेव जायते।

## २४८. प्रसन्नता

*खमावणयाएणं पल्हायणभावं जणयइ ॥*

*-उत्तराध्ययनसूत्रम् २९/१७*

यदि केनाप्यस्मान् प्रत्यपराधः कृतः स्यात् तथा वयं तं दण्डयितुं समर्था अपि भवेम; किन्तु तस्मै दण्डं न दत्त्वा तं क्षमेम तर्हि उभयत्र प्रसन्नता प्रादुर्भवेत्। क्षमायाः कारणेन यथाऽपराधी प्रसीदति तथैवापराध्योऽपि।

उभयोः प्रसन्नतायाः कारणे भिन्ने भवतः। दण्डेन प्राप्तव्याद् भाविदुःखाद् आत्मा रक्षित— इत्यापराधिनः प्रसन्नतायाः कारणम् स्पष्टम्। अपराध्यो (यस्यापराधः कृतोऽपराधिना सः) अपि एवं विचार्य प्रसीदति यद् अपराधिनं क्षान्त्वा तस्य हृदयं स्वौदार्येण एतादृशं प्रभावितं यत्स मित्रमभवत्। जीवनशुद्धिमाप्तुं अपराधिनेऽन्योऽप्येकोऽवसरः प्रदत्तः।

क्षमाप्राप्तस्य जीवनशुद्धिरभवच्चेत् स आजीवनं कृतज्ञो भूत्वा यत्र कुत्रापि वसेत्तत्र क्षमाकर्त्तुः प्रशंसां कुर्यात्, क्षमाकर्त्तारं प्रति विनीतो भवेत्। यावज्जीवं च तं प्रति सुव्यवहारं कुर्यात्।

तस्य विनयेन, प्रशंसया कृतज्ञतापरिपूर्णेन व्यवहारेण च प्रेर्यमाणः, क्षमाशीलः क्षमाकर्त्ता, अन्यान् अपराधकर्तॄन् अपि समये समये क्षमिष्यति। क्षान्त्या ये प्रसन्नताया भावा मानसे जनिष्यन्ते तेषामनुभूतिं स करिष्यते।

# २४९. असन्त्रस्ताः

*न सन्तसन्ति मरणन्ते*
*सीलवन्ता बहुस्सुया ॥*

—उत्तराध्ययनसूत्रम् ५/२९

विषादस्त्रुटेः परिणामः । त्रुटिः कथं भवति ? अज्ञानेन । केन भवति? दुराचारेण ।

अज्ञानी दुराचारेण भवत्यपराधी, आप्नोति दुःखम्, दण्डितस्सन् करोति पश्चात्तापम् ।

एवमवगच्छति भ्रान्तिवशात्स यद् दुराचारेण सुखं लभ्यते; अत एव सुशीलत्वं परित्यज्य स कुशीलत्वमङ्गीकरोति, दुर्व्यसनानां सेवनं कृत्वा सम्पूर्णं स्वकीयं जीवनं नाशयति ।

स्वचक्षुषी उद्घाट्य यदि स परितो निवसतां दुर्व्यसनग्रस्तानां जीवनं पश्येत् तथा तस्य विषये विचारं कुर्यात् तर्हि सहजरूपेणैवमवगन्तुं शक्नुयात् यत्तेषांजीवनं दुर्व्यसनानां दासो दुःखी चास्ति। तेषां मनोवृत्तयः सहजेन स्वाभाविकरूपेण कार्याणि न कुर्वन्ति । ये सुशीला विद्वांसश्च भवन्ति तेषां मनोवृत्तयः स्वाभाविकरूपेण कर्त्तव्यप्रेरिका भवन्ति । ते पूर्वमेव स्वलक्ष्यं निर्धारयन्ति । स्वगन्तव्यं प्रति प्रस्थानं कुर्वन्ति, प्राप्नुवन्ति च ।

सदाचारिणस्ते दुर्व्यसनानि परित्यज्य सम्यगवगच्छन्ति यद् सहजरूपेण स्वकर्त्तव्ये प्रवर्त्तमाना बहुश्रुता मृत्युपर्यन्तं विचरन्ति असन्त्रस्ताः (निर्भीकाः)।

# २५०. ज्ञानसारम्

*एवं खु णाणिणो सारं*
*जं न हिंसइ किंचणं ॥*

— सूत्रकृताङ्गसूत्रम् १/१/४/१०

अहिंसा दया प्राणातिपातविरमणं वा एको धर्मोऽस्ति। धर्मस्यास्य आचरणं परिपालनं वा स एव कर्तुं शक्नोति यः सम्यग्ज्ञानं प्राप्नोति।

जीवाजीवादिनवतत्त्वानां सविस्तरं स्वरूपं योऽवगच्छति, यथार्थरूपेण हृदयङ्गमं करोति, स एव वास्तविको अहिंसकोऽस्तीति वक्तुं शक्यते।

एतादृशो मानवोऽवगच्छति यद् यथा मदीयं जीवनं मह्यं प्रियमस्ति तथैव प्रत्येकजीवस्य जीवनं तस्मै प्रियमस्ति। यथाऽहं मृत्युं नेच्छामि तथैव संसारे कोऽपि जीवो मृत्युं नेच्छति।

एतदपि चिन्तयति स गभीरतया यद् यद्यहं कस्मैचित् प्राणदानं कर्तुं नार्हामि अर्थात् कस्यचिच्छवं जीवयितुं नार्हामि तर्हि कस्यचित् प्राणानामपहरणस्य मदीयः कोऽधिकारः ? (प्राणदानस्यानधिकारी कस्यचित्प्राणादानस्य प्राणापहरणस्य वाधिकारी कथं स्यात् ?)

इत्थं तस्यात्मनि स्थिता विवेकान्विता मनोवृत्तिस्तमहिंसाधर्मम् शिक्षयति, दयापालनार्थं प्रेरयति, स्वपरहितं कारयति। एतदेवास्ति ज्ञानसारम् नास्त्यत्र संशीतिलेशः कश्चित्।